हरिवंश

॥ हरिवंशभारतप्रारंभः॥

१ रि०

॥ई॥ श्रीगणेशायनमः॥ श्रीवेदव्यासायनमः॥ यंब्रह्मवेदांतविदोवदंतिपरंप्रधानंपुरुषंतथान्ये। विश्वोद्गतेःकारणमीश्वरंवा तस्मैनमोविघ्नविनाशनाय॥१॥ नारायणंनमस्कृत्यनरंचैवनरोत्तमं। देवींसरस्वतींचैवततोजयमुदीरयेत्॥२॥ जयतिपराशरसूनुःसत्यवतीहृदयनंदनोव्यासः। यस्यास्यकमलगलितंवाङ्मयममृतंजगत्पिबति॥३॥ योगोशतंकनकशृंगमयंददाति विप्रायवेदविदुषेचबहुश्रुताय। एकांचभारतकथांप्रतिशृणोति। तुल्यंफलंभवतितस्यचतस्यचैव॥४॥ द्वैपायनोष्ठपुटनिःसृतमप्रमेयंपुण्यंपवित्रमथपापहरंशिवंच। योभारतंसमधिगच्छतिवाच्यमानंकिंतस्यपुष्करजलैरभिषेचनेन॥५॥ शताश्वमेधस्ययदत्रपुण्यंचतुःसहस्रस्यशतक्रतोश्च। नवेदनंतंहरिवंशदानात्प्रकीर्तितंव्यासमहर्षिणाच॥६॥ पितामहा… द्यंप्रवदंतिषष्ठंमहर्षिमक्षय्यविभूतियुक्तं। नारायणस्यांशजमेकपुत्रंद्वैपायनंवेदमहानिधानं॥७॥ आद्यंपुरुषमीशानंपुरुहूतंपुरुष्टुतं। ऋतमेकाक्षरंब्रह्मव्यक्ताव्यक्तंसनातनं॥८॥ असच्चसदसच्चैवयद्विश्वंसदसत्परं। परावराणांस्रष्टारंपुराणंपरमव्ययं॥९॥ मंगल्यंमंगलंविष्णुंवरेण्यमनघंशुचिं। नमस्कृत्यहृषीकेशंचराचरगुरुंहरिं॥१०॥ नैमिषारण्येकुलपतिःशौनकस्तुमहामुनिः। सौतिंपप्रच्छधर्मात्मासर्व

शास्त्रविशारदं॥११॥ शौनकउवाच॥ सौतेत्वमहदाख्यानंभवतापरिकीर्तितं। भूतानांचसर्वेषांपार्थिवानांतथैवच। देवानांदानवानांचगंधर्वोरगरक्षसां। दैत्यानामथसिद्धानांगुह्यकानांचसर्वशः। अत्यद्भुतानिकर्माणिविक्रमाधर्मनिश्चयाः। विचित्राश्चकथायोगाजन्मचाग्र्यमनुत्तमं। कथितंभवतापुण्यंपुराणंश्लक्ष्णयागिरा। मनःकर्णसुखंतन्मेप्रीणात्यमृतसंमितं। तत्रजन्मकुरूणांचत्वयोक्तंलोमहर्षणे। नवृष्ण्यंधकानांचतद्भवान्प्रब्रवीतुमे॥ ॥सौतिरुवाच॥ जनमेजयेनयत्पृष्टःशिष्योव्यासस्यधीमतः। तत्तेहंसंप्रवक्ष्यामिवृष्णीनांवंशमादितः॥१२॥ श्रुत्वेतिहासंकार्त्स्न्येनभारतानांसभारतः। जनमेजयोमहाप्राज्ञोवैशंपायनमब्रवीत्॥१३॥ जनमेजयउवाच॥ महाभारतमाख्यानंबह्वर्थंश्रुतिविस्तरं। कथितंभवतासर्वंविस्तरेणमयाश्रुतं॥१४॥ तत्रशूराःसमाख्याताबहवःपुरुषर्षभाः। नामभिःकर्मभिश्चैववृष्ण्यंधकमहारथाः॥१५॥ तेषांकर्मावदानानित्वयोक्तानिद्विजोत्तम। तत्रतत्रसमासेनविस्तरेणतथाप्रभो। नचमेतृप्तिरस्तीहकीर्त्यमानेपुरातने। एकस्त्वंचतपोराशिर्दृष्टःपांडववृष्णयः। वंशजास्त्वंसर्वेषांप्रत्यक्षदर्शिवान्। कथयस्वकुलंतेषांविस्तरेणतपोधन। यस्ययस्यान्वयेयेयेतांस्तानिच्छामिवेदितुं। सर्वमेतदशेषेणकथयस्वद्विजोत्तम। तेषांपूर्वविसृष्टिंचवि

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

ह०टि० २

चिंत्यमां प्रजापतः॥ सौतिरुवाच॥ स त्वत्यपरिदृष्टश्च समहात्मा महातपाः। विस्तरेणानुपूर्व्याच्च कथयामास तां कथां॥
वैशंपायन उवाच॥ शृणु राजन्कथां दिव्यां पुन्यपापप्रणाशिनी॥ कथ्यमानां मया चित्रां बह्वर्थां श्रुतिविस्तरां॥ यश्चै
तां धारयेन्नित्यं शृणुयाद्वाप्यभीक्ष्णशः॥ स्ववंशधारणं कृत्वा स्वर्गलोके महीयते॥ अव्यक्तं कारणं यत्तन्नित्यं स
दसदात्मकं। प्रधानं पुरुषं तस्मान्निर्ममे विश्वमीश्वरः॥ तं वै विद्धि महाराज ब्रह्माणममितौजसं। स्रष्टारं सर्वभूता
नां नारायणपरायणं॥ अहंकारस्तु महतस्तस्माद्भूतानि यज्ञिरे। भूतसर्गस्तु तत्रेष्व इति सर्गः सनातनः॥ आ
विस्तरावयवं चैव यथार्थं पर्ज्ञं यथा श्रुति। कीर्त्यमानं शृणु मया सर्वेषां कीर्तिवर्द्धनं। धन्यं यशस्यं शत्रुघ्नं स्वर्ग्यमायुर्वि
वर्द्धनं। सर्वेषां पुण्यकर्मणां॥१९॥ तस्मात्कल्पायने कल्पः समग्रं शुचये शुचि॥ आदिवंशाद्ध्याभि मूलसर्गमनु
त्तमं॥ अथ स्वयंभूर्भगवान्सिसृक्षुर्विविधाः प्रजाः॥ अप एव ससर्जादौ तासु वीर्यमथासृजत्॥२१॥ आपो नारा इ
ति प्रोक्ता आपो वै नरसूनवः। अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः॥२२॥ हिरण्यवर्णमभवत्तदंडमुदकेशयं। त
स्मिन्यज्ञे स्वयं ब्रह्मा स्वयंभूरिति विश्रुतः॥२४॥ हिरण्यगर्भो भगवानुषित्वा परिवत्सरं। तदंडमकरोद्द्वैधं दिवं भुव
मथापि च॥२५॥ तयोः शकलयोर्मध्ये आकाशमसृजत्प्रभुः। अप्सु पारिप्लवां पृथ्वीं दिशश्च दशधा दधे। तत्र का

लं मनो वाचं कामं क्रोधमथो रतिं। ससर्ज सृष्टिं तद्रूपां स्रष्टुमिच्छन्प्रजापतीन्॥ मरीचिमत्र्यंगिरसं पुलस्त्यं पुलहं
क्रतुं। वसिष्ठं च महातेजाः सोऽसृजत्सप्त मानसान्॥ सप्त ब्रह्माण इत्येते पुराणे निश्चयं गताः॥ नारायणात्मका
नां च सप्तानां ब्रह्मजन्मनां॥ ततोऽसृजत्पुनर्ब्रह्मा रुद्रं रोषात्मसंभवं॥ सनत्कुमारं च विभुः पूर्वेषामपि पूर्वजं॥ स
से तेजनयंतिस्म प्रजारुद्रश्च भारत। स्कंदः सनत्कुमारश्च तेजः संक्षिप्य तिष्ठतः॥ तेषां सप्त महावंशा दिव्या देवग
णान्विताः॥ क्रियावंतः प्रजावंतो महर्षिभिरलंकृताः॥ विद्युतोऽशनिमेघांश्च रोहितेंद्रधनूंषि च। पयांसि च स
सर्जादौ पर्जन्यं च तथैव च॥ ऋचो यजूंषि सामानि निर्ममे यज्ञसिद्धये॥ साध्यानसृजन्देवान् इत्येवमनुश्रु
श्रुमः। उच्चावचानि भूतानि गात्रेभ्यस्तस्य यज्ञिरे। आपवस्य प्रजासर्गं सृजतस्तु प्रजापतेः॥ द्विधा कृत्वा
त्मनो देहमर्द्धेन पुरुषोऽभवत्। अर्द्धेन नारी तस्यां च सोऽसृजद्विविधाः प्रजाः॥ दिवं च पृथिवीं चैव महिम्ना व्याप्य
तिष्ठति। विराजमसृजद्विष्णुः सोऽसृजत्पुरुषं विराट्। पुरुषं तं मनुं विद्धि तस्य मन्वंतरं स्मृतं। द्वितीयमांतरस्यै
व मनोरंतरमुच्यते। स वैराजः प्रजासर्गं ससर्ज पुरुषः प्रभुः। नारायणविसर्गस्य प्रजास्तस्याप्ययोनिजाः। आ
युष्मान्कीर्तिमान्धन्यः प्रजावांश्च भवेन्नरः। आदिसर्गं विदित्वेमं यथाख्यं प्राक्कयाद्भृतिं॥ ॥इति खिले पुहरि

ह०री० वंशे पारिजाते प्रथमः सर्गः॥ ॥वैशंपायन उवाच॥ स सृष्टासु प्रजास्वेवमापवस्तु प्रजापतिः। कन्यां नाम महाबाहो कर्दम
स्य प्रजापतेः। लेभे वै पुरुषः पत्नीं शतरूपामयोनिजां॥१॥ आपवस्य महिम्ना तु दिवमावृत्य तिष्ठता। धर्मेणैव मह
२ राज शतरूपा व्यजायत॥३॥ सा तु वर्षायुतं तप्त्वा तपः परमदुश्चरं। भर्तारं दीप्तमनसं पुरुषं प्रत्यपद्यत। स वै स्वायंभु
वस्तात पुरुषो मनुरुच्यते। तस्यैकसप्ततियुगं मन्वंतरमिहोच्यते॥५॥ वैराजात्पुरुषाद्वीरं शतरूपा व्यजायत। प्रिय
व्रतोत्तानपादौ वीरौ काम्या व्यजायत॥६॥ काम्या नाम महाबाहो कर्दमस्य प्रजापतेः। काम्यापुत्राश्च चत्वारः सं
म्राट् कुक्षिर्विराट् प्रभुः। प्रियव्रतं समासाद्य पतिं सा जनयत्सुतान्॥८॥ उत्तानपादं जग्राह पुत्री धर्मप्रजापतेः
उत्तानपादाच्चतुरः सूनृताजनयत्सुतान्। धर्मस्य कन्या सुश्रोणी सूनृता नाम विश्रुता। उत्पन्ना वाजिमेधेन ध्रु
वस्य जननी शुभा। ध्रुवं च कीर्तिमंतं च आयुष्मंतं वसुं तथा। उत्तानपादोऽजनयत् सूनृतायां प्रजापतिः। ध्रुवो
वर्षसहस्राणि त्रीणि दिव्यानि भारत। तपस्तेपे महाराज प्रार्थयन् सुमहद्यशः। तस्मै ब्रह्मा ददौ प्रीतः स्थानमात्म
समं प्रभुः। अचलं चैव पुरस्तात् सप्तर्षीणां प्रजापतिः। तस्याभिमानमृद्धिं च महिमानं निरीक्ष्य च देवासुराणामा
चार्यः श्लोकमप्युशना जगौ। अहोऽस्य तपसो वीर्यं महाश्रुत महाव्रते। यदेनं पुरतः कृत्वा ध्रुवं सप्तर्षयः स्थिताः २

तस्माच्छिष्टिं च भव्यं च ध्रुवाच्छंभुरजायत। श्लिष्टेराधत्त सुच्छाया पंच पुत्रानकल्मषान्। रिपुं रिपुंजयं पुत्रं वृकलं वृ
कतेजसं। रिपोराधत्त बृहती चाक्षुषं सर्वतेजसं॥ अजीजनत्पुष्करिण्यां वीरिण्यां चाक्षुषो मनुं। प्रजापतेरात्म
जाया मरण्यस्य धीमतः। मनोरजायंत दश नड्वलायां महौजसः। कन्यायां नरश्रेष्ठ वैराजस्य प्रजापतेः॥
ऊरुः पूरुः शतद्युम्नः तपस्वी सत्यवाक् शुचिः। अग्निष्टुदतिरात्रश्च सुद्युम्नश्चेति ते नव। अभिमन्युश्च दशमो न
ड्वलायां प्रजापतिः। ऊरोरजनयत्पुत्रान् षडाग्नेयी महात्मनः। अंगं सुमनसं ख्यातिं क्रतुमंगिरसं गयं॥
अंगात्सुनीथापत्यं वै वेनमेकं व्यजायत। अपचारेण वेनस्य प्रकोपः सुमहाननघ। प्रजार्थमृषयस्तस्य म
मंथुर्दक्षिणं करं। वेनस्य पाणौ मथिते संबभूव महान्नृपः॥ तं दृष्ट्वा मुनयः प्राहुरेष वै मुदिताः प्रजाः। करिष्य
ति महातेजा यशश्च प्राप्स्यते महत्। स धन्वी कवची जातस्तेजसा निर्दहन्निव॥ पृथुर्वैण्यस्तथा लोकान् ररक्ष
क्षत्रपूर्वजः। राजसूयाभिषिक्तानामाद्यः स पृथिवीपतिः॥ तस्माच्चैव समुत्पन्नौ निपुणौ सूतमागधौ। तेनेयं
गौर्महाराज दुग्धा सस्यानि भारत। प्रजानां वृत्तिकामेन देवैः सर्षिगणैस्सह। पितृभिर्दानवैश्चैव गंधर्वैस्सा
प्सरोगणैः॥ सर्पैः पुण्यजनैश्चैव वीरुद्भिः पर्वतैस्तथा। तेषु तेषु च पात्रेषु दुह्यमाना वसुंधरा। प्रादाद्यथेप्सि-

तंवीरं तेन प्राणेनधरयन्पृथोः पुत्रौ तु धर्मज्ञौ जज्ञातेऽन्तर्द्धिपालिनौ ॥ शिखंडिनी हविर्द्धानमंतर्द्धानाद्व्यजायत ॥ हवि
र्द्धानात्षडाग्नेयी धिषणाजनयत्सुतान् । प्राचीनवर्हिषं शुक्रं गयं कृष्णं प्रजाजिनौ । प्राचीनवर्हिर्भगवान् महानासी
त्प्रजापतिः ॥ हविर्द्धानान्महाराज येन संवर्द्धिताः प्रजाः ॥ प्राचीनाग्राः कुशास्तस्य पृथिव्यां जनमेजय । प्राचीनवर्हि
र्भगवान् पृथिवीतलचारिणः ॥ समुद्रतनयायां तु कृतदारोऽभवत्प्रभुः । महतस्तपसः पारे सवर्णायां प्रजापतिः
सवर्णाधत्त सामुद्री दश प्राचीनवर्हिषः । सर्वे प्राचेतसा नाम धनुर्वेदस्य पारगाः ॥ अपृथग्धर्मचरणास्तेऽतप्यंत
महत्तपः । दश वर्षसहस्राणि समुद्रसलिलेशयाः ॥ तपश्चरत्सु पृथिवीं प्राचेतस्सु महीरुहाः ॥ अरक्ष्यमाणामाव
व्रुर्बभूवाथ प्रजाक्षयः । प्रत्याहृते तदा तस्मिंश्चाक्षुषस्यांतरे मनोः ॥ नाशकन्मारुतो वातुं वृतं खमभवद्द्रुमैः ॥
दश वर्षसहस्राणि न शेकुश्चेष्टितुं प्रजाः । तदुपश्रुत्य तपसा युक्ताः सर्वे प्रचेतसः । मुखेभ्यो वायुमग्निं च ससृजुर्जात
मन्यवः । उन्मूलानथ तान्वृक्षान्कृत्वा वायुरशोषयत् । तानग्निरदहद्घोर एवमासीद्द्रुमक्षयः ॥ द्रुमक्षयमथो बु
द्ध्वा किंचिच्छिष्टेषु शाखिषु । उपगम्याब्रवीदेतान्राजा सोमः प्रजापतीन् । कोपं यच्छत राजानः सर्वे प्राचीनवर्हिषः
वृक्षाः कन्यां प्रदास्यंति शाम्येतामग्निमारुतौ । रत्नभूता च कन्येयं वृक्षाणां वरवर्णिनी । भविष्यं जानता तेन ४

धृता गर्भेण वै मया । मारिषा नाम कन्येयं वृक्षाणामिति निर्मिता ॥ भार्या वोऽस्तु महाभागा सोमवंशविवर्द्धिनी
युष्माकं तेजसोऽर्द्धेन मम चार्द्धेन तेजसः ॥ अस्यामुत्पत्स्यते पुत्रो दक्षो नाम प्रजापतिः ॥ स इमां दग्धभूयिष्ठां युष्मत्ते
जोमयेन वै । अग्निनाऽग्निसमो भूत्वा प्रजाः संवर्द्धयिष्यति । ततः सोमस्य वचनाज्जगृहुस्ते प्रचेतसः । संहृत्य कोपं
वृक्षेभ्यः पत्नीं धर्मेण मारिषां । मारिषायां ततस्ते तु मनसा गर्भमादधुः ॥ दशभ्यस्तु प्रचेतोभ्यो मारिषायां प्रजापतिः ॥
दक्षो जज्ञे महातेजाः सोमस्यांशेन भारत । पुत्रानुत्पादयामास सोमवंशविवर्द्धनान् । अचरांश्च चरांश्चैव द्विप
दोऽथ चतुष्पदान् । स सृष्ट्वा मनसा दक्षः पश्चादसृजत स्त्रियः । ददौ स दश धर्माय कश्यपाय त्रयोदश ॥ सप्तविंश
ति सोमाय नक्षत्राणां ददौ प्रभुः । तासु देवाः खगा गावो नागा दितिजदानवाः ॥ गंधर्वाप्सरसश्चैव जज्ञिरेऽन्याश्च
जातयः । ततः प्रभृति राजेंद्र प्रजा मैथुनसंभवाः ॥ संकल्पाद्दर्शनात्स्पर्शात्पूर्वेषामभवन्प्रजाः ॥ ॥ जनमेजय
उवाच ॥ देवानां दानवानां च गंधर्वोरगरक्षसां । संभवः कथितः पूर्वं दक्षस्य च महात्मनः । अंगुष्ठाद्ब्रह्मणो जा
तो दक्षः प्रोक्तस्त्वयानघ । वामांगुष्ठात्तथा पत्नी तस्य चैव प्रजापतेः ॥ कथं प्राचेतसत्वं स पुनर्लेभे महातपाः ॥ एत
न्मे संशयं विप्र व्याख्यातुं त्वमिहार्हसि । दौहित्रश्चैव सोमस्य कथं श्वशुरतां गतः ॥ ॥ वैशंपायन उवाच ॥ उत्पत्ति

हरि ५
श्चातुराश्रमस्थितान्नतेषु पार्थिवा ऋषयोऽत्र न मुह्यंति विद्यावंतं ह्ययेनराः ।युगे युगे भवंत्येते सर्वे दक्षादयो नृप।पुनश्चै
व निरुध्यंते विद्वांस्तत्र न मुह्यति।ज्यैष्ठं कनिष्ठमप्येषां पूर्वमासीज्जनाधिप।तप एव गरीयोऽभूत्प्रभावश्चैव कारः
णं।इमां विसृष्टिं दक्षस्य यो विद्यात्सचराचरां।प्रजावान्पुरुषः सोऽपि स्वर्गलोके महीयते॥ ॥इति श्री खिलेषु हरि
वंशे प्रजासर्गो द्वितीयः॥ ॥जनमेजय उवाच॥ देवानां दानवानां च गंधर्वोरगरक्षसां। उत्पत्तिं विस्तरेणैव वैशंपायन की
र्तय॥ ॥वैशंपायन उवाच॥ प्रजाः सृजेति व्यादिष्टः पूर्वं दक्षः स्वयंभुवा।यथा ससर्ज भूतानि तथा शृणु महीपते।मनसा
चैव भूतानि पूर्वमेवासृजत्प्रभुः।ऋषीन्देवांश्च गंधर्वान् असुरान् सुरमानुषान्।यक्षान्भूतपिशाचांश्च वयः पशुमृगांस्त
था।यदास्य न व्यमानस्य न व्यवर्द्धंत ताः प्रजाः।ततः संचिंत्य स पुनः प्रजाहेतोः प्रजापतिः।स मैथुनेन धर्मेण।सिसृक्षु
र्विविधाः प्रजाः।असिक्नीमावहत्पत्नीं वीरणस्य प्रजापतेः।सुतां सुतपसा युक्तां नाम सीं लोकधारिणीं।अथ पुत्रस
हस्राणि वीरिण्यां पंचवीर्यवान्।वीरिण्यां जनयामास दक्ष एव प्रजापतिः।तान्दृष्ट्वा महाभागान् संविवर्द्धयिषून्प्र
जाः।देवर्षिः प्रियसंवादो नारदः प्राब्रवीदिदं।नाशाय वचनं तेषां शापायैवात्मनस्तथा।यं कश्यपः सुतं वीरं परमे
ष्ठमजीजनत।दक्षस्य वै दुहितरि शापनयान्मुनिः।पूर्वं स हि समुत्पन्नो नारदः परमेष्ठिनः। असिक्न्यामथवी ५

रिण्यां।भूयो देवर्षिसत्तमः।तं भूयो जनयामास पितेव मुनिपुंगवं।तेन दक्षस्य पुत्रा वै हर्यश्वा इति विश्रुताः।नि
र्मथ्य नाशिताः सर्वे विधिना च न संशयः।तस्याद्यत स्वयं दक्षो नाशाया मितविक्रमः।ब्रह्मर्षीन्पुरतः कृ
त्वा याचितः परमेष्ठिना।ततोऽभिसंधिं चक्रे वै दक्षस्तु परमेष्ठिना।कन्यायां नारदो मह्यं तव पुत्रो भवेदिति।त
तो दक्षः सुतां प्रादात्प्रियां वै परमेष्ठिने।स तस्यां नारदो यज्ञे दक्षशापभयादितः॥ ॥जनमेजय उवाच॥
कथं प्रणाशिताः पुत्रा नारदेन महर्षिणा।प्रजापतेर्द्विजश्रेष्ठ श्रोतुमिच्छामि तत्त्वतः॥ ॥वैशंपायन उवाच॥
दक्षस्य पुत्रा हर्यश्वा विवर्द्धयिषवः प्रजाः।समागतान्महावीर्यान् नारदस्तानुवाच ह।बालिशा वत यूयं वै
नास्या जानीत वै भुवः प्रयाताः सर्वतो दिशः।प्रमाणं द्रष्टुकामा वै भूयः प्राचेतसात्मजाः। अद्यापि न निवर्त्तं
ते समुद्रेभ्य इवापगाः।हर्यश्वेषु विनष्टेषु दक्षः प्राचेतसः प्रभुः।वीरिण्यामथ पुत्राणां सहस्रमसृजत्प्रभुः।वि
वर्द्धयिषवस्ते तु सबलाश्वाः प्रजास्ततः।पूर्वोक्तं वचनं तात नारदेनैव चोदिताः।अन्योन्यमूचुस्ते सर्वे सम्यगा
ते नैव मार्गेण प्रयाताः सर्वतो दिशं।अद्यापि न निवर्तंते तत्रैव निधनं गताः॥ नष्टेषु सबलाश्वेषु दक्षः क्रु

हि०पु०
६

ष्टाः ब्रद्धिमनुः। नारदनाश मेहीनि गर्भवासं वसेतिच। तदाप्रभृति वै भ्राता भ्रातुरन्वेषणे नृप। प्रयातो नश्यति क्षिप्रं तन्न कार्या
र्थं विपश्चिता। तांश्चापि नष्टान् विज्ञाय पुत्रान् दक्षः प्रजापतिः। षष्टिं दक्षोऽसृजत्कन्या वैरिण्यामिति नः श्रुतं। तास्तदा प्रति
जग्राह भार्यार्थं कश्यपः प्रभुः। सोमो धर्मश्च कौरव्य तथैवान्ये महर्षयः। ददौ स दश धर्माय कश्यपाय त्रयोदश। सप्तविं
शति सोमाय चतस्रोऽरिष्टनेमिने। द्वे चैव भृगुपुत्राय द्वे चैवांगिरसे तथा। द्वे कृशाश्वाय विदुषे तासां नामानि मे शृणु।
अरुंधती वसुर्यामी लंबा भानुर्मरुत्वती। संकल्पा च मुहूर्ता च

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक

संध्या विश्वा च भारत। सुपत्न्यो धर्मस्य ताः। तासां च अपत्यानि मे शृणु। विश्वेदेवास्तु विश्वायाः संध्या साध्यान्व्यजा
यत। मरुत्वत्यां मरुत्वंतो वसोस्तु वसवस्तथा। भानोस्तु भानवस्तात मुहूर्तायां मुहूर्तजाः। लंबायाश्चैव घोषोऽ
थ नागवीथी च जामिजा। पृथिवीविषयं सर्वं मरुवत्यां व्यजायत। संकल्पायास्तु धर्मात्मा जज्ञे संकल्प एव हि।
नागवीथ्यश्च यामिन्यां वृषलम्बं व्यजायत। अथ राजन् सोमपत्न्यस्तु दक्षः प्राचेतसो ददौ। सर्वा नक्षत्रनाम्न्य
स्ता ज्योतिषे परिकीर्तिताः। ये त्वन्ये ख्यातिता देवाः सर्वे ज्योतिःपुरोगमाः। वसवोऽष्टौ समाख्याता तेषां वक्ष्यामि
विस्तरं। आपो ध्रुवश्च सोमश्च धरश्चैवानिलोऽनलः। प्रत्यूषश्च प्रभासश्च वसवो नामभिः स्मृताः। आपस्य पुत्रा
वैतंड्यः। सोमः शांतो मुनिस्तथा। ध्रुवस्य पुत्रो भगवान् कालो लोकप्रकालनः। ध्रुवस्य पुत्रो भगवान् का
लो लोकप्रकालनः। सोमस्य पुत्रो भगवान् वर्चस्वी जेन जायते। धरस्य पुत्रो द्रविणो हुतहव्यवहस्तथा।
मनोहरायाः शिशिरः प्राणोऽथ निरमस्तथा। अनिलस्य शिवा भार्या तस्याः पुत्रः पुरोजवः। अविज्ञात
गतिश्चैव द्वौ पुत्रावनिलस्य तु। अग्निपुत्रः कुमारस्तु शरस्तंबे श्रियावृतः। तस्य शाखो विशाखश्च नैगमे
ष्टश्च पृष्ठजः। अपत्यं कृत्तिकानां तु कार्त्तिकेय इति स्मृतः। स्कंदः सनत्कुमारश्च सृष्टः पादेन तेजसः। प—

त्यस्य विभुः पुत्र मृषिनाम्नाथ देवलं। द्वौ पुत्रौ देवलस्यापि क्षमावंतौ मनीषिणौ॥ बृहस्पतेस्तु भगिनी वारस्त्री
६० ब्रह्मवादिनी॥ योग सिद्धा जगत्कृत्स्नमशक्ता विचचार ह॥ प्रभासस्य तु भार्या सा वसूनामष्टमस्य च॥ विश्वकर्म्मा
७ महाभागस्तस्यां जज्ञे प्रजापतिः॥ कर्त्ता शिल्पसहस्राणि त्रिदशानां च वार्द्धकः॥ भूषणानां च सर्वेषां कर्त्ता शि
ल्पवतां वरः॥ यः सर्वेषां विमानानि देवतानां चकारकाः॥ मानुषाश्चोपजीवंति यस्य शिल्पं महात्मनः॥ सुरभि
कश्यपाद्रुद्रानेकादश विनिर्म्ममे॥ महादेवप्रसादेन तपसा भाविता सती॥ अजैकपादहिर्बुध्न्यस्त्वष्टा रुद्रश्च
भारत॥ त्वष्टुश्चैवात्मजः श्रीमान् विश्वरूपो महायशाः॥ हरश्च बहुरूपश्च त्र्यंबकश्चापराजितः॥ वृषाकपिश्च
शंभुश्च कपर्द्दी रैवतस्तथा॥ मृगव्याधश्च सर्पश्च कपाली च विशांपते॥ एकादशैते व्याख्याता रुद्रास्त्रिभुवने
श्वराः॥ शतं त्वेतत्समाख्यातं रुद्राणाममितौजसां॥ पुराणे भरतश्रेष्ठ यैर्व्याप्ताः सचराचराः॥ लोका भरतशा
र्दूल कश्यपस्य निबोध मे॥ अदितिर्दितिर्दनुश्चैव अरिष्टा सुरसा तथा॥ सुरभिर्विनता चैव ताम्रा क्रोधवशा तथा॥
इडा कद्रूर्म्मुनिः स्वसा लोके नागपत्यानि मे शृणु॥ पूर्वं मन्वंतरश्रेष्ठा द्वादशासन् सुरोत्तमाः॥ तुषिता नाम ते
ऽन्योन्यमूचुर्वैवस्वतेऽन्तरे॥ उपस्थितेऽतियशसो चाक्षुषस्यांतरे मनोः॥ हितार्थं सर्वलोकानां समागम्य पर ७

स्परं॥ आगच्छत द्रुतं देवा अदितिं संप्रविश्य वै॥ मन्वंतरे प्रसूयामस्ततः श्रेयो भविष्यति॥ ॥इति खिलेषु हरिवंशे
॥ ॥ वैशंपायन उवाच॥ एवमुक्त्वा तु ते सर्व्वे चाक्षुषस्यांतरे मनोः॥ मारीचात्कश्यपाज्जाता स्तेदित्या दक्षकन्य
या॥ तत्र विष्णुश्च शक्रश्च जज्ञाते पुनरेव च॥ अर्यमा चैव धाता च त्वष्टा पूषा तथैव च॥ विवस्वान्सविता चैव मि
त्रो वरुण एव च॥ अंशो भगश्चातितेजा आदित्या द्वादश स्मृताः॥ चाक्षुषस्यांतरे पूर्व्वमासन्ये तुषिताः सुराः॥
वैवस्वतेंतरे चैत आदित्या द्वादश स्मृताः॥ सप्तविंशति या प्रोक्ताः सोमपत्न्यो महाव्रताः॥ तासामपत्यान्यन
वन्दीप्तान्यमिततेजसां॥ अरिष्टनेमिपत्नीनामपत्यानीह षोडश॥ बहुपुत्रस्य विदुषश्चतस्रो विद्युतः स्मृ
ताः॥ प्रत्यंगिरःप्रजाः श्रेष्ठाः ऋचो ब्रह्मर्षिसंज्ञिताः॥ कृशाश्वस्य तु देवर्षेर्देवप्रहरणाः स्मृताः॥ एते युगसह
स्रांते जायंते पुनरेव हि॥ सर्वे देवगणास्तात त्रयस्त्रिंशत्तु कामजाः॥ तेषामपि पराजेंद्र दानीमुत्पत्तिरु
च्यते॥ तथा सूर्यस्य गमने उदयास्तमिता विह॥ एवं देवनिकायास्ते संभवंति युगे युगे॥ दित्याः पुत्रद्वयं ज
ज्ञे कश्यपादिति नः श्रुतिः॥ कश्यपस्यात्मजावेतौ सर्वेभ्यः पूर्वजौ मतौ॥ हिरण्यकशिपुश्चैव हिरण्याक्षश्च ना

१० रत।सिंहिका चा नवकन्या विप्रचित्तेः परिग्रहः॥ सैंहिकेया इति ख्याता यस्य पुत्रा महाबलाः॥ गणास्तेषां तु राज्ञे
इदं त्रासादस्य उच्यते। हिरण्यकशिपोः पुत्राश्चत्वारः स्थुलतेजसः॥ अनुह्लादश्च प्रह्लादः संह्लादश्च वीर्य
८ वान्॥ संह्लादश्च चतुर्थोनुह्लादपुत्रो ह्रदस्तथा॥ ह्रदस्य पुत्रोऽप्यायुर्वै शिवः कालस्तथैव च॥ विरोचन
श्च प्राह्लादिर्बलिर्जज्ञे विरोचनात्॥ बलेः पुत्रशतं ह्यासीद्बाणज्येष्ठं नराधिप॥ धृतिराष्ट्रश्च सूर्यश्च चंद्रमा
श्चेंद्रतापनः॥ कुंभनाभो गर्दभाक्षः कुक्षिरित्येवमादयः॥ बाणस्तेषामतिबलो ज्येष्ठः पशुपतेः प्रियः॥ पुराक
ल्पे हि बाणेन प्रसाद्योमापतिं प्रभुं॥ पार्श्वतो विहरिष्यामि इत्येवं याचितो वरः॥ हिरण्याक्षसुताः पंच विद्वां
सः सुमहाबलाः॥ झर्झरः शकुनिश्चैव भूतसंतापनस्तथा॥ महानाभश्च विक्रांतः कालनाभस्तथैव च॥ अन
वन्दनुपुत्राश्च शतं तीव्रपराक्रमाः॥ तेजस्विनो महावीर्याः प्राधान्येन विबोधनात्॥ द्विमूर्द्धा शकुनिश्च
च तथा शंकुशिरा विभुः॥ शंकुकर्णो विराधश्च गविष्ठो दुंदुभिस्तथा॥ डुंडजिः सर्वजिच्चैव वज्रनाभस्तथै
व च महानाभश्च विक्रांतः। कालनाभस्तथैव च॥ एकचक्रो महाबाहुस्तारकश्च महाबलः॥ वैश्वानरः पुलो ८

मालच विद्रावणमहाशिराः॥ स्वर्भानुर्वृषपर्वा च तुहुंडश्च महाबलः॥ सूक्ष्मश्चैव निचंद्रश्च ऊर्णनाभो म-
हागिरिः॥ असिलोमा सुकेशी च वसश्च बलकोदनः॥ तथा गगनमूर्द्धा च कुंभनादो महासुरः॥ प्रदो
मयः कुक्षिपस्तोदयग्रीवश्च वीर्यवान्॥ वैसृपः सविरूपाक्षः॥ कुजश्चाथ महाबलो हिरण्यकशिपुश्च
वशतमायश्च शंबरः॥ सरमः सालनश्चैव विप्रचित्तिश्च वीर्यवान्॥ सर्वे एते दनोः पुत्राः कश्यपादितिजज्ञिरे
विप्रचित्तिप्रधानास्ते दानवाः सुमहाबलाः॥ तेषां यदपत्यं तु न तच्छक्यं नराधिप॥ प्रसंख्यातुं महीपा
ल पुत्रपौत्रमनंतकं॥ स्वर्भानोस्तु प्रभा कन्या पुलोम्नश्च शची सुता॥ उपदानवी मयसुता सर्मिष्ठा वा-
र्षपर्वणी॥ पुलोमा कालका चैव वैश्वानरसुते उभे॥ बह्वपत्ये महासत्वे मारीचेस्तु परिग्रहः॥ तयोः पुत्र
सहस्राणि षष्टिर्दानवनंदिनः॥ चतुर्दश शतान्यन्यान् हिरण्यपुरवासिनः॥ पितामहप्रसादेन ये हताः
सव्यसाचिना॥ ततो परे महावीर्या दानवास्त्वतिदारुणाः॥ सिंहिकायामथोत्पन्ना विप्रचित्तिसुतास्त
था॥ दैत्यदानवसंयोगा जाता तीव्रपराक्रमाः॥ सैंहिकेया इति ख्याता त्रयोदश महाबलाः॥ राहुः स-
र्पमन्ज्येष्ठः चंद्रसूर्यप्रमर्दनः॥ सत्पः कल्पश्च बालिनो नलश्चैव महाबलः॥ वातापिनमुचिश्चैव इल्वलः

१०
२

स्वसृमस्तथा। अंजिकानरकश्चैव कालनातस्तथैव च॥ सरमानस्तथा चैव शंकुनानश्च वीर्यवान्। मरीयः संतपुत्र
श्च ताडकानां व्यजायत। स्वधर्म्माणस्तथा चैव भारकल्पश्च वीर्यवान्। एते वै दानवाः श्रेष्ठा दनोर्वंशविवर्द्धनाः। ते
षां पुत्राश्च पौत्राश्च सेतशोथ सहस्रशः। संह्लादस्य तु दैत्यस्य निवातकवचाः कुले। समुत्पन्नाः सुमहता तपसा
भावितात्मनः। निस्रः कोट्यः सुतास्तेषां मणिमत्यां निवासिनः। तेप्यवध्यास्तु देवानामर्जुनेन निपातिताः॥ षट् सु
ताः सुमहासत्वाः ताम्रायाः संप्रकीर्त्तिताः॥ क्रौंची श्येनी प्रकाशी च सुग्रीवी शुचि गिध्रिका। काकी काकानजय
त्। उलूकी प्रत्युलूकिकान्। श्येनी श्येनं तथा भासी भासान् गृध्र्यपि गृध्रकान्। पक्षिगणान् सुग्रीवी वांस्का।
परंतप अस्वानुष्ठानाहं नाश्वताम्रा वंशाः प्रकीर्त्तिताः॥ विनतायास्तु पुत्रौ द्वावरुणो गरुडस्तथा। सुपर्णः प
तगश्रेष्ठो दारुणः स्वेन कर्म्मणा। सुरसायाः सहस्रं तु सर्पाणाममितौजसां। अनेकशिरसां नात खेचराणां म
हात्मनां। काद्रवेयाश्च बलिनः सहस्रममितौजसः। सुपर्णवशगा नागा जज्ञिरे नैकमस्तकाः। तेषां प्रधानभू
त वंशः खवासुकितक्षकाः। ऐरावतो महापद्मः कंबलाश्वतरावुभौ। एलापत्रश्च शंखश्च कर्कोटकधनंजयौ।
महानील महाकर्णौ धृतराष्ट्र बलाहकौ। कुरुदः पुष्पदंष्ट्रश्च दुर्मुखः सुमुखस्तथा। शंखश्च शंखपालश्च। २

कपिलो वामनस्तथा। गणं क्रोधवशं विद्धि तस्य सर्वे त्वदंष्ट्रिणः। स्थलजाः पक्षिणो जाताश्च धरायाः प्रसवाः
स्मृताः। गास्तु वै जनयामास सुरभिर्महिषीस्तथा। इरा वृक्षलतावल्लीस्तृणजातीश्च सर्वशः। स्वसा त्वय
शरक्षांसि मनुरप्सरसस्तथा। अरिष्टा च महासत्वान् गंधर्वानमितौजसः। एते कश्यपदायादाः कीर्त्तिता
स्थाणुजंगमाः। तेषां पुत्राश्च पौत्राश्च शतशोथ सहस्रशः। एष मन्वंतरे नीते सर्गः स्वारोचिषे स्मृतः॥ वैव
स्वते तु महति वारुणे वितते क्रतौ। जुह्वानस्य ब्रह्मणो वै प्रजासर्ग इहोच्यते। पूर्वं यत्र तु सप्तर्षीनुत्तमा
न् सप्त मानसान्। पुत्रत्वे कल्पयामास स्वयमेव पितामहः। ततो विरोधे देवानां दैत्यानां चैव भारत। दिति
र्विनष्टपुत्रा वै तोषयामास कश्यपं। तां कश्यपः प्रसन्नात्मा सम्यगाराधितस्तदा। वरेण च्छंदयामास सा च
वव्रे वरं तदा। पुत्रमिंद्रवधार्थाय समर्थममितौजसं। स च तस्यै वरं प्रादात् प्रार्थितं सुमहातपाः। दत्वा
च वरमव्यग्रो मारीचस्तामभाषत। न विष्यति सुतस्तस्ये यद्यनं धारयिष्यति। इंद्रं पुत्रो निहंता ते गर्भं वै
त्वं शरदां शतं। यदि धारयसे सौचं तत्परा व्रतमास्थिता। तथेत्यभिहिता भर्त्रा यदा देवी महातपाः॥ धारया
मास गर्भं तं शुचिः सा वसुधाधिप। ततस्तूपगमादित्यां गर्भमादाय कश्यपः। रावयंश्च गणश्रेष्ठं देवानां

ममितौजसं॥ तेजःसंहृत्य दुर्धर्षमवध्यममरैरपि॥ जगाम पर्वतं चैव तपसे संशितव्रतः॥ तस्याश्चैवांतरप्रेप्सुरन-
वत्या कश्यासनः॥ मुनेर्वर्षशते वास्य दृष्ट्वांतरमच्युतः॥ अशुचिं पादयोः शौचं दितिं त्वायनमाविनात्म॥ गर्भं
चा दारयामास तस्याः कुक्षिं प्रविश्य ह॥ वज्रपाणिस्ततो गर्भं सप्तधा तत्व्यकृंतत॥ सत्त्या पाट्यमानो गर्भो वज्रे-
ण परराद ह॥ मा रोदीरिति तं शक्रः पुनः पुनरथाब्रवीत्॥ सोऽभवत्सप्तधा गर्भस्तमिंद्रो रुषितः पुनः॥ एकैकं
सप्तधा चक्रे वज्रेणैव विकर्षणः॥ मरुतो नाम देवास्ते बभूवुर्भरतर्षभ॥ यथोक्तं वै मघवता तथैव मरुतोऽभव
न्॥ देवा एकोनपंचाशत्सहाया वज्रपाणिनः॥ तेषामेवं प्रवृद्धानां भूतानां जनमेजय॥ रोचयन् वै गणश्रे-
ष्ठं देवानाममितौजसं॥ निकायेषु निकायेषु हरिः प्रादात्प्रजापतिः॥ क्रमशस्तानि राज्यानि पृथुपूर्वाणि
भारत॥ स हरिः पुरुषो वीरः कृष्णो जिष्णुः प्रजापतिः॥ पर्जन्यस्तपनोऽव्यक्तस्तस्य सर्वमिदं जगत्॥ भूतसर्ग-
मिमं सम्यग्जानतो भरतर्षभ॥ नास्ति विनयमसीद परलोकभयं कृतः॥ ॥ इति श्री खिलेषु हरिवंशे म-
रुदुत्पत्तिः॥ ॥ वैशंपायन उवाच॥ अभिषिच्याधिराज्ये च पृथुं वैण्यं पितामहः॥ ततः क्रमेण राज्यानि व्या-
देष्टुमुपचक्रमे॥ द्विजानां वीरुधां चैव नक्षत्रग्रहयोस्तथा॥ यज्ञानां तपसां चैव सोमं राज्येऽभ्यषेचयत्॥ अपां १०

तु वरुणं राज्ये राज्ञां वैश्रवणं पतिं॥ आदित्यानां तथा विष्णुं वसूनामथ पावकं॥ प्रजापतीनां दक्षं तु मरुतां
अथ वासवं॥ दैत्यानां दानवानां च प्रह्लादममितौजसं॥ नारायणं तु साध्यानां रुद्राणां वृषभध्वजं॥ विप्रचि-
त्तिं तु राजानं दानवानामथादिशत्॥ वैवस्वतं पितॄणां च यमं राज्येऽभ्यषेचयत्॥ यक्षाणां राक्षसानां च प-
र्थिवानां तथैव च॥ सर्वभूतपिशाचानां गिरिशं शूलपाणिनं॥ शैलानां हिमवंतं च नदीनामथ सागरं॥
गंधर्वाणामधिपतिं चक्रे चित्ररथं प्रभुं॥ वारणानां तु राजानमैरावणमथादिशत्॥ उच्चैःश्रवसमश्वानां
॥ गरुडं चैव पक्षिणां॥ मृगाणामथ शार्दूलं गोवृषं तु गवामपि॥ गंधानां चैव भूतानां च शरीरिणां॥ श- १सर्वेषां
ब्दाकाशवतां चैव वायुं बलवतां वरं॥ सागराणां नदीनां च तथैव वर्षणस्य च॥ आदित्यानामधिपतिं
पर्जन्यमभिषिक्तवान्॥ सर्वेषां दंष्ट्रिणां शेषं राजानं सोऽभ्यषेचयत्॥ सरीसृपाणां सर्वेषां राजानं चै-
व तक्षकं॥ सर्वाप्सरोगणानां च कामदेवं तथा प्रभुं॥ ऋतूनामथ मासानां गतेरयनयोस्तथा॥ गतस्या-
थ योगस्य चक्रे संवत्सरं प्रभुं॥ एवं विभज्य राज्यानि क्रमेण प्रपितामहः॥ दिशां पालानथ ततः स्थापया

मासन्नारत।सर्वस्यां दिशि पुत्रं तु वैराजस्य प्रजापते। दिशां पालं तु धन्वानं राजानं सोऽभ्यषेचयत्।द
क्षिणस्यां महात्मानं कर्दमस्य प्रजापतेः। पुत्रं शंखपदं नाम राजानं सोऽभ्यषेचयत्।पश्चिमायां दिशि
तथा रजसः पुत्रमच्युतं। केतुमंतं महात्मानं राजानं सोऽभ्यषेचयत्। तथा हिरण्यरोमाणं पर्जन्यस्य प्र
जापते। उदीच्यां दिशि दुर्द्धर्षं राजानं सोऽभ्यषेचयत्। तैरियं पृथिवी सर्वा सप्तद्वीपा सपत्तना॥ यथाप्रदे
शमद्यापि धर्मेण प्रतिपाल्यते। राजसूयाभिषिक्तस्तु पृथुरेभिर्नराधिपैः। वेददृष्टेन विधिना राजरा
ज्ये नराधिप। ततो मन्वंतरेऽतीते चाक्षुषेऽमिततेजसि। वैवस्वताय मनवे पृथिव्यां राज्यमादिशत्।
तस्य विस्तरमाख्यामि मनोर्वैवस्वतस्य हि। तवानुकूल्याद्राजेंद्र यदि शुश्रूषसेऽनघ। महदेतदधिष्ठा
नं पुराणे परिनिष्ठितं। पुण्यं यशस्यं आयुष्यं स्वर्गवासकरं शुभं॥ ॥जनमेजय उवाच॥ विस्तरेण पृथो
र्जन्म वैशंपायन कीर्तय। यथा महात्मना तेन दुग्धा चेयं वसुंधरा। यथा च पितृभिर्दुग्धा यथा देवैर्य
थार्षिभिः। यथा दैत्यैश्च नागैश्च यथा यक्षैर्यथा द्रुमैः। यथा शैलैः पिशाचैश्च गंधर्वैश्च द्विजोत्तमैः। रा

११

क्षसैश्च महासत्वैर्यथा दुग्धा वसुंधरा। तेषां पात्रविशेषांश्च वैशंपायन कीर्तय॥ ॥वैशंपायन उवाच॥ अ
हं ते कीर्तयिष्यामि पृथोर्वैण्यस्य विस्तरं। एकाग्रः प्रयतश्चैव शृणुष्व जनमेजय। नाशुचेः क्षुद्रमनसे
नाशिष्यायाव्रताय वा। नकीर्तयं महाराज कृतघ्नस्याहितस्य स्वर्गं ददाति आयुष्यं पुण्यं वदेश्च संमितं
रहस्यमृषिभिः प्रोक्तं शृणु राजन्यथातथं। यश्चैतत्कथयेन्नित्यं पृथोर्वैण्यस्य विस्तरं। ब्राह्मणेभ्यो नमस्
कृत्य न स शोचेत्कृताकृतं॥ ॥इति श्री हरिवंशे पृथूपाख्याने॥ ॥वैशंपायन उवाच॥ आसीद्धर्म
स्य संगोप्ता पूर्वमत्रिसमः प्रभुः। अत्रिवंशसमुत्पन्नस्त्वंगो नाम प्रजापति। तस्य पुत्रोऽभवद्वेणो नात्य
र्थं धर्मकोविदः। जातो मृत्युसुतायां वै सुनीथायां प्रजापतिः। स मातामहदोषेण तेन कालात्मना
त्मजः। स्वधर्मान्पृष्ठतः कृत्वा काममलोभेष्ववर्तत। मर्यादां स्थापयामास धर्मोपेतां स पार्थिवः। वे
दधर्मानतिक्रम्य सोऽधर्मनिरतोऽभवत्। निःस्वाध्यायवषट्कारा प्रजास्तस्मिन्प्रजापतौ। प्रवृत्तं न
पुः सोमं हुतं यज्ञेषु देवताः। न यष्टव्यं न होतव्यं इति तस्य प्रजापतेः। आसीत्प्रतिज्ञा क्रूरेयं विनाशे
प्रत्युपस्थिते। अहमीड्यश्च यष्टा च यज्ञश्चेति कुरूद्वह। मयि यज्ञा विधातव्या मयि होतव्यमित्यपि

BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक पुस्तकसंग्रह

ततस्तिक्रांतिमर्य्यादमादहानमसांप्रतं। ऋचुर्महर्षयः सर्व्वे मरीचिप्रमुखास्तथा। वयं दीक्षां प्रवेक्ष्यामः
संवत्सरगणान्बहून्। अधर्मं कुरु मा वेण नैष धर्मः सतामिति। अन्वयेऽत्रेः प्रसूतस्त्वं प्रजापतिर
संशयं। प्रजाश्च पालयिष्येऽहमिति ते समयः कृतः। तांस्तथा ब्रुवतः सर्व्वान्महर्षीनब्रवीत्तदा। वेणः प्र
हस्य दुर्बुद्धिरिममर्थमनर्थवित्। वेण उवाच॥ स्रष्टा धर्मस्य कश्चान्यः श्रोतव्यं कस्य वा मया। श्रुतवी-
र्य्यतपःसत्यैर्मया वा कः समो भुवि। प्रभवं सर्व्वभूतानां धर्माणां च विशेषतः। संमूढा न विदुर्नूनं न
वं तोऽमी विचेतसः। इच्छन्दहेयं पृथिवीं प्लावयेयं जलैस्तथा। द्यां भुवं वै निरुन्ध्येयं नात्र कार्य्या विचा
रणा। यदा न शक्यते मोहादवलेपाच्च पार्थिवः। अपनेतुं तदा वेणस्ततः क्रुद्धा महर्षयः। तं निगृह्य म
हात्मानो विस्फुरन्तं महाबलं। ततोऽस्य सव्यमूरुं ते ममन्थुर्जातमन्यवः। तस्मिंस्तु मथ्यमाने वै रा
ज्ञ ऊरौ प्रजज्ञिवान्। ह्रस्वोऽतिमात्रः पुरुषः कृष्णश्चापि बभूव ह। स भीतः प्रांजलिर्भूत्वा तस्थिवान्ज
नमेजय। तमत्रिर्विह्वलं दृष्ट्वा निषीदेत्यब्रवीत्तदा। निषादवंशकर्त्ता स बभूव वदतां वरः। धीवरानसृज
च्चापि वेणकल्मषसंभवान्। ये चान्ये विंध्यनिलयास्तुषारास्तुंबुरास्तथा। अधर्मरुचयस्तात विद्धि ता १२

न्वेणकल्मषान्। ततः पुनर्महात्मानः पाणिं वेणस्य दक्षिणं। अरणीमिव संरब्धा ममन्थुर्जातमन्यवः। पृ
थुस्तस्मात्समुत्पन्नः कराज्ज्वलनसंनिभः। दीप्यमानः स्ववपुषा साक्षादग्निरिव ज्वलन्। आद्यमाजगवं
नाम धनुर्गृह्य महारथः। शरांश्च दिव्यान्रक्षार्थं कवचं च महाप्रभं। तस्मिञ्जाते तु भूतानि संप्रहृष्टानि सर्व
शः। समापेतुर्महाराज वेणश्च त्रिदिवं ययौ। समुत्पन्नेन कौरव्य सत्पुत्रेण महात्मना। त्रातः स पुरुष
व्याघ्र पुन्नाम्नो नरकात्तथा। तं समुद्राश्च नद्यश्च रत्नान्यादाय सर्व्वशः। तोयानि चाभिषेकार्थं सर्व्व एवोप
तस्थिरे। पितामहश्च भगवान्देवैरांगिरसैः सह। स्थावराणि च भूतानि जंगमानि च सर्व्वशः। समागम्य त
दा वैन्यमभ्यषिंचन्नराधिपं। महता राजराज्येन प्रजापालं महाद्युतिं। सोऽभिषिक्तो महातेजा विधिव
द्धर्मकोविदैः। आदिराज्ये तदा राजन्पृथुर्वैन्यः प्रतापवान्। पित्रा परंजितास्तस्य प्रजास्तेनानुरंजिताः।
अनुरागात्ततस्तस्य नाम राजेत्यजायत। आपस्तस्तंभिरे तस्य समुद्रमभियास्यतः। पर्वताश्च ददुर्मा
र्गं ध्वजसंगश्च नाभवत्। अकृष्टपच्या पृथिवी सिध्यंत्यन्नानि चिंतया। सर्व्वकामदुघा गावः पुटके पुटके
मधु। एतस्मिन्नेव काले तु यज्ञे पैतामहे शुभे। सूतः सूत्यां समुत्पन्नः सौत्येऽहनि महामतिः। तस्मिन्नेव

महायज्ञे प्राज्ञो जज्ञेथ मागधः। पृथोः स्तवार्थं तौ तत्र समाहूतौ महर्षिभिः। तावूचुः ऋषयः सर्वे स्तूयतामेष पार्थिवः।
कर्मैतदनुरूपं वां पात्रं चायं नराधिपः। तावूचतुस्तदा सर्वांस्तानृषीन्सूतमागधौ। आवां देवानृषी
श्चैव प्रीणयावः स्वकर्मभिः। न चास्य विद्मवै कर्म न तथा लक्षणं यशः। स्तोत्रं येनास्य कुर्वेव राज्ञस्तेजस्वि
नो द्विजाः। ऋषिभिस्तौ नियुक्तौ तु भविष्यैः स्तूयतामिति। यानि कर्माणि कृतवान्पृथुः पश्चान्महाबलः॥ त
तः प्रभृति लोकेस्मिन्स्तवेषु जनमेजय। आशीर्वादाः प्रयुज्यंते सूतमागधवंदिभिः। तयोः स्तवांते सुप्री
तः सूतमागधवंदिभिः। तयोः स्तवांते सुप्रीतः पृथुः प्रादात्प्रजेश्वरः। अनूपदेशं सूताय मगधं मागधस्य
च। तं दृष्ट्वा परमप्रीताः प्रजाः प्राहुर्महर्षयः। वृत्तीनामेष वो दाता भविष्यति नराधिपः। ततो वैण्यं महारा
जं प्रजाः समभिदुद्रुवुः। त्वन्नो वृत्तिं विधत्स्वेति महर्षिवचनात्तदा। सोभिद्रुतः प्रजाभिस्तु प्रजाहितचि
कीर्षया। धनुर्गृह्य पृषत्कांश्च पृथिवीमार्द्दयद्बली। ततो वैण्यभयात्रस्ता गौर्भूत्वा प्राद्रवन्मही। तां पृथुर्द्ध
नुरादाय द्रवंतीमन्वधावत। सा लोकान्ब्रह्मलोकादीन्गत्वा वैण्यभयात्तदा। प्रददर्शाग्रतो वैण्यं प्रगृ
हीतशरासनं। ज्वलद्भिर्निशितैर्बाणैर्दीप्ततेजसमुद्यमं। महायोगं महात्मानं दुर्द्धर्षममरैरपि। अल १३

भंतीव सा त्राणं वैण्यमेवान्वपद्यत। कृतांजलिपुटा भूत्वा पूज्या लोकैस्त्रिभिस्तथा॥ उवाच वैण्यं नाध
र्म्मं स्त्रीवधं कर्तुमर्हसि। कथं धारयिता वासि प्रजा राजन्मया विना। मयि लोकाः स्थिता राजन्म
यैदं धार्यते जगत्। मद्विनाशे विनश्येयुः प्रजाः पार्थिव विद्धि तत्। न मामर्हसि हंतुं वै श्रेयश्चेत्त्वं
चिकीर्षसि। प्रजानां पृथिवीपाल। शृणु चेदं वचो मम। उपायतः समारब्धाः सर्वे सिद्ध्यंत्युपक्रमाः।
उपायं पश्य येन त्वं धारयेथाः प्रजा इमाः। हत्वापि न समर्थस्त्वं प्रजानां पोषणे नृप। अन्नभूता भवि
ष्यामि यच्छ कोपं महाद्युते। अवध्यां च स्त्रियं प्राहुस्तिर्यग्योनिगतेष्वपि। सत्त्वेषु पृथिवीपाल न ध
र्म्मं त्यक्तुमर्हसि। एवं बहुविधं वाक्यं श्रुत्वा राजा महात्मना। कोपं निगृह्य धर्मात्मा वसुधामिदमब्री
त्॥ ॥इति श्रीहरिवंशे पृथूत्पत्तिः॥ ॥पृथुरुवाच॥ एकस्यार्थाय यो हन्यादात्मनो वा परस्य वा। ब
हून्वा प्राणिनो नङ्क्ष्यं न वत्तस्य च पातकं। सुखमेधंति बहवो यस्मिंस्तु निहते शुभे। तस्मिन्हते धर नास्ति
पातकं नोपपातकं। एकस्मिन्यत्र निधनं प्रापिते दुष्टकारिणि। बहूनां भवति क्षेमं तत्र पुण्यप्रदो व
धः। सोहं प्रजानिमित्तं त्वां हनिष्यामि वसुंधरे। यदि मे वचनं नाद्य करिष्यसि जगद्धितं। त्वां निहत्य

दृष्ट्वा त्वेनमच्छाशनपराङ्मुखी। आत्मानं प्रथयिष्यामि प्रजा धारयता स्वयं। सा वंशासनमास्थाय मम धर्मभृ-
तां वर। संजीवय प्रजाः सर्वाः समर्था ह्यसि पार्थिव। दुहितृत्वं च मे गच्छ ततः एनमहं शरं। नियच्छेयं त्वदर्था-
र्थं समुद्यतं घोरदर्शनं॥ ॥पृथुरुवाच॥ सर्वं मतं दढं वीर विश्वस्यामि न संशयः। वत्सं त्वं मम मच्छैमं यच्छ
क्षरेयं नयवत्सला। समां च कुरु सर्वत्र मां त्वं धर्मभृतां वर। यथा विस्पंदमानं मे क्षीरं सर्वत्र भावयेत्॥
वैशंपायन उवाच॥ ततः उत्सारयामास शैलान् शतसहस्रशः। धनुःकोट्या तदा वैण्यस्तेन शैला विव-
र्द्धिताः॥ पृथुर्वैण्यस्तदा राजा महीं चक्रे समां ततः। मन्वंतरेष्वतीतेषु विषमाऽसीद्वसुंधरा। अस्याः स्वभ-
वादनवन्नमा निविषमाणि च। चाक्षुष्यस्यांतरे पूर्वे मासीदेवं तदा किल। न हि पूर्वविसर्गे वै विषमे पृ-
थिवीतले। भे प्रविभागः पुराणां वा ग्रामाणां च तदाऽभवत्। न सस्यानि न गोरक्षा न कृषिर्न वणिक्प-
थः। नैव सत्यानृतं तात न लोभो न च मत्सराः। वैवस्वतंतरे तस्मिन्साम्प्रतं समुपस्थिते। वैण्यात्प्रभृति-
राजेंद्र सर्वस्यैतस्य संभवः। यत्र यत्र समं त्वस्यान्भूमेरासीत्तराधिप तत्र तत्र प्रजाः सर्वाः निवासं समरो-
चयत। आहारः फलमूलानि प्रजानामभवत्तदा। कृच्छ्रेण महता युक्तमित्येवमनुशुश्रुमः। सकल्पयि- १४

त्वा वत्सं तु मनुं स्वायंभुवं प्रभुं। स्वपाणौ पुरुषव्याघ्र दुदोह पृथिवीं पृथुः। सस्यजातानि सर्वाणि पृथुर्वैण्यः प्र-
तापवान्। तेनान्नेन प्रजास्तात वर्त्तंतेऽद्यापि नित्यशः। ऋषिभिः श्रूयते चापि पुनर्दुग्धा वसुंधरा। वत्सः सो-
मोऽभवत्तेषां दोग्धा चांगिरसः सुतः। बृहस्पतिर्महातेजाः पात्रं छंदांसि भारत। क्षीरमासीदनुपमं तपो
ब्रह्म च शाश्वतं। ततः पुनर्देवगणैः पुरंदरपुरोगमैः। कांचनं पात्रमादाय दुग्धेयं श्रूयते मही। वत्सस्तु म-
घवानासीद्दोग्धा तु सविता प्रभुः। क्षीरमूर्जस्करं चैव येन वर्त्तंति देवताः॥ पितृभिः श्रूयते चापि पुनर्दु-
ग्धा वसुंधरा। राजतं पात्रमादाय स्वधाममितविक्रमैः। यमो वैवस्वतस्तेषामासीद्वत्सः प्रतापवान्। अं-
तकश्चाभवद्दोग्धा कालो लोकप्रकालनः। नागैश्च श्रूयते दुग्धा वत्सं कृत्वा तु तक्षकं। अलाबुं पा-
पात्रमादाय विषं क्षीरं नरोत्तमं। तेषामैरावतो दोग्धा धृतराष्ट्रः प्रतापवान्। नागानां नरश्रेष्ठ सर्प्पा-
णां च महीपते। तेनैव वर्त्तयंत्युग्रा महाकाया महाबलाः। तदाहारास्तदाचारास्तद्वीर्यास्तदाश्रयाः
असुरैः श्रूयते चापि पुनर्दुग्धा वसुंधरा। आयसं पात्रमादाय मायां शत्रुनिबर्हणीं। विरोचनस्तु प्राह्ला-
दिर्वत्सस्तेषामभूत्तदा। ऋत्विग्द्विमूर्द्धा दैत्यानां मधुर्दोग्धा महाबलः। तयैते मायया द्यापि सर्वे मा-

याविदोऽसुरा। वर्त्तयंत्यमिति प्रज्ञा सदेषाममितंबलं। यदैश्च श्रूयते राजन् पुनर्दुग्धा वसुंधरा॥ आमप
त्रे महाराज पुरा तद्दोनमश्रयं। वत्सं वैश्रवणं कृत्वा दोग्धा त्वधनदः प्रभुः। यक्षैः पुन्यजनैश्चैव पुनर्दुग्धा व
सुंधरा। वत्सं वैश्रवणं कृत्वा परमर्षि रूपा वह। दोग्धा रजतनाभस्तु पिता मणिवरस्य यः। यक्षात्मजो मह
तेजा त्रिशीर्षा सुमहातपाः। तेनैव वर्त्तयंत्युग्रा उग्रकर्म परायणाः। राक्षसैश्च पिशाचैश्च पुनर्दुग्धा वसुं
धरा। शावं कपालमादाय प्रजा नाभुं नराधिप। दोग्धा रजतनाभस्तु तेषामासीत् कुरूद्वह। वत्सः सुमाली के
रव्यं क्षीरं रुधिरमेव च। तेन क्षीरेण रक्षांसि यक्षाश्चैवामरोपमाः। वर्त्तयंति पिशाचाश्च भूतसंघास्तथैव च
पद्मपत्रे पुनर्दुग्धा गंधर्वैश्चाप्सरागणैः। वत्सं चित्ररथं कृत्वा शुचीन् गंधान्नरोत्तम। तेषां वसुरुचिस्त्वासी
द्दोग्धा रजतसत्तम। गंधर्वराजोऽतिबलो महात्मा सूर्यसन्निभः। शैलैश्च श्रूयते दुग्धा पुनर्देवी वसुंधरा।
ओषधीर्वै मूर्तिमतीरत्नानि विविधानि च। वत्सस्तु हिमवानासीद्दोग्धा मेरुर्महागिरिः। पात्रं शैलम
वासीत्तेन शैलाः प्रतिष्ठिताः। दुग्धेयं वृक्षवीरुद्भिः श्रूयते च वसुंधरा। पालाशं पात्रमादाय छिन्नदग्धः
प्ररोहणं। दुदोह पुष्पितः शालो वत्सः प्लक्षोऽभवत्तदा। सेयं धात्री च लोकानां पावनी च वसुंधरा। चराच १५

रस्य सर्वस्य प्रतिष्ठा योनिरेव च॥ सर्वकामदुघा दोग्ध्री सर्वसस्यप्ररोहणी। आसीदिति यं समुद्रांता मेदिनी
ति परिश्रुता। मधुकैटभयोः कृत्स्ना मेदसा समभिप्लुता। तेनेयं मेदिनी देवी प्रोच्यते ब्रह्मवादिभिः। तत
ऽभ्युपगमाद्राज्ञः पृथोर्वैण्यस्य भारत। दुहितृत्वमनुप्राप्ता देवी पृथ्वीति चोच्यते। पृथुना प्रविभक्ता च शो
धिता च वसुंधरा। सस्याकरवती स्फीता पुरपत्तनमालिनी। एवं प्रभावो वैण्यः स राजासीद्राजसत्त
मः। नमस्यश्चैव पूज्यश्च भूतग्रामैर्न संशयः। ब्राह्मणैश्च महाभागैर्वेदवेदांगपारगैः। पृथुरेव नमस्का
र्यो ब्रह्मयोनिः सनातनः। पार्थिवैश्च महाभागैः पार्थिवत्वमिहेप्सुभिः। आदिराजो नमस्कार्यः पृथुर्वैण्यः
प्रतापवान्। योधैरपि च विक्रांतैः प्राप्तुं काममभीप्सितं युधि। आदिराजो नमस्कार्यो योधानां प्रथमो नृपः।
यो हि योद्धा रणं याति कीर्तयित्वा पृथुं नृपं। स घोररूपान् संग्रामान् क्षेमी तरति कीर्तिमान्। वैश्यैर
पि च वित्ताढ्यैर्वैश्यवृत्तिमास्थितैः। पृथुरेव नमस्कार्यो वृत्तिदाता महातपाः। तथैव शूद्रैः शुचिभि
स्त्रिवर्णपरिचारिभिः। पृथुरेव नमस्कार्यः श्रेयः परमभीप्सुभिः। एते वत्सविशेषाश्च दोग्धारः क्षीरमेव च।

कै १०

पात्राणि च मयोक्तानि किं भूयो वर्णयामि ते॥ ॥इति खिलेषु हरिवंशे षष्ठोपाख्याने॥ ॥जनमेजय उवाच॥
मन्वंतराणि सर्वाणि विस्तरेण तपोधन। तेषां पूर्वविसृष्टिं च वैशंपायन कीर्तय॥ यावंतो मनवश्चैव या-
वंतं कालमेव च। मन्वंतरमहं ब्रह्मन् श्रोतुमिच्छामि तत्त्वतः॥ ॥वैशंपायन उवाच॥ न शक्यं विस्तरेता-
त वक्तुं वर्षशतैरपि। मन्वंतराणि कौरव्य संक्षेपं चैव मे शृणु। स्वायंभुवो मनुस्तात मनुः स्वारोचिषस्तथा।
उत्तमस्तामसश्चैव रैवतश्चाक्षुषस्तथा। वैवस्वतश्च कौरव्य सांप्रतो मनुरुच्यते। सावर्णश्च मनुस्तात भौ-
त्यो रौच्यस्तथैव च रैवतो ब्रह्मसावर्णि सूर्यसावर्णिरेव च। देवसावर्णिरित्येते मनवः परिकीर्तिताः। अ-
तीता वर्तमानाश्च तथैवानागतान्नृप। कीर्तिता मनवस्तात मयैते ते यथाश्रुति। ऋषींस्तेषां प्रवक्ष्या-
मि पुत्रान् देवगणांस्तथा। मरीचिरत्रिर्भगवानंगिराः पुलहः क्रतुः। पुलस्त्यश्च वसिष्ठश्च सप्तैते ब्रह्मणः
सुताः। उत्तरस्यां दिशि तथा राजन् सप्तर्षयः स्थिताः॥ यामा नाम तथा देवा आसन् स्वायंभुवेंतरे। अग्नीध्र-
श्चाग्निबाहुश्च मेधा मेधातिथिर्वसुः। ज्योतिष्मान् द्युतिमान् हव्यः सवनः पुत्र एव च। मनोः स्वायंभुवस्यै १६

BHAU DAJI MEMORIAL

वदश पुत्रा महौजसः। एतत्ते प्रथमं राजन् मन्वंतरमुदाहृतं। और्वो वसिष्ठपुत्रश्च स्तंबः काश्यप एव च। प्रा-
णो बृहस्पतिश्चैव दत्तो निश्च्यवनस्तथा। एते महर्षयस्तात वायुप्रोक्ता महाव्रताः। देवाश्च तुषिता ना-
म स्मृताः स्वारोचिषेंतरे। हरिघ्नः सुकृतिर्ज्योतिरापो मूर्तिरयस्मयः। प्रथितश्च नभ ऊर्जस्तथैव च। स्वा-
रोचिषस्य पुत्रास्ते मनोस्तात महात्मनः। कीर्तिताः पृथिवीपाल महावीर्यपराक्रमाः॥ द्वितीयमेतत्क-
थितं तव मन्वंतरं मया। इदं तृतीयं वक्ष्यामि तन्निबोध नराधिप। वसिष्ठपुत्राः सप्तासन् वासिष्ठा इति
विश्रुताः। हिरण्यगर्भस्य सुता ऊर्जा जाताः सुतेजसः। ऋषयोऽत्र मया प्रोक्ताः कीर्त्यमानान्निबोध मे। उ-
त्तमस्य महाराज दश पुत्रान्मनोरिमान्। इष ऊर्जस्तनूर्जश्च मधुर्माधव एव च। शुचिः शुक्रः सहश्चै-
व नभस्यो नभ एव च। भानवस्तत्र देवाश्च मन्वंतरमुदाहृतं। मन्वंतरं चतुर्थं ते कथयिष्यामि तच्छृणु।
काव्यः पृथुस्तथैवाग्निर्जह्नुर्धाता च भारत कपीवानकपीवांश्च तत्र पुत्रांश्च वक्ष्यामि तामसस्य
मनोर्नृप। द्युतिस्तपस्यः सुतपास्तपोमूलस्तपोधनः। तपोरतिरकल्माषस्तन्वी धन्वी परंतप। तामसस्य
मनोरेते दश पुत्राः प्रकीर्तिताः। वायुप्रोक्ता महाराज चतुर्थं स्यांतरं मनोः। वेदबाहुर्यदुध्रश्च मुनिर्वे-

दशिरास्तथा।हिरण्यरोमापर्ज्जन्यऊर्द्ध्वबाहुस्वसामजः।सत्यनेत्रस्तथाऽत्रेयएतेसप्तर्षयःपर।देवाश्चमनरजसस्त
थाप्रक्रतयःपरे।रैवताश्चरन्यस्यमनोरंतरमुच्यते।अथपुत्रानिमांस्तस्यनिबोधगदतोमम।धृतिमानव्य
येयुक्तस्तत्वदर्शीनिरुत्सुकः।आरण्यश्चप्रकाशश्च।निर्मोहःसत्यवान्कृती।वैवतस्यमनोःपुत्रपंचमंचत
क्तनरं।षष्ठंतसेप्रवक्ष्यामितन्निबोधनराधिप।भृगुर्नभोविवस्वांश्चसुधामाविरजास्तथा।अतिनामासहि
ष्णुश्चसप्तैतेऽथमर्षयः।चाक्षुषस्यांतरेतातमनोर्देवानिमान्शृणु।आद्याःप्रसूताऋभवःपृथुकाश्चदि
वौकसः।लेखाश्चरनामराजेंद्रपंचदेवगणाःस्मृताः।ऋषेरंगिरसःपुत्रामहात्मानोमहौजसः।नाड्वलेयाः
महाराजदशपुत्राश्चविश्रुताः।ऊरुप्रभृतयोराजन्षष्ठमन्वंतरंस्मृतं।अत्रिर्वसिष्ठोभगवान्कश्य
पश्चमहानृषिः।गौतमोऽथभरद्वाजोविश्वामित्रस्तथैवच।तथैवपुत्रोभगवान्ऋचीकस्यमहात्मनः।स
प्तमोजमदग्निश्चऋषयःसांप्रतंदिवि।साध्यारुद्राश्चविश्वेश्चवसवोमरुतस्तथा।आदित्याश्चाश्विनौ
चापिदेवावैवस्वतस्मृताः।मनोर्वैवस्वतस्यतवर्त्ततेऽसांप्रतेऽन्तरे।राजन्पुत्राश्चपौत्राश्चदिक्षुसर्वासु १७
भारत।मन्वंतरेषुसर्वेषुप्रथिताःसप्तसप्तकाः।लोकधर्मव्यवस्थार्थंलोकसंरक्षणायच।मन्वंतरव्य

तिक्रांतेचत्वारःसप्तकागणाः।कृत्वाकर्मदिवंयांतिब्रह्मलोकमनामयं।ततोऽन्येतपसायुक्ताःस्थानंसत्यस्वयं
त्युत।अतीतावर्त्तमानाश्चक्रमेणैतेनारत।अनागताश्चसप्तैतेस्मृतादिविमहर्षयः।मनोरंतरमासाद्यसाव
र्णस्यवदतोशृणु।रामोव्यासस्तथाऽत्रेयोदीप्तिमंतोबहुश्रुताः।भारद्वाजस्तथाद्रौणिरश्वत्थामामहाद्युतिः
गौतमस्यात्मजश्चैवशरद्वान्नामगौतमिः।कौशिकोगालवश्चैवरुरुःकाश्यपएवच।एतेसप्तमहात्मा
नोभविष्यामुनिसत्तमाः।ब्रह्मणःसदृशाश्चैवधन्याःसप्तर्षयःस्मृताः।अभिजात्यायतपसामंत्रव्याकर
णैस्तथा।ब्रह्मलोकप्रतिष्ठास्तुस्मृताब्रह्मर्षयोऽमलाः।भूतभव्यभवज्ज्ञानंबुध्यावैवस्वयंतपसा
वैप्रासिद्धायस्तंगताःप्रविविच्यकाः।मंत्रव्याकरणाद्यैश्चऐश्वर्यान्सर्वशश्चये।एतान्भावान्विनाञ्ज
चातेश्वकारिचनामच।सप्तैतेसप्तभिश्चैवगुणैःसप्तर्षयस्तथा।दीर्घायुषोमंत्रकृतईश्वरादीर्घचक्षुषः
आद्याःप्रत्यक्षधर्माणोगोत्रप्रावर्त्तकास्तथा।वैप्रवर्त्तयंतितेवर्णानाश्रमांश्चैवसर्वशः।सप्तर्षयोम
हाभागाःसत्यधर्मपरायणाः।तेषांचैवान्वयोत्पन्नाजायंतीहपुनःपुनः।मंत्रब्राह्मणकर्त्तारोधर्मेप्र
सिथिलेतथा।यस्माच्चवरदाःसर्वेपदेष्वपरिस्थिताः।तस्मान्नकालोनवयःप्रमाणमृषिभावने॥

अनागताश्च सप्तैव स्मृता दिवि महर्षयः। तनयान्नृपसावर्णे ये विष्णानु शृणु भारत। वरीवांश्च वरीवांश्च स
मेताधृतिमान्पसः। वरिष्ठ रायो धृष्णुश्च वज्रीसुमतिरेव च। सावर्णस्य मनोः पुत्रा नविष्यादश भारत।
एतेषां कल्पमुत्थाय कीर्त्तनात सुखमेधते। यत्राश्वाप्नोति सुमहद्यायुष्मांश्च भवेत्तथा। अतीतानागता
नांवे महर्षीणां सदा नरः। एतान्युक्तानि कारव्य मयातीतानि भारत। मन्वन्तराणि संक्षेपात् निबोधनागता
निमे। सावर्णिमनवस्तात पंच तांश्च निबोध मे। एको वैवस्वतस्तेषां चत्वारश्च प्रजापतेः। परमेष्ठिसुतास्ता
त मेरुसावर्णतां गताः। दक्षस्यैते हि दौहित्राः प्रियायास्तनया नृप। महतात मसा युक्ता मेरुपृष्ठे महा
तपाः। रुचेः प्रजापतेः पुत्रो रौच्यो नाम मनुः स्मृतः। भूत्यां चोत्पादितो देव्यां भौत्यो नाम रुचेः सुतः। अनागता
श्च सप्तैते कल्पेऽस्मिन्मनवः स्मृताः। तैरियं पृथिवी सर्वा सप्तद्वीपा सपत्तना। यथा प्रदेशमद्यापि सर्वतः
परिपाल्यते। पूर्णं युगसहस्रं वै परिपाल्या नरेश्वरैः। प्रजाभिस्तपसा चैव संहारान्ते च नित्यशः।। ।।इति खि
ले षु हरिवंशे।। ।।जनमेजय उवाच।। मन्वन्तरस्य संख्यानं युगानां च महामते। ब्रह्मणोऽह्नः प्रमाणं च
वक्तुमर्हसि मे द्विज।। ।।वैशंपायन उवाच।। अहोरात्रे विभजते सूर्यो मानुषदैवते। तामुपादाय ग १८

णनां शृणु संख्यामनिंदम। निमेषं पंचदश निःकाष्ठा त्रिंशत्तु ताः कला। त्रिंशत्कला मुहूर्तश्च त्रिंशता तैर्म
नीषिणः। अहोरात्रमिति प्रोक्तश्चंद्रसूर्यगतिर्नृप। रविगतिविशेषेण सर्वं घतषु नित्यशः। विशेषणेन स
र्वेषु अहोरात्रं च नित्यशः। अहोरात्राणां पंचदश पक्ष इत्यभिशब्दितः। पक्षौ द्वौ च स्मृतो मासो द्वौ मासा
ऋतुरुच्यते। ऋतुत्रयमयनमुक्तं अयनं स्यात्तु त्रिभिः। दक्षिणं चोत्तरं चैव संख्यानार्थविशारदः। मा
नेनानेन यो मासः पक्षद्वयसमाहितः। पितॄणां तदहोरात्रमिति कालविदो विदुः। शुक्लपक्षस्त्वहस्ते
षां कृष्णपक्षस्तु शर्वरी। शुक्लपक्षे त्वहः श्राद्धं पितॄणां वर्तते नृप। मानुषेन तु मानेन यो वै संवत्सरः स्मृ
तः। देवानां तदहोरात्रं दिवा चैवोत्तरायणं। दक्षिणायनं स्मृता रात्रिः प्रत्नसर्वार्थकोविदैः। दिव्यमह
दशगुणं त्वहोरात्रं मनोः स्मृतं। अहोरात्रं दशगुणं मनवः पक्ष उच्यते। पक्षो दशगुणो मासो द्वादशनि मासो
गुणो मन्वादिर्न ऋतुर्मन्वन्तानां संप्रोक्ता प्राज्ञैः सर्वार्थदर्शिभिः। चत्वार्यथ सहस्राणि वर्षाणां तु कृतं युगं
तावती च भवेत् संध्या संध्यांशश्च तथापरः। तथा वर्षसहस्राणि त्रेतापरं परिकीर्तितं। तस्यापि द्विशती संध्या
संध्यांशश्चैव तद्विधः। पिता हत्राः। कलिर्वर्षसहस्रं तु संख्यातोऽत्र मनीषिभिः। तस्यापि शतिका संध्या
त्रीणि वर्षसहस्राणि त्रेतास्या परिमाणतः। तस्यापि त्रिशती संध्या संध्यांशः स्यात् तथाविधः
३

संध्यांशश्चैव हि द्विधा॥ एषा द्वादशसाहस्री युगसंख्या प्रकीर्त्तिता॥ दिव्येनानेन मानेन युगसंख्यां निबोध मे॥ कृ
तं त्रेता द्वापरश्च कलिश्चैव चतुर्युगं॥ युगे तदेकसप्तत्या गुणितं नृपसत्तम॥ मन्वंतरमिति प्रोक्तं संख्यानार्थ
विशारदैः॥ अयनं चापि तत्प्रोक्तं ह्युत्तरं चैव दक्षिणं॥ मनुः प्रलीयते यत्र समासे चायने प्रभो॥ ततोऽपरो
मनुः कालमेतावंतं नवत्युत॥ समनीत पुराजेंद्र प्रोक्तः संवत्सरः स वै॥ तदेव चायुतं प्रोक्तं मुनिनातत्त्वदर्शि
ना॥ ब्रह्मणा स्वदहः प्रोक्तं कल्पश्चेति तदुच्यते॥ सहस्रयुगपर्यंता सा निशा प्रोच्यते बुधैः॥ निमज्जत्यप्सु
वै पृथ्वी सशैलद्वीपकानना॥ तस्मिन्युगसहस्रे हि पूर्णे नरवरसत्तम॥ ब्रह्मदिवसपर्य्यंते कल्पान्निःशे
षमुच्यते॥ युगानि सप्ततितानि साग्राणि कथितानि ते॥ कृतत्रेतादियुक्तानि मन्वंतरमुच्यते॥ चतुर्दश ए
ते मनवः॥ कीर्त्तिताः कीर्त्तिवर्द्धनाः॥ वेदेषु सपुराणेषु सर्वे ते प्रभविष्णवः॥ प्रजानां पतयो राजन्धन्यम
थ प्रकीर्त्तिनं॥ मन्वंतरेषु संहाराः संहारांतेषु संभवः॥ न शक्यं मन्वंतराणां च कैर्वर्षशतैरपि॥ विसर्गस्य प्रजा
नां च संहारस्य नारत॥ मन्वंतरेषु संहाराः श्रूयंते भरतर्षभ॥ अशेषास्तत्र तिष्ठंति देवाः सप्तर्षिभिः सहा त
पसा ब्रह्मचर्येण श्रुतेन च समाहिताः॥ पूर्णे युगसहस्रे तु कल्पान्निःशेष उच्यते॥ तत्र भूतानि सर्वाणि १०

ल दग्धान्यादित्यरश्मिभिः॥ ब्रह्माणमग्रतः कृत्वा सहादित्यगणैर्विभुं॥ प्रविशंति सुरश्रेष्ठं हरिं नारायणं प्रभुं
स्रष्टारं सर्वभूतानां॥ कल्पांतेषु पुनः पुनः॥ अव्यक्तः शाश्वतो देवस्तस्य सर्वमिदं जगत्॥ तत्र संवर्त्तनात्रि
स्मन्कल्पे कार्णवे तदा॥ नारायणोदरे निद्रां ब्राह्मं वर्षसहस्रकं॥ तावन्तमेव कालस्य रात्रिरित्यभि
विश्रुता॥ निद्रायोगमनुप्राप्ता यस्यां शेते पितामहः॥ पुनः सिसृक्षया युक्तः स्वयोगविदधमनाः॥ स
व स्मृतिः पुराणेयं तद्धि ज्ञं तद्धि चेष्टितं॥ देवस्थानानि तान्येव केवलं च पिपर्य्ययः॥ ततो दग्धानि भूता
नि सर्वाण्यादित्यरश्मिभिः॥ देवर्षियक्षगंधर्वपिशाचोरगराक्षसाः॥ जायंते च पुनस्तात युगे नरसत्त
म॥ यथा तु ऋतुलिंगानि नानारूपाणि पर्यये॥ दृश्यंते तानि तान्येव तथा ब्राह्मीषु रात्रिषु॥ निष्क्रा
मे नीति विशंतीह प्रजाकारं प्रजापतिं॥ ये देवमानुषाः सर्वे सर्वे चैव महर्षयः॥ ते सर्वे गतसु सिद्धास्त
द्विकारः सर्गानन्तरः॥ संभवंति पुनस्तात युगे नरवरसत्तम॥ ततः सर्वं क्रमयोगेन॥ कालसंख्याविनाग
तो सहस्रयुगसंख्यानं कृत्वा दिवसमीश्वरः॥ रात्रियुगसहस्रांतां कृत्वा च भगवान्विभुः॥ संहृत्य
भूतानि सृजते च पुनः पुनः॥ व्यक्ताव्यक्तो महादेवो हरिर्नारायणः प्रभुः॥ तस्य ते कीर्त्तयिष्यामि मनोर्वै

स्वतस्य च। विसर्गेण नरश्रेष्ठ सांप्रतस्य महाद्युते। हरिवंशप्रसंगेन कथ्यमानं पुरातनं। यत्रोत्पन्नो महात्मा
साहरिर्वृष्णिकुलप्रभुः॥ ॥इति खिलेषु हरिवंशे चतुर्दशो मन्वंतरानुकीर्तनं समाप्तं॥ वैशंपायन उवा
च॥ विवस्वान्कश्यपाज्जज्ञे दाक्षायण्यामरिंदम। तस्य भार्याभवत्संज्ञा त्वाष्ट्री देवी विवस्वतः। सुरेणुरिति
विख्याता त्रिषु लोकेषु भामिनी। सा वै भार्या भगवतो मार्तंडस्य महात्मनः। भर्तुरूपेण नातुष्यद्रूपयौव
नशालिनी। संज्ञा नाम स्वतपसा दीप्तेनेह समन्विता। आदित्यस्य हि तद्रूपं मंडलस्थं सुतेजसः। गात्रेषु
परिदग्धं वै नातिकांतमिवाभवत्। न खल्वयं मृतोंऽडस्थ इति स्नेहाद्दनोपत। अज्ञानात्कश्यपस्तस्मा
न्मार्तंड इति चोच्यते। तेजस्त्वभ्यधिकं तात नित्यमेव विवस्वतः। येनातितापयामास त्रीँल्लोकान्कश्य
पात्मजः। त्रीण्यपत्यानि कौरव्य संज्ञायां तपतां वरः। आदित्यो जनयामास कन्यां द्वौ च प्रजापती। म
नुर्वैवस्वतः पूर्वं श्राद्धदेवः प्रजापतिः। यमश्च यमुना चैव यमलौ संबभूवतुः। श्यामवर्णं तु तद्रूपं दृ
ष्ट्वा संज्ञा विवस्वतः। असहंती तु स्वां छायां सवर्णां निर्ममे ततः। मायामयी तु सा संज्ञा तस्याश्छाया समु
त्थिता। प्रांजलिः प्रणता भूत्वा छाया संज्ञां नरेश्वर। उवाच किं मया कार्यं कथयस्व शुचिस्मिते। स्थितास्मि २०

तव निर्देशे शाधि मां वरवर्णिनि॥ ॥संज्ञोवाच॥ ॥अहं यास्यामि भद्रं ते स्वमेव भवनं पितुः। त्वयेह भवने मह्यं
वस्तव्यं निर्विकारया। इमौ च बालकौ मह्यं कन्या चेयं सुमध्यमा। संभाव्यास्ते न चाख्येयमिदं भगवतस्त्वया।
छायोवाच॥ आकचग्रहणाद्देवि आशापान्नैव कर्हिचित्। आख्यास्यामि मतं तुभ्यं गच्छ देवि यथासुखं
॥वैशंपायन उवाच॥ समाधाय सवर्णां तु तथेत्युक्ता तया च सा। त्वष्टुः समीपमगमद्व्रीडितेव मनस्विनी
पितुः समीपगा सा तु पित्रा निर्भर्त्सिता शुभा। भर्तुः समीपं गच्छेति नियुक्ता च पुनः पुनः। अगच्छद्वडवा भू
त्वाच्छाद्य रूपमनिंदिता। कुरूनथोत्तरान्गत्वा तृणान्यथ च चार ह। द्वितीयायां तु संज्ञायां संज्ञेयमिति चिं
तयन्। आदित्यो जनयामास पुत्रमात्मसमं तदा। पूर्वजस्य मनोस्तात सदृशोऽयमिति प्रभो। मनुरेवा
भवन्नाम्ना सावर्ण इति चोच्यते। द्वितीयायाः सुतस्तस्याः स वै ज्ञेयः शनैश्चरः। छाया तु पृथिवीपाल
स्वस्य पुत्रस्य वै तदा। चकाराभ्यधिकं स्नेहं न तथा पूर्वजेषु वै। मनुस्तत्क्षांतवांस्तस्या यमस्तस्या न चक्ष
मे। तां वै रोषाच्च बाल्याच्च भाविनोऽर्थस्य वा नृप। पदा संतर्जयामास संज्ञां वैवस्वतो यमः। तं शशाप
ततः क्रुद्धा सावर्णेर्जननी तदा। चरणः पततामेष तवेति भृशदुःखिता। यमस्तु तत्पितुः सर्वं प्रांजलिः

सर्व्वं प्रत्यवेक्ष्यता। नृशंसं शापं तनयो ह्रिया। संज्ञा वाक्ये ह्रि विवर्जिता। शापोऽयं विनिवर्त्तेत स प्राह पितरं तदा॥ मा
त्रास्नेहेषु सर्व्वेषु वर्त्तितव्यं सुतेषु वै। सेयमस्मान् अपाहाय कनीयांसं बुभूषति। तस्यां मयोद्यतः पादो न
तु देहे निपातितः। बाल्याद्वा यदि वा मोहात् तद्भवान् क्षंतुमर्हति। शप्तोऽहमस्मिन् लोके जनन्या
तपतां वर। तव प्रसादाच्चरणो न पतेन्मम गोपते॥ ॥विवस्वानुवाच॥ असंशयं महत्पुत्र भविष्यत्यत्र का
रणं। येन त्वामाविशत् क्रोधो धर्मज्ञं सत्यवादिनं। न शक्यते तन्मिथ्या तु कर्तुं मातृवचस्तव। कृमयो
मांसमादाय गमिष्यंति महीतले। तव पादात् महाप्राज्ञ ततः संप्राप्स्यसे सुखं। कृतमेवं वचः सत्यं मातुस्तव
भविष्यति। शापस्य परिहारेण स त्वं त्रातो भविष्यसि। आदित्यस्त्वब्रवीत् संज्ञां किमर्थं तनयेषु वै। तु
ल्येष्वप्यधिकः स्नेहः क्रियते ह त्वयानघे। सा तत्परिहरंती तु नाचचक्षे विवस्वते। तां शप्तुकामो भगवा
न् आत्मनि वक्तुं त्वनंदन। ततः सर्वं यथा वृत्तं चसा चचक्षे विवस्वतः। विवस्वानपि तच्छ्रुत्वा क्रुद्धस्त्वष्टारम
भ्यगात्। त्वष्टा तु तं यथान्यायमर्चयित्वा विभावसुं। निर्द्दग्धुकामं रोषेण सांत्वयामास वै तदा॥ ॥त्व
ष्टोवाच॥ ॥तवातितेजसा विष्टमिदं रूपं न शोभते। असहंती च तत् संज्ञा वने चरति शाड्वले। द्रक्ष्यति हि तां

BHAU DAJI MEMORIAL

२१

भवानद्य स्वां भार्यां शुभचारिणीं। नित्यं तपसि निरतां वडवारूपधारिणीं। पर्णाहारां कृशां दीनां जटिलां
मलधारिणीं। हस्तिहस्तपरिक्लिष्टां व्याकुलां पद्मिनीमिव। श्लाघ्यां योगबलोपेतां योगमास्थाय गोप
ते। अनुकूलं तु ते देव यदि स्यान्मम तन्मतं। रूपं निवर्त्तयाम्यद्य तव कांतमरिंदम। रूपं विवस्वतश्चासीत् ति
र्यगूर्द्ध्वं समं तु वै। तेनासौ संभृता देवा रूपेणाहसितेवि ऽभावसो। तस्मात् त्वष्टुः स वै वाक्यं बहु मेने
प्रजापतिः। समनुज्ञातवांश्चापि त्वष्टारं रूपसिद्धये। ततोऽभ्युपगमात् त्वष्टा मार्तंडस्य विवस्वतः
भ्रमिमारोप्य तत्तेजः शातयामास भारत। ततो निर्भासितं रूपं तेजसा संहतेन वै। कांतात् कांतत
रं द्रष्टुं अधिकं शुशुभे तदा। मुखे निवर्त्तितं रूपं तस्य - देवस्य गोपतेः। ततः प्रभृति देवस्य मुख
मासीत्तु लोहितं। मुखरागं तु यत्पूर्वं मार्तंडस्य मुखच्युतं। आदित्या द्वादशैवेह संभूता मु
खसंभवाः। धाताऽर्यमा च मित्रश्च वरुणोंऽशो भगस्तथा। इंद्रो विवस्वान् पूषा च पर्जन्यो द
शमः स्मृतः। ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः। हर्षं लेभे ततो देवो दृष्ट्वादित्यान् स्वदे
हजान्। गंधैः पुष्पैरलंकारैर्भास्वता मुकुटेन च। एवं संपूजयामास त्वष्टा वाक्यमुवाच ह। गच्छ देव

शस्वां भार्यां उत्तरश्चरति चोत्तरान्। वडवारूपमास्थाय वने चरति शाद्वले। तामश्वरूपमास्थाय
भार्यां केनलीलया। ददर्श योगमास्थाय स्वभार्यां वडवां ततः। अधृष्यां सर्वभूतानां तेजसा
नियमेन तां। वडवां वपुषा राजन् चरन्तीमकुतोभयां। सोऽश्वरूपेण भगवान् तां मुखे समभावयत्
मैथुनाय विचेष्टन्ती परपुंसा विशंकया। सा तन्निरवमच्छुक्रं नासिकायां विवस्वतः। देवौ तस्याम
जायतां अश्विनौ भिषजां वरौ। नासत्यश्च दस्रश्च स्मृतौ द्वावश्विनाविति। मार्तंडस्यात्मजाव
तौ। अष्टमस्य प्रजापतेः। तां तु रूपेण कान्तेन दर्शयामास भास्करः। सा तु दृष्ट्वैव भर्तारं तुतोष
जनमेजय। यमस्तु कर्मणा तेन भृशं पीडितमानसः। धर्मेण रंजयामास धर्मराज इमाः प्रजाः। स लेभे क
र्मणा तेन शुभेन परमद्युतिः। पितॄणामाधिपत्यं च लोकपालत्वमेव च। मनुः प्रजापतिस्त्वासीत् सावर्णि
श्च तपोधनः। भाव्यः सोऽनागते तस्मिन् मनुः सावर्णिकेऽन्तरे। मेरुपृष्ठे तपो नित्यमद्यापि चरते प्रभुः। भ्रा
ता शनैश्चरस्तस्य ग्रहत्वं स तु लब्धवान्। त्वष्टा तु तेजसा तेन विष्णोश्चक्रमकल्पयत्। तदप्रतिहतं युद्धे दा २२
नवानां चिकीर्षया। वीयसी तयोर्या तु यमी कन्या यशस्विनी। अभवत्सा सरिच्छ्रेष्ठा यमुना लोकपावि
य

नी। मनुरित्युच्यते लोके सावर्णिरिति चोच्यते। द्वितीयो यः सुतस्तस्य मनोर्भ्राता शनैश्चरः। ग्रहत्वं स तु लोकेषु
स लोकाभिपूजितः। य इदं जन्म देवानां शृणुयाद्धारयेत वा। आपदं प्राप्य मुच्येत प्राप्नुयाच्च महद्यशः॥ ॥
इति हरिवंशे वैवस्वतोत्पत्तिः॥ ॥वैशंपायन उवाच॥ मनोर्वैवस्वतस्यासन् पुत्रा वै नव तत्समाः। इक्ष्वा
कुश्चैव नाभागो धृष्टः शर्यातिरेव च॥ नरिष्यन्तस्तथा प्रांशुर्नाभागोदिष्टसप्तमः। करूषश्च पृषध्रश्च नवैते
भरतर्षभ। अकरोत्पुत्रकामस्तु मनुरिष्टिं प्रजापतिः। मित्रावरुणयोस्तात पूर्वमेव विशांपते। अनु
त्पन्नेषु कालेन वसुपुत्रेषु तेषु नारत। तस्यां तु वर्तमानायां मिश्रान्नं रतसत्तम। मित्रावरुणयोरंशे मनु
राहुतिमाजुहाव। आहूयमानायां देवगंधर्वमानुषाः। तुष्टिं च परमां जग्मुर्मुनयश्च तपोध
नाः। अहोऽस्य तपसो वीर्यं महोऽस्य तपसो धनं। तत्र दिव्याम्बरधरा दिव्याभरणभूषिताः। दिव्यसंह
नना चैव इडा जज्ञे इति श्रुतिः। तामिलेत्येव होवाच मनुर्दंडधरः स्वयं। अनुगच्छस्व मां भद्रे तामि
डा प्रत्युवाच ह। धर्मयुक्तमिदं वाक्यं पुत्रकामं प्रजापतिं॥ ॥इडोवाच॥ मित्रावरुणयोरंशे जातास्मि
वदतां वर तयोः सकाशं यास्यामि न वां धर्मो हतोऽभवत्। सैवमुक्त्वा मनुं देवं मित्रावरुणयोरिडा। गत्वा

तिकं वरारोहा प्रांजलिर्वाक्यमब्रवीत्। अंशेऽस्मिन्नुवयोर्जाता देवौ किंकरवाणि वां। मनुना चाहमुक्ता
वै अनुगच्छस्व मामिति। तां तथावादिनीं साध्वीमिडां धर्मपरायणां॥ मित्रश्च वरुणश्चोभावूचतुर्यन्नि
बोधनः। अनेन तव धर्मेण प्रश्रयेण दमेन च। सत्येन चैव सुश्रोणि प्रीतौ स्वो वरवर्णिनि। आ
वयोस्त्वं महाभागे ख्यातिं कन्येति यास्यसि। मनोर्वंशकरः पुत्रः स्त्वमेव च भविष्यसि। सुद्युम्नश्च
ऽति ख्यातस्त्रिषु लोकेषु शोभने। जगत्प्रिया धर्मशीला मनोर्वंशविवर्द्धनी॥ निवृत्ता सा तु त-
च्छ्रुत्वा गच्छंती पितुरंतिकं। बुधेनांतरमासाद्य मैथुनायोपपादिता॥ सोमपुत्राद्बुधाद्राजन् तस्यां
जज्ञे पुरूरवाः॥ जनयित्वा ततः सा तमिला सुद्युम्नतां गता। सुद्युम्नस्य तु दायादास्त्रयः परमधा
र्मिकाः॥ उत्कलश्च गयश्चैव विनिताश्वश्च भारत। उत्कलस्योत्कला राजन् विनिताश्वस्य पश्चिमा
दिक्पूर्वा भरतश्रेष्ठ गयस्य तु गया पुरी। प्रविष्टे तु मनौ तस्मिन् दिवाकरमरिंदम। दशधा तत्पु= न
नः क्षत्रमकरोत्पृथिवीमिमां। यूपांकिता पृथिवी तस्येयं सवनाकरा। इक्ष्वाकुर्ज्येष्ठदायादो
मध्यदेशमवाप्नुयात्। कन्याभावाच्च सुद्युम्नो नैतद्गुणमवाप्नुयात्॥ स वसिष्ठवचनाच्चासीत्प्र २३

तिष्ठाने महात्मनः॥ प्रतिष्ठा धर्मराजस्य सुद्युम्नस्य कुरूद्वह। तत्पुरूरवसे प्रादात् राज्यं प्राप्य महा
यशाः। सुद्युम्नः कारयामास प्रतिष्ठाने नृपक्रियां। सुधृष्टश्चांबरीषश्च दंडकश्चेति तत्त्रयः। यश्च
कार महात्मा वै दंडकारण्यमुत्तमं। तत्र प्रविष्टमात्रस्तु नरः पापात्प्रमुच्यते। सुद्युम्नश्च दि
वं यातः षंडमुत्पाद्य भारत। मानवेयो महाराज स्त्रीपुंसोर्लक्षणैर्युतः। स्त्री च रूपमिलेत्य
व सुद्युम्नश्चेति विश्रुतः। नरिष्यन्तः शकाः पुत्रा नाभागस्य तु भारत। अंबरीषोऽभवत्पुत्रः पा=
र्थिवर्षभसत्तमः। धृष्टस्य धार्ष्टकाः पुत्रा रणधृष्टा बभूव ह। शर्यातेर्मिथुनं चासीदानर्तो ना
म विश्रुतः। पुत्रः कन्या सुकन्या च या पत्नी च्यवनस्य च। आनर्तस्य तु दायादो रेवो नाम महा
द्युतिः। आनर्तविषयश्चासीत्पुरी चास्य कुशस्थली। रेवस्य रेवतः पुत्रः ककुद्मी नाम धा
र्मिकः। ज्येष्ठः पुत्रशतस्यासीद्राज्यं प्राप्य कुशस्थलीं। स कन्यासहितः श्रुत्वा गांधर्वं ब्रह्मणोऽन्ति
के। मुहूर्तभूतं देवानां मर्त्ये बहुयुगं प्रभो। आजगाम जवेनाथ तां पुरीं यादवैर्वृतां। ततः सां=
न

द्वारवतीं नाम्ना बहुद्वारां मनोरमां। भोजवृष्ण्यंधकैर्गुप्तां वासुदेवपुरोगमैः। ततस्स रैवतो ज्ञात्वा यथातत्वमरिं
दमा कन्यां तां बलदेवाय सुव्रतां नाम रेवतीं। दत्वा जगाम शिखरं मेरोस्तपसि संस्थितः। रेमे रामोऽपि धर्मा
त्मा रेवत्या सहितः सुखी॥ ॥जनमेजय उवाच॥ कथं बहुयुगे काले समतीते द्विजोत्तम। न जरा रेवतीं प्राप्ता रैव
तं च ककुद्मिनं। मेरुं गतस्य वा तस्य शर्यातेः संततिः कथं। स्थिता पृथिव्यामद्यापि श्रोतुमिच्छामि तत्वतः॥
वैशंपायन उवाच॥ न जरा क्षुत्पिपासा वा न मृत्युर्भरतर्षभ। ऋतुचक्रं प्रभवति ब्रह्मलोके सदानघ। ककु
शाः।यथास्यात्स्यप्तिज्ञावेनसंकल्पःस्वेचिंतितः।ज्ञानध्यानतपःस्तोवेदवेदांगपारगाः।छिद्रदर्शीस
नेत्रश्चतथावाभ्रव्यवत्समयाः।जातोत्रश्रोत्रियदायादोवेदवेदांगपारगाः।सरवायाब्रह्मदत्तस्यपूर्वजाति
सहापिता।पंचालःपंचिकस्तत्रकेंडरीकस्तथापरः।पांचालोवह्वृचस्त्वासीदाचार्यत्वंचकारह।द्विवेदः
कंडरीकस्तुछंदोगोध्वर्युरेवचसर्वसःचकृतश्चराजासीदणुहात्मजः।पांचालकंडरीकाभ्यांतस्यमं
विदमृत्सुरा।तेप्याय्येधर्मेनिरताःकामत्रयपवशावर्जिताः।पूर्वजातिकृतेनासन्धर्म्मकामार्थकोविदाः
अणुहस्यनृपश्रेष्ठब्रह्मदत्तमकल्मषं।अभिषिच्यतदाराज्येपरांगतिमवाप्सवान्।ब्रह्मदत्तस्यनार्य्या
त्रदेवलस्यात्मजानवत।असितस्यहिकृद्देपीसंनतिर्नाममनामता।तामकनावसंपन्नांलेनकन्या
मनुत्तमं।सन्नितिसन्नतिमतीदेवलात्रयोगधर्म्मिणी।त्रोषास्कचक्रवाकाचकांपिल्यसहचारिणः।प्र

जाताःश्रोतियकुलेसुदरिद्रेमहाजनि।धृतिमान्सुमना।विद्वान्तत्त्वदर्शीचनामतः।वेदाध्ययनसंपन्नाःश्रुत्वा
रश्छिद्रदर्शिनः।तेषांसेविदथोत्पन्नाःसर्वेजातिस्मरातदा।तेयोगनिरताःसर्वेप्रस्थिताज्ञानयोगिनः।आमं
त्र्यपितरंतातपितातानब्रवीत्तदा।अधर्मएवयुष्माकंयन्मांत्यक्त्वागमिष्यथ।दारिद्र्यमनपाकृत्यपुत्राणां
नैवयुद्धकल्पनम्।शुश्रूषामप्रयुज्याथकथंवैगंतुमर्हथ।ततस्तेचुर्द्विजाःसर्वेपितरंपुनरेवहि।रिप्यामोविभ
नंतेयेनत्वंवर्तयिष्यसि।इमंश्लोकंमहार्थंवैत्वंराजानेमहमंत्रिणे।श्रावयेथाःसमागम्यब्रह्मदत्तमकल्म
षं।सतेदास्यतिप्रीतात्मा।ग्रामान्नानागांश्चपुष्कलान्।कामानन्नीप्सितान्सर्वान्गच्छतातयथेप्सितं।एताव
दुक्त्वातेसर्वेपूजयित्वाचतंगुरुं।योगधर्ममनुप्राप्यपरांनिर्वृत्तिमाययुः॥ ॥इतिश्रीखिलेषुहरिवंशेपि-
तृकल्पे॥ ॥ब्रह्मदत्तस्यदायादःसवेन्नाजस्त्वजायत।योगात्मातपसायुक्तोविष्वक्सेनइतिश्रुतः।कदा
चिद्ब्रह्मदत्तस्तुनार्ययासहितोवने।विजहारप्रहृष्टात्मायथात्रीच्याशतक्रतुः।ततःपिपीलिकरुतंसशु
श्रावनराधिपः।कामिनींकामिनस्तस्ययाचतःक्रोशतोभृशं।क्रुद्धांतयाच्यमानांतांक्रुद्धांसूक्ष्मांपिपीलि
कां।ब्रह्मदत्तोमहाहासमकस्मादेवचाहसत्।ततःसासेनतिर्हीनाव्रीडितेवतदाऽनवैवा।निराहारावव्र ४८
तिथंवत्स्वरवर्णिनी।उत्साद्यमानानत्रेसातमुवाचसुविस्मिता।त्वयाचसहिताराजन्नाहंजीवितुमुत्स

हे।सवकारणमाचक्ष्वानवसाम्यहमद्यतिचा।उवाचचैनंकुपितानैवमायोऽसिपार्थिव।कोवैपिपीलिकारु
तंमानुषोवेत्तुमर्हति।ऋतेदेवप्रसादाद्वैसर्वजातिस्मरेणवै।तपोबलेनवैराजन्विद्ययावानराधिपय
द्येवतेप्रभावस्तुसर्वंसवरुतज्ञता।यथाहमनुज्ञानीयांतथात्वंप्रत्याययस्वमां।प्राणान्हंपरित्यक्ष्येराजन्
नसत्यंतेब्रवीमि।तत्तस्यावचनंश्रुत्वामहिष्याःपरुषंनृपः।सतदापरमापन्नोदेवश्रेष्ठंप्रपद्यत।शरणंसर्व
भूतेशं।नत्वानारायणंविभुं।समाहितोनिराहारःषड्रात्रेणमहायशाः।ददर्शदर्शनेराजादेवंनारा
यणंविभुं।उवाचचैनंभगवान्सर्वभूतानुकंपकः।ब्रह्मदत्तप्रभातेवैकल्याणंसमवाप्स्यसि।इत्युक्त्वा
भगवान्देवस्तत्रैवांतरधीयत।चत्वारोऽत्रपितायोऽसौब्राह्मणानांमहात्मनां।श्लोकंसोऽधीत्यपुत्रे
भ्यः।कृतकृत्यइवाभवत्सराजानमथागच्छन्सहमंत्रपुरस्कृतं।नददर्शान्तरंकिंचित्श्लोकंश्रावयि
तुंतदा।अथराजाशिरःस्नातोलब्धानारायणाद्वरं।प्रविवेशपुरींप्रीतोरथमारुह्यकांचनं।तस्यरश्मी
न्धारगद्धत्कंडरीकोद्विजर्षभः।चामरव्यजनंवापिवाभ्रव्यःसमवाक्षिपत्।इदमंतरमित्येवंततः
सब्राह्मणसत्तमः।श्रावयामाससराजानंश्लोकंतंसचिवोत्तमः।सप्तव्याधादशारण्येमृगाःकालिंजरेगि

रो। चक्रवाकाः सरद्वीपे हंसाः सरसि मानसे। तेऽपि कुरुक्षेत्रे ब्राह्मणा वेदपारगाः॥ प्रस्थिता दीर्घमध्वानं स्व
यं ते स्मा ऽवसीदथ। तच्छ्रुत्वा मोहमगमद्ब्रह्मदत्तः सदानघ। सचिवश्चास्य पांचालः कंडरीकश्च भारत
अथ स्वरत्रिमपत्नी देवी पतितव्यजना बुनी। दृष्ट्वा वनं व्रजस्वच्छाः पौराश्च सुहृदश्च हा। मुहूर्त्तादेव राजा स स
हता स्यां रथस्थिताः। प्रतिलभ्य ततः संज्ञां प्रत्यागच्छदरिंदमः। ततस्तेन स्मरः स्मृत्वा योगं तमुपलभ्य चात्र
ह्मणं विपुले नागरथे श्रुस्समया जता। अभिषिच्य स्वराज्ये तु विष्वक्सेनमरिंदम। जगाम ब्रह्मदत्तोऽथो
सदारो वनमेव वा। अथ दं संनतिद्दीना देवलस्यात्मजा तदा। उवाच परमप्रीता योगाद्धनगतं नृपं। जानं
त्या त्वं महाराज पिपीलिकरुतज्ञतां। वादितः क्रोधमुद्दिश्य प्रसक्तः कामेषु वै मया। इता वयं वयं गमिष्या
मो। गतिं इष्टां अनुत्तमां। तव चांतर्हिता योगस्ततः संस्मारितो मया। स राजा परमः प्रीतः पत्न्याः श्रुत्वा व
चस्तदा। प्राप्य योगं वनादेव गतिं प्राप सुदुर्लभां। कंडरीकोऽपि योगात्मा सांख्ययोगमनुत्तमं। प्राप्य यो
ग गतिं सिद्धां विशुद्धः स्वेन कर्मणा। क्रमं प्रणीय पांचाल्यः शिष्यामुत्पाद्य वीर्यवान्। योगाचार्य्यगतिं प्र
सा यत्राश्चाग्र्ये महातपाः॥ एवमेतत्पुरा हस्ते मम वृत्तं ह्रमं श्रुतां तद्धारयस्व गांगेषु युश्रेयसा युज्य सततं॥ ४९

यचाप्यधारयिष्यं तितपां च रितमुत्तमं। तिर्यग्योनिषु तेजा तु न न विष्यंतिका हि चित्ताश्च वैवतदुपाख्यानं मह
र्थं महतीं गतिं। योगधर्म्मः सदा तस्य हृदि वर्त्तेन भारत। स तेनैवानुबंधेन कदाचिल्लप्स्यते परमां ततो योगगति
याति सिद्धानामपि दुर्ल्लभां॥ ॥ वैशंपायन उवाच॥ एवमेतत्पुरा गीतं मार्कंडेयेन धीमता। श्राद्धस्य फलमु
द्दिश्य सोमस्याप्यायनाय वै। सोमो हि भगवान्देवो लोकस्याप्यायनं परं। वृष्णिवंशप्रसंगेन नृपवंशो निबो
धत॥ ॥इति श्रीहरिवंशे पितृकल्पः समाप्तः॥ ॥वैशंपायन उवाच॥ पिता सोमस्य वै राजन्जज्ञेऽत्रिर्भग
वानृषिः ब्राह्मणो मानसात्सर्वप्रजासर्गविधित्सतः। तत्राचिन्त्यं लोकानां तस्थौ स्वतनयैर्वृतः। कर्म
णा मनसा वाचा शुभान्येव चचार सः। अहिंस्रः सर्वभूतानां धर्म्मात्मा संशितव्रतः। काष्ठकुड्यशिलीभू
त ऊर्ध्वबाहुर्म्महाद्युतिः। अनुत्तरं नाम तपो येन तप्तं महत्पुरा। त्रीणि वर्षसहस्राणि दिव्यानीति हि नः
श्रुतं। तत्रो ऊर्ध्वमरेतसस्तस्य। स्थितस्यानिमिषस्य च। सोमत्वं तनुरापेदे महामत्रस्य भारत। ऊर्ध्वमाचक्रमे तस्य
सोमत्वं भावितात्मनः। नेत्राभ्यां वारि सुस्राव दशधा द्योतयन्दिशः। तं गर्भं दशधा दृष्टा दशदेव्या दधुस्त
तः। समेत्य धारयामासुर्न्नैव ताः समशक्नुवन्। स ताभ्यः सहसैवाथ दिग्भ्यो गर्भः प्रभान्वितः। पपात भास

९० यंलोकानूशीतांशुः सर्व्वभावनः। यदा न धारणे शक्ताः स्थागर्भस्य दिशो दश। ततस्ताभिः सहैवाथ निपपात वसुं-
धरां। पतितं समभालोक्य ब्रह्मा लोकपितामहः। रथमारोपयामास लोकानां हितकाम्यया। स हि देवमयस्ता-
५० तथ धर्म्मात्मा सत्यसंगरः। युक्तो वाजिसहस्रेण सितेनेति हि नः श्रुतं। तस्मिन्निपतिते देवाः पुत्रे सोमे महात्मनि
तुष्टुवुर्ब्रह्मणः पुत्रा मानसायेऽत्र विश्रुताः। तथैवांगिरसः पुत्रा भृगुरेवात्मजैः सह। ऋग्भिर्यजुर्भिः सामभिरथर्व्वां-
गिरसैरपि। तस्य संस्तूयमानस्य तेजः सोमस्य भास्वतः। आप्यायमानं लोकांस्त्रीन्भावयामास सर्व्वतः। स तेन
रथमुख्येन सागरांतां वसुंधरां। त्रिःसप्तकृत्वोऽतियशाश्चकाराभिप्रदक्षिणां। तस्य यच्च्यावितं तेजः पृथिवीप-
त्यपद्यत। ओषध्यास्ताः समुत्पन्नास्तेजसा प्रज्वलंत्युत। ताभिर्धार्यास्त्रयो लोकाः प्रजाश्चैव चतुर्विधाः। पष्टा
हि भगवान्सोमो जगतो जगतीपते। स लब्धतेजा भगवान्संस्तवैस्तैश्च कर्म्मभिः। तपस्तेपे महाभागः पद्मा-
नां दशनीर्दश। हिरण्यवर्णा या देव्यो धारयंत्यात्मना जगत्। बुद्धिस्तासां भवत्सोमः प्रख्यातः स्वेन कर्म्मणा। ततस्त-
स्मै ददौ राज्यं ब्रह्मा ब्रह्मविदां वरः। बीजौषधीनां विप्राणामपां च जनमेजय। सोऽभिषिक्तो महातेजा राजरा-
ज्येन राजराट्। त्रीन्लोकान्भावयामास स्वभासा भास्वतां वरः। सप्तविंशतिमिंदोस्तु दाक्षायण्यो महाव्रता। द- ५९

दौ प्राचेतसो दक्षो नक्षत्राणीति या विदुः। स तत्प्राप्य महद्राज्यं सोमः सोम्यवतां वरः। समाजह्रे राजसूयं सहस्रस-
तिदक्षिणं। होतास्य भगवानत्रिरध्वर्युर्भगवान्भृगुः। हिरण्यगर्भश्चोद्गाता ब्रह्मा ब्रह्मत्वमेयिवान्। सदस्य-
स्तत्र भगवान्हरिर्नारायणः प्रभुः। सनत्कुमारप्रमुखैरीद्यैर्ब्रह्मर्षिभिर्वृतः। दक्षिणामददत्सोमस्त्रीन्
लोकानिति नः श्रुतं। तेभ्यो ब्रह्मर्षिमुख्येभ्यः सदस्येभ्यश्च भारत। सिनीवाली कुहूश्चैव द्युतिः पुष्टिः प्रवेना
वसुः। कीर्तिर्धृतिश्च लक्ष्मीश्च नव देव्यः सिषेविरे। प्राप्यावभृथमव्यग्रः सर्व्वदेवर्षिपूजितः। विरराजातिराजें-
द्रो दशधा भावयन्दिशः। तस्य तत्प्राप्य दुष्प्रापमैश्वर्यमृषिसंस्कृतं। विबभ्राम मतिस्तस्य विनयादपन-
याहृता। बृहस्पतेः स वै भार्यां तारां नाम यशस्विनीं। जहार तरसा सोमो ह्यवमत्यांगिरसः सुतं। स याच्यमा-
नो देवैश्च तदा देवर्षिभिः सह। नैव व्यसर्जयत्तारां तस्मिन्नांगिरसे तदा। स संरब्धस्तदा तस्मिन्देवाचार्य्यो
बृहस्पतिः। उशना तस्य जग्राह पार्ष्णिमंगिरसस्तदा। स हि शिष्यो महातेजाः पितुः सर्व्वो बृहस्पतेः। तेन स्ने-
हेन भगवान्रुद्रस्तस्य बृहस्पतेः। पार्ष्णिग्राहोऽभवद्देवो गृहीत्वाऽजगवं धनुः। तेन ब्रह्मशिरो नाम परमा-
स्त्रं महात्मना। उद्दिश्य देवानुत्सृष्टं येनैषां नाशितं यशः। तत्र तद्युद्धमभवत्प्रख्यातं तारकामयं। देवानां

दानवानां च लोकक्षयकरं महत्॥ तत्र शिष्टास्तथैवे देवास्तुषिताश्चैव भारत। ब्रह्माणं शरणं जग्मुरादिदेवं स
नातनं। ततो निवार्योशनसं तं वै रुद्रं च शंकरं। ददावंगिरसे तारां स्वयमेव पितामहः। तामंतःप्रसवां दृ
ष्ट्वा तारां प्राह बृहस्पतिः। मदीयायां न ते योनौ गर्भो धार्यः कथंचन। अयोनावुत्सृजत्तं वै कुमारं दस्यु
हंतमं। इषीकास्तंबमासाद्य ज्वलंतमिव पावकं। जातमात्रः स भगवान् देवानामाक्षिपद्वपुः। ततः संशय
मापन्नास्तारामूचुः सुरोत्तमाः॥ सत्यं ब्रूहि सुतः कस्य सोमस्याथ बृहस्पतेः। ह्रीयमाना यदा देवैर्नाह सा
सा साध्वसाधु वा। तदा तां शप्तुमारब्धः कुमारो दस्युहंतमः। तं निवार्य ततो ब्रह्मा तारां पप्रच्छ संशयं। य
दत्र तथ्यं तद्ब्रूहि तारे कस्य सुतो ह्ययं। सा प्रांजलिरुवाचेदं ब्रह्माणं वरदं प्रभुं। सोमस्येति महात्मानं कु
मारं दस्युहंतमं। तं मूर्ध्न्युपाघ्राय तदा सोमो धाता प्रजापतिः। बुध इत्यकरोन्नाम तस्य पुत्रस्य धीमतः। प्रतिकू
लं च गगने समभ्युत्तिष्ठते बुधः। उत्पादयामास तदा पुत्रं वै राजपुत्रिका। तस्यापत्यं महातेजा बभूवैलः पुरू
रवाः। उर्वश्यां जज्ञिरे यस्य सप्त पुत्रा महात्मनः। प्रसह्य धर्षितस्तत्र सोमो वै राजयक्ष्मणा। ततो यक्ष्माभि ५१
भूतस्तु सोमः प्रक्षीणमंडलः। जगाम शरणार्थाय पितरं चात्रिमेव च। तस्य तत्पापशमनं चकारात्रिर्मह

यशाः। स राजयक्ष्मणा मुक्तः श्रिया जज्वाल सर्वशः। एतत्सोमस्य ते जन्म कीर्तितं कीर्तिवर्द्धनं। वंशमस्य म
हाराज कीर्त्यमानमतः शृणु। धन्यमायुष्यमारोग्यं पुण्यं संकल्पसाधकं। सोमस्य जन्म श्रुत्वैव पापेभ्यो
ऽपि प्रमुच्यते॥ ॥ इति खिले पुहरिवंशे सोमोत्पत्तिः॥ ॥ वैशंपायन उवाच॥ बुधस्य तु महाराज विद्वान्
पुत्रः पुरूरवाः। तेजस्वी दानशीलश्च यज्वा विपुलदक्षिणः। ब्रह्मवादी पराक्रांतः शत्रुभिर्युधि दुर्जयः
आहर्ता चाग्निहोत्रस्य यज्वा नो च महीपतिः। सत्यवादी पुण्यमतिः सम्यक्संवृतमैथुनः। अतीव त्रिषु
लोकेषु यशसाऽप्रतिमस्तदा। तं ब्रह्मवादिनं क्षांतं धर्मज्ञं सत्यवादिनं। उर्वशी वरयामास हित्वा मानं
यशस्विनी। तया सहावसद्राजा दश वर्षाणि पंच च। पंच षट् सप्त चाष्टौ च दश चाष्टौ च भारत। नव चैत्र
रथे रम्ये तथा मंदाकिनीतटे। अलकायां विशालायां नंदने च वनोत्तमे। उत्तरान्स कुरून् प्राप्य मनोरथ
फलद्रुमान्। गंधमादनपादेषु मेरुशृंगे तथोत्तरे। एतेषु वनमुख्येषु सुरैराचरितेषु च। उर्वश्या सहि
तो राजा रेमे परमया मुदा। देशे पुण्यतमे चैव महर्षिभिरभिष्टुते। राज्यं स कारयामास प्रयागे पृथिवीप
तिः। तस्य पुत्रा बभूवुस्ते सप्त देवसुतोपमाः। दिवि जाता महात्मानः आयुर्धीमानमावसुः। विश्वायुश्च

वधर्म्मात्मा श्रुतायुश्च तथा परः। दृढायुश्च वनायुश्च शतायुश्चोर्वशीसुताः॥ ॥जनमेजय उवाच॥ गंधर्वी उ
र्वशी देवी राजानं मानुषं कथं। देवानुत्सृज्य संप्राप्ता तन्मे ब्रूहि बहुश्रुत॥ ॥वैशंपायन उवाच॥ ब्रह्मशा
पाभिभूता सा मानुषं समुपस्थिता। ऐलं तु सा वरारोहा समयात्समुपस्थिता। आत्मनः शापमोक्षार्थं स
मयं सा चकार ह। अनग्नदर्शनं चैव अकामाया अश्व मैथुनं। द्वौ मेषौ शयनाभ्यासे सदा बद्धौ च तिष्ठतः। घृत
मात्रं तथाहारः कालमेकं तु पार्थिव। यद्येष समयो राजन् यावत्कालं च ते दृढः। तावत्कालं तु वत्स्या
मि ह्लतः समय एष नः। तस्यास्तं समयं सर्व्वं स राजा समपालयत्। उर्वशी वसतत्र पुरूरवसि भाविनी
वर्षाण्येकानषष्टिं तु तद्भक्त्या शापमोहिता। उर्वशी मानुषस्थायां गंधर्वाश्चिंतयान्विताः॥ ॥गंधर्वा
ऊचुः॥ चिंतयध्वं महाभागा यथा सा तु वरांगना। समागच्छेत्पुनर्देवानुर्वशी स्वर्गभूषणा। ततो विश्वाव
सुर्नाम तत्राह वदतां वरः। मया तु समयस्तस्याः क्रियमाणः श्रुतः पुरा। व्युत्क्रांतसमयं सा वै राजानं त्य
क्षति यथा। तदहं वेद्मि तत्रोपायं यथा त्यक्ष्यति सा नृपं। ससहायो गमिष्यामि युष्माकं कार्यसिद्धये। एवमु ५२
क्त्वा गतस्तत्र प्रतिष्ठानं महायशाः। निशायामथ वागम्य मेषमेकं जहार सः। मातृवद्वर्त्तते सा तु मेषयोश्चारु

हासिनी। गंधर्वागमनं श्रुत्वा शय्यापांतं च यशस्विनी। राजानमब्रवीत्तत्र पुत्रो मे ह्रियते ति सा। एवमुक्त्वा विनि
श्चित्य नग्नो न विवादतिष्ठत। नग्नं मां द्रक्ष्यते देवी समयो मे वितथो भवेत्। ततो भूयस्तु गंधर्वा द्वितीयं मेषमा
दधुः। द्वितीये तु हृते मेषे ऐलं देव्यब्रवीदिदं। पुत्रो मेऽपहृतो राजन्। अनाथाया इव प्रभो। एवमुक्तस्तदो
त्थाय नग्नो राजा प्रधावति। मेषयोः पदमन्विष्यन् गंधर्वैर्विद्युदुत्पादिता तु महती यथा तद्भव
नं महत्। प्रकाशितं वै सहसा ततो नग्नमवेक्षत। नग्नं दृष्ट्वा तिरोभूत्वा साप्सराः कामचारिणी। तिरोभू
तां तु तां दृष्ट्वा गंधर्वाः स्वर्गमन्वितं। उत्सृष्टा वारणा दृष्ट्वा राजा गृहागतो गृहं। अपश्यन्नुर्वशी तत्र वि
लल्लाप सुदुःखितः। चचार पृथिवीं चापि मार्गमाणस्ततस्ततः। अथापश्यत्स वै राजा कुरुक्षेत्रे महा
बलः। प्लक्षतीर्थे पुष्करिण्यां हैमवत्यां समाप्लुतां। क्रीडंतीमप्सरोभिश्च पंचभिः सुदर्शनां। तां क्रीड
तीं ततो दृष्ट्वा विललाप सुदुःखितः। स चापि तं च तं दृष्ट्वा राजानमविदूरतः। उर्वशी ताः सखीः प्राह सो
ऽयं पुरुषोत्तमः। यस्मिन्नहमवात्सं वै दर्शयामास तं नृपं। समाविग्नाः स्थिताः सर्वाः पुनरेव नराधिप। जाये
हे तिष्ठ मनसि घोरे वचसि तिष्ठ। एवमाद्यानि सूक्तानि परस्परमनाषत। उर्वशी चाब्रवीदैलं सगर्भाहं त्व

MEMORIAL

याश्चतो॥ संवत्सरात्कुमारास्ते भविष्यंति न संशयः॥ निशामेकां च नृपते निवत्स्यसि मया सह॥ हृष्टो राजा जगा
माथ स्वपुरं तु महायशाः॥ गते संवत्सरे भूय उर्वशी पुनरागता॥ उषितस्तु तया सार्द्धमेकरात्रं महायशाः॥
उर्वश्यथाब्रवीदैलं। गंधर्वा वरदास्तव॥ तान्वृणीष्व महाराज ब्रूहि चैतान्त्वमेव हि॥ त्वामाह राजा स्ना
तो कं गंधर्वाणां महात्मनां॥ तथेत्युक्तो वरं वव्रे गंधर्वाश्च तथास्त्विति॥ पूरयित्वासिना स्थालीं गंधर्वा
स्तमथाब्रुवन्॥ अनेनेष्ट्वा स लोकांस्त्वं प्राप्स्यसि त्वं नराधिप॥ तानादाय कुमारांश्च गमनायोपचक्र
मे॥ निक्षिप्याग्निमरण्ये तु स पुनः स्वगृहं ययौ॥ आनेष्याम्यग्निं तु नापश्यदश्वत्थं तत्र दृष्ट्वान्॥ शमीगर्भं
तु तं दृष्ट्वा अश्वत्थं विस्मितस्ततः॥ गंधर्वेभ्यस्तदाशंसदग्निनाशं ततः क्रमः॥ श्रुत्वार्थमखिलमरणीं
तु समादिशत्॥ अश्वत्थादरणीं कृत्वा मथित्वाग्निं यथाविधि॥ मथितोऽग्निस्त्रिधा कृत्वा अयजत्स न
राधिपः॥ इष्ट्वा यज्ञैर्बहुविधैर्गतस्तेषां सलोकतां॥ गंधर्वेभ्यो वरं लब्ध्वा त्रेताग्निं समकल्पयत्॥ एकोऽग्निः पू
र्वमेवासीदैलस्त्रेतामकारयत्॥ एवंप्रभावो राजासीदैलस्तु नरसत्तमः॥ देशे पुण्यतमे चैव महर्षिभिरभि
ष्टुते॥ राज्यं स कारयामास प्रयागे पृथिवीपतिः॥ उत्तरे जाह्नवीतीरे प्रतिष्ठाने महायशाः॥ ॥इति श्रीह ५३

मो॰ १

रिवंशे पर्वे ऐलोत्पत्तिः॥ ॥वैशंपायन उवाच॥ ऐलपुत्रा बभूवुस्ते सप्त देवसुतोपमाः॥ दिवि जाता महात्मा
नः आयुर्धीमानमावसुः॥ विश्वायुश्चैव धर्मात्मा श्रुतायुश्च तथापरः॥ दृढायुश्च वनायुश्च शतायुश्चोर्व
शीसुताः॥ अमावसोस्तु दायादो भीमो राजाथ राजराट्॥ श्रीमान्भीमस्य दायादो राजासीत्कांचनप्रभुः॥ वि
द्वांस्तु कांचनस्यापि सुहोत्रोऽभून्महाबलः॥ सुहोत्रस्याभवज्जह्नुः॥ केशिन्या गर्भसंभवः॥ आजह्ने यो महा
सत्रं सर्पमेधं महामखं॥ पतिलोभेन यं गंगा पतित्वेनाभिसस्रे ह॥ नेच्छतः प्लावयामास तस्य गंगा च तत्स
दः॥ स तया प्लावितं दृष्ट्वा यज्ञवाटं समंततः॥ सौहोत्रिरशपद्गंगां क्रुद्धो भरतसत्तम॥ एष ते विपुलो विमु
क्षिप्यापः पिबाम्यहं॥ अस्य गंगेऽवलेपस्य सद्यः फलमवाप्नुहि॥ राजर्षिणा ततः पीतां गंगां दृष्ट्वा महर्षयः॥
उपनिन्युर्महाभागां दुहितृत्वेन जाह्नवीं॥ युवनाश्वस्य पुत्री तु कावेरी जह्नुरावहत्॥ युवनाश्वस्य शाप
ने गंगार्द्धेन विनिर्ममे॥ कावेरी सरितां श्रेष्ठां जह्नोर्भार्यामनिंदितां॥ जह्नुस्तु दयितं पुत्रं सुनहं नाम धा
र्मिकं॥ कावेर्यां जनयामास अजकस्तस्य चात्मजः॥ अजकस्य तु दायादो बलाकाश्वो महीपतिः॥ बभू
व मृगयाशीलः कुशस्तस्यात्मजोऽभवत्॥ कुशपुत्रा बभूवुश्च चत्वारो देववर्चसः॥ कुशिकः कुशनाभश्च ३

शवामूर्त्तिमांस्तथा। पल्लवैः सह संदृष्टो राजा वनचरैस्सदा। कुशिकस्तु तपस्तेपे पुत्रमिंद्रसमं प्रभुं। लब्धेनयमि
ति तं शक्रस्त्रासादभ्येत्य जज्ञिवान्। पूर्णे वर्षसहस्रे वै तं तु शक्रो ह्यपश्यत। अत्युग्रतपसं दृष्ट्वा सहस्रा
क्षः पुरंदरः। समर्थः पुत्रजनने स्वयमेवान्ववासत। पुत्रत्वं कल्पयामास स देवेंद्रः सुरोत्तमः। स गाधिरभव
द्राजा मघवा कौशिकः स्वयं। पौरुकुत्स्यभवद्भार्या गाधिस्तस्यामजायत। गाधेः कन्या महाभागा नाम्ना स
त्यवती शुभा। तां गाधिः काव्यपुत्राय ऋचीकाय ददौ प्रभुः। तस्याः प्रीतः स भर्ता वै भार्गवो भृगुनंदनः। पु
त्रार्थं कल्पयामास चरुं गाधेस्तथैव च। उवाचाहूय तां भर्ता ऋचीको भार्गवस्तदा। उपयोज्यश्चरुरयं
त्वया मात्रा त्वयं तव। तस्यां जनिष्यते पुत्रो दीप्तिमान् क्षत्रियर्षभः। अजेयः क्षत्रियैर्लोके क्षत्रियर्षभ
सूदनः। तपस्विनिरतो नित्यं अरण्ये प्रविवेश ह। गाधिः सदारस्तु तदा ऋचीकाश्रममभ्यगात्। तीर्थया
त्राप्रसंगेन सुतां द्रष्टुं नरेश्वरः। चरुद्वयं गृहीत्वा तु ऋषेः सत्यवती तदा। चरुमादाय यत्नेन सा तु मात्रे न्यवे
दयत्। माता मत्यस्य दैवेन दुहित्रे स्वं चरुं ददौ। तस्याश्चरुमथाज्ञानादात्मसंस्थं चकार ह। अथ सत्यव ५४
ती गर्भं क्षत्रियान्तकरं तदा। धारयामास दीप्तेन वपुषा घोरदर्शनं। तां ऋचीकस्ततो दृष्ट्वा योगेनाभ्यनुसृ

त्य चातामब्रवीद्द्विजश्रेष्ठः स्वनार्यां वरवर्णिनीं। मात्रासि वंचिता भद्रे चरुव्यत्यासहेतुना। जनिष्यति हि पु
त्रस्ते क्रूरकर्मातिदारुणः। भ्राता जनिष्यते चापि ब्रह्मभूतस्तपोधनः। विश्वं हि ब्रह्म तपसा मया तस्मिन्स
मर्पितं। एवमुक्ता महाभागा भर्त्रा सत्यवती तदा। प्रसादयामास पतिं पुत्रो मे न भवेत् ब्राह्मणाप
सदः त्वत्तः उक्ता मुनिरब्रवीत्। नैष संकल्पितः कामो मया भद्रे तथास्त्विति। उग्रकर्मा भवेत्पुत्रः पित्र
मातृश्रुकारणात्। पुनः सत्यवती वाक्यमेवमुक्ताब्रवीदिदं। इच्छंल्लोकानपि मुने सृजेथाः किं पुनः
सुतं। शमात्मकमृजुं त्वं मे पुत्रं दातुमिहार्हसि। काममेवं विधिः पौत्रो मम स्यात्तव च प्रभो। यद्यन्यथान
शक्यं वै कर्तुमेतद्द्विजोत्तम। ततः प्रसादमकरोत्स तस्यास्तपसो बलात्। भद्रे नास्ति विशेषो मे पौत्रे वा
वरवर्णिनि। त्वया यथोक्तं वचनं तथा भद्रे भविष्यति। ततः सत्यवती पुत्रं जनयामास भार्गवं। तपस्य
भिरतं दांतं जमदग्निं शमात्मकं। भृगोश्चरुविपर्यासे रौद्रवैष्णवयोः पुरा। जंगमाद्वैष्णवांशेन जमदग्नि
रजायत। सा हि सत्यवती पुण्या सत्यधर्मपरायणा। कौशिकीति समाख्याता प्रवृत्तेयं महानदी। इ
क्ष्वाकुवंशप्रभवो रेणुर्नाम नराधिपः। तस्य कन्या महाभागा कामली नाम रेणुका। रेणुकायां तु कौश

त्यांतपोविद्यासमन्वितां। ऋचीकोजनयामासजामदग्न्यंसुदारुणं॥ सर्वविद्यांतगंश्रेष्ठंधनुर्वेदस्यपारगं॥ सं
क्षत्रियहंतारंप्रदीप्तमिवपावकं। और्वस्यैवमृचीकस्यसत्यवत्यांमहायशाः॥ जमदग्निस्तपोवीर्याज्जज्ञेब्रह्म
विदांवरः॥ मध्यमश्चशुनःशेफःशुनःपुच्छःकनिष्टकः॥ विश्वामित्रंतुदायादंगाधिःकुशिकनंदनः॥ जनयाम
सपुत्रंतुतपोविद्याशमात्मकं। प्राप्यब्रह्मर्षिसमतांयोऽयंसप्तर्षितांगतः॥ विश्वामित्रस्तुधर्मात्मानाम्ना
विश्वरथःस्मृतः। जज्ञेभृगुप्रसादेनकौशिकाद्वंशवर्द्धनः॥ विश्वामित्रस्यचसुतादेवरातादयःस्मृताः॥ शाल
वत्यांहिरण्याक्षोरेणुर्जज्ञेऽथरेणुकः॥ सांकृतिर्गालवश्चैवमुद्गलश्चेतिविश्रुताः॥ मधुच्छंदाजयश्चैवदेव
लश्चतथाष्टकः॥ कच्छपोहरितश्चैवविश्वामित्रस्यवैसुताः॥ तेषांख्यातानिगोत्राणिकौशिकायांमहा
त्मनां॥ पाणिनोवभ्रवश्चैवध्यानजप्यास्तथैवच॥ पार्थिवादेवराताश्चसालंकायनवाष्कलाः॥ लोहित्य
यमदूतश्चतथाकारीषयःस्मृताः॥ सौश्रुताःकौशिकाराजंस्तथान्येसैंधवायनाः॥ देवलारेणवश्चैवयाज्ञ
वल्क्याघमर्षणाः॥ औदुंवराह्यभिष्णातास्तारकायनचुंचुलाः॥ शालंकत्याहिरण्याक्षाःसांकृत्यागालवास्त
था॥ वादरायणिकाश्चान्येविश्वामित्रस्यधीमतः॥ ऋष्यंतरविवाह्याश्चकौशिकावहवःस्मृताः॥ पौरवस्यमहा ५५

राजब्रह्मर्षेःकौशिकस्यच॥ संवंधोऽस्यवंशेऽस्मिन्ब्रह्मक्षत्रस्यविश्रुतः॥ विश्वामित्रात्मजानांतुशुनःशेफोऽ
ग्रजःस्मृतः॥ भार्गवःकौशिकत्वंहिप्राप्तःसमुनिसत्तमः॥ विश्वामित्रस्यपुत्रस्तुशुनःशेफोऽभवत्किल॥ हरि
दश्वस्ययज्ञेतुपशुत्वेविनियोजितः॥ देवैर्दत्तःशुनःशेफोविश्वामित्रायवैपुनः॥ देवैर्दत्तःसवैयस्माद्देव
रातस्ततोऽभवत्॥ देवरातादयःसप्तविश्वामित्रास्यवैसुताः॥ दृषद्वतीसुतश्चापिवैश्वामित्रस्तथाष्टकः॥
अष्टकस्यसुतोलौहिःप्रोक्तोजह्नुगणोमया॥ अतऊर्द्ध्वंप्रवक्ष्यामिवंशमायोर्महात्मनः॥ ॥इतिहरि
वंशेसोमवंशानुकीर्तनंनाम॥ ॥वैशंपायनउवाच॥ आयोःपुत्रास्तथापंचसर्वेवीरामहारथाः॥ स्व
र्भानुतनयायांचप्रभायांजज्ञिरेनृप॥ नहुषःप्रथमंजज्ञेवृद्धशर्मा ततःपरं॥ रंभोरजिरनेनाश्चत्रिषुलोके
षुविश्रुताः॥ रजिःपुत्रशतानीहजनयामासपंचवै॥ राजेयमितिविख्यातंक्षत्रमिंद्रभयावहं॥ यत्रदेवासुरयु
द्धसमुत्पन्नेसुदारुणे॥ देवाश्चैवासुराश्चैवपितामहमथाब्रुवन्॥ आवयोर्भगवन्युद्धेकोविजेताभविष्यति
ब्रूहिनःसर्वभूतेशश्रोतुमिच्छामितेवचः॥ ॥ब्रह्मोवाच॥ येषामर्थायसंग्रामेराजिरात्तायुधःप्रभुः॥ योत्स्य
तेतेविजेष्यंतित्रींल्लोकान्नसंशयः॥ यतोराजिर्धृतिस्तत्रश्रीश्चतत्रयतोधृतिः॥ यतोधृतिश्चश्रीश्चैवतत्रध

र्म्माजयस्तथा।ते देवदानवाः प्रीता देवेनोक्ता रजे द्वये। अन्यपुर्ज्जयमिच्छंतो दृष्ट्वाना नरतर्पेन। सहि स्वर्भानु
दौहित्रः प्रभायां समपद्यत। राजा परमतेजस्वी सोमवंशविवर्द्धनः। ते हृष्टमनसः सर्वे रजिं दैत्याः सदानवाः
ऊचुरस्मज्जयार्थं वै त्वं गृहाण वरकार्मुकं। अथोवाच रजिस्तत्र तयोर्हि देवदैत्ययोः। अर्थज्ञः स्वार्थमुद्दिश्य
यशः स्वं च प्रकाशयन्। यदि दैत्यगणान्सर्वान् जित्वा वीर्येण वासवः। इंद्रो भवामि धर्म्मेण ततो योत्स्यामि सं
युगे। देवाः प्रथमतो नृपपते। सुहृष्टा मानसोब्रुवाः। एवं यथेष्टं नृपते कामः संपद्यतां तव। श्रुत्वा सुरगणानां तु
वाक्यं राजा रजिस्तथा। पप्रच्छ सुरमुख्यान्स यथा देवानपृच्छत। दानवा दर्प्पसंपन्नाः स्वार्थमेवानुगम्य
चाप्यूचुस्तं नृपवरं साभिमानमिदं वचः॥ ॥दानवा ऊचुः॥ अस्माकमिंद्रः प्रह्लादो यस्यार्थे विजयामहे।
अस्मिंस्तु समये राजन्स्थितिष्ट्या राजसत्तम। तत्तथेति तदेवं वै देवैरप्यभिनोदितः। भविष्यसीद्रो जित्वैव
देवैरुक्तस्तु पार्थिवः। जघान दानवान्सर्वान् आजहार रजिः प्रभुः। ततो राजिं महावीर्यं देवैः सह शतक्र
तुः। रजिपुत्रोऽहमित्युक्त्वा पुनरेवाब्रवीद्वचः। त्वमेवेंद्रोऽसि भूतानां सर्वेषां नात्र संशयः। यस्याहमिं ५६
द्रः पुत्रस्ते ख्यातिं यास्यामि कर्म्मभिः। स तु शक्रवचः श्रुत्वा वंचितस्तेन मायया। तथेत्येवाब्रवीद्राजा प्री

यमाणः शतक्रतोः। तस्मिंस्तु देवसदृशो दिवं प्राप्ते महीपतौ। दायाद्यमिंद्रादाजह्रुराचारात्तनया रजेः। पंचपुत्र
शतान्यस्य तत्स्थानं शतक्रतोः। समाक्रामन्त बहुधा स्वर्गलोकं त्रिविष्टपं। ततो बहुतिथे काले समतीते
महाबलः। हृतराज्योऽब्रवीच्छक्रो हृतभागो बृहस्पतिं॥ ॥इंद्र उवाच॥ बदरीफलमात्रं वै पुरोडाशं दिश
स्व मे। ब्रह्मर्षे येन तिष्ठेयं तेजसाप्यायितः सदा। ब्रह्मन्कृशोऽहं विमना हृतराज्यो हृताशनः। हृतौजा दु
र्ब्बलो मूढो रजिपुत्रैः कृतः प्रभो॥ ॥बृहस्पतिरुवाच॥ यद्येवं चोदितः शक्र त्वया स्यां पूर्वमेव हि। नाभविष्य
त्वत्प्रियार्थमकर्त्तव्यं ममानघ। प्रयतिष्यामि देवेंद्र त्वत्प्रियार्थे न संशयः। यथा भागं च राज्यं च नचिरात्प्रति
लप्स्यसे। तथा तात करिष्यामि मा भूत्ते विक्लवं मनः। ततः कर्म्म चकारास्य तेजसो वर्द्धनं तदा। तेषां च बु
द्धिसंमोहमकरोद्द्विजसत्तमः। नास्तिवादार्थशास्त्रं हि धर्म्मविद्वेषणं परं। परमं तर्कशास्त्राणामसता
तन्मतानुगं। नहि धर्म्मप्रधानानां रोचते तु कथांतरं। ततो बृहस्पतिकृतं शास्त्रं श्रुत्वाल्पचेतसः। पूर्व्वोक्तध
र्म्मशास्त्राणामनवन्द्वेषिणः सदा। प्रवक्तृन्यो यदहितं तन्मतं वक्तुमेनिरे। तेनाधर्म्मेण ते पापाः सर्व ए
व क्षयं गताः। त्रैलोक्यराज्यं शक्रस्तु प्राप्य दुष्प्रापमेव च बृहस्पतिप्रसादाद्धि परां निर्वृतिमभ्यगात्। तेयदा तु

वसुं महाराग गणं गर्वणउन्मनाः॥ ब्रह्मद्विषस्य संभ्रांता हतवीर्य्यपराक्रमाः। ततो लेभे सुरैश्वर्य्यमिंद्रः स्थानं
तथोत्तमं। हत्वा रजिसुतान् सर्वान् कामक्रोधपरायणान्। य इदं च्यवनं स्थानात्प्रतिष्ठां च शतक्रतोः॥ शृ
णुयाद्धारयेद्वापि न स दौरात्म्यमाप्नुयात्॥ ॥इति हरिवंशेषु हरिवंशे शक्रविजयप्रतिष्ठापनं नाम॥ ॥वै
शंपायन उवाच॥ रंभोऽनपत्यस्तत्रासीद्वंशं वक्ष्याम्यनेनसः। अनेनसः सुतो राजा प्रतिक्षत्रो महायशाः।
प्रतिक्षत्रसुतश्चापि संजयो नाम विश्रुतः। संजयस्य जयः पुत्रो विजयस्तस्य चात्मजः। विजयस्य कृतिः पुत्र
स्तस्य हर्य्यश्वतः सुतः। हर्यश्वतसुतो राजा सहदेवः प्रतापवान्। सहदेवस्य धर्म्मात्मा नदीन इति विश्रुतः।
नदीनस्य जयत्सेनो जयत्सेनस्य संकृतिः। संकृतेरपि धर्म्मात्मा क्षत्रवृद्धो महायशाः। अनेनसः समाख्या
ताः क्षत्रवृद्धस्य मे शृणु। क्षत्रवृद्धात्मजस्तत्र सुनहोत्रो महायशाः। सुनहोत्रस्य दायादास्त्रयः परमधार्म्मिकाः
काश्यः शलश्च द्वावेतौ तथा गृत्समदः प्रभुः। पुत्रो गृत्समदस्यापि सुनको यस्य शौनकाः। ब्राह्मणाः क्षत्रिया
श्चैव वैश्याः शूद्रास्तथैव च। शलात्मजश्चार्ष्टिषेणस्तनयस्तस्य काश्यकः। काश्यस्य काश्यपो राजन् पुत्रो दी
र्घतपास्तथा। धन्वस्तु दीर्घतपसो विद्वान् धन्वंतरिस्ततः। तपसोऽन्ते सुमहतो जातो वृद्धस्य धीमतः। पुनर्धन्वं

५७

तरिर्द्देवो मानुषेष्विह जज्ञिवान्॥ ॥जनमेजय उवाच॥ कथं धन्वंतरिर्द्देवो मानुषेष्विह जज्ञिवान्। एतद्वेदितुमि
च्छामि तन्मे ब्रूहि यथातथं॥ ॥वैशंपायन उवाच॥ धन्वंतरेः संभवोऽयं श्रूयतां भरतर्षभ। स संभूतः समु
द्रात्तु मथ्यमाने मृते पुरा। उत्पन्नः कलशात्पूर्वं सर्वतश्च श्रियान्वितः। सद्यःसीसिद्धकार्य्यं हि विष्णुं दृष्ट्वाधि
तष्ठिवान्। अब्जस्त्वमिति होवाच तस्मादब्जस्तु स स्मृतः। अब्जः प्रोवाच विष्णुं वै तव पुत्रोऽस्मि वै प्रभो।
विधत्स्व भागं स्थानं च मम लोके सुरेश्वर। एवमुक्तः स दृष्ट्वा वै तथ्यं प्रोवाच तं प्रभुः। कृतो यज्ञविभागो हि
यज्ञिकैर्हि सुरैः सह। वेदेषु विधियुक्तं हि विधिहोत्रं महर्षिभिः। न शक्यमुपहोमो वै तुभ्यं कर्तुं कदा
चन। अर्वाग्भूतोऽसि देवानां पुत्रस्त्वं हि न हीश्वरः। द्वितीयायां तु संभूत्यां लोके ख्यातिं गमिष्यसि। अ
णिमादिश्च ते सिद्धिर्गर्भस्थस्य भविष्यति। तेनैव त्वं शरीरेण देवत्वं प्राप्स्यसे प्रभो। विधिवत्त्वं व्रतैर्जप्यैर्यजंति
त्वां द्विजातयः। अष्टधा त्वं पुनश्चैव आयुर्वेदं विधास्यसि। अवश्यभावी ह्यर्थोऽयं प्राग्दृष्टस्त्वब्जयोनिना। द्वि
तीये द्वापरं प्राप्य भविता त्वं न संशयः। इमं तस्मै वरं दत्त्वा विष्णुरंतर्द्दधे पुनः। द्वितीये द्वापरे प्राप्ते सौनहोत्रिः स
काशिराट्। पुत्रकामस्तपस्तेपे धन्वो दीर्घतमास्तथा। प्रपद्ये देवतां तां तु या मे पुत्रं प्रदास्यति। अब्जं देवं सुता

ध्यायात्तदाराधितवान्नृपः। ततस्तुष्टः स भगवानब्जः प्रोवाच तं नृपं। यदीच्छसि वरं सद्यस्तं तदास्याभिसुव्र
तं॥ ॥नृप उवाच॥ भगवन्यदि तुष्टस्त्वं पुत्रो मे ख्यातिमान्भवेत्। तथेति समनुज्ञाय तत्रैवांतरधीयत। त
स्य गेहे समुत्पन्नो देवो धन्वंतरिस्तदा। काशिराजो महाराजः सर्वरोगप्रणाशनः। आयुर्वेदं भरद्वाजात्प्रा
प्य स भिषक्क्रियां। तमष्टधा पुनर्व्यस्य शिष्येभ्यः प्रत्यपादयत्। धन्वंतरेस्तु तनयः केतुमानिति विश्रुतः। अथ
केतुमतः पुत्रो वीरो भीमरथः स्मृतः। भीमरथस्यापि सुतो दिवोदासः प्रजेश्वरः। दिवोदासस्तु धर्मात्मा वा
राणस्याधिपोऽभवत्। एतस्मिन्नेव काले तु पुरीं वाराणसीं नृप। शून्यां निवेशयामास क्षेमको नाम राक्ष
सः। शप्ता हि सा मतिमता निकुंभेन महात्मना। शून्या वर्षसहस्रं वै भवित्रीति न संशयः। तस्यां तु शप्तमा
त्रायां। दिवोदासः प्रजेश्वरः। विषयांते पुरीं रम्यां गोमत्यां सन्निवेशयत्। भद्रश्रेण्यस्य पुत्राणां शतमुत्त
मधन्विनां। हत्वा निवेशयामास दिवोदासो नराधिपः। भद्रश्रेण्यस्य तद्राज्यं हृतं तेन बलीयसा॥ ॥जन
मेजय उवाच॥ वाराणसीं निकुंभश्च किमर्थं सशपत्प्रभुः। निकुंभः कस्य धर्मात्मा सिद्धिक्षेत्रं शशाप यः ५८
वैशंपायन उवाच॥ दिवोदासस्तु राजर्षिर्नगरीं प्राप्य पार्थिवः। वसति स्म महातेजाः स्फीतायां तु नराधिपः

एतस्मिन्नेव काले तु कृतदारो महेश्वरः। देव्याः स प्रियकामार्थं न्यवसच्छ्वशुरांतिके। देवाज्ञया पार्षदा
यच्च निरूपास्तपोधनाः। पूर्वोक्तैरूपवपश्च रमयंति स्म पार्वतीं। हृष्यते हि महादेवी मेना नैव प्रहृष्यति। जुगु
प्सत्यसकृत्तं च देवं देवीं तथैव सा। सपार्षदस्त्वनाचारस्तव भर्ता महेश्वरः। दरिद्रः सर्वदैवासौ शीलं तस्य
न विद्यते। मात्रा तथोक्ता वरदा स्त्रीस्वभावाच्च चुक्रुधे। स्मितं कृत्वा च वरदा भवपार्श्वमथागमत्। विवर्णव
दना देवी महादेवमभाषत। नेह वत्स्याम्यहं देव नय मां स्वं निवेशनं। तथा कर्तुं महादेवः सर्वाल्लोकान
वैक्षत। वासार्थं रोचयामास पृथिव्यां कुरुनंदन। वाराणसीं महातेजाः सिद्धक्षेत्रं महेश्वरः। दिवोदास
न तां ज्ञात्वा निविष्टां नगरीं भवः। पार्श्वे तिष्ठतिमाहूय निकुंभमिदमब्रवीत्। गणेश्वर पुरीं गत्वा शून्यां वाराण
सीं कुरु। मृदुनैवाप्युपायेन हतवीर्यः स पार्थिवः। ततो गत्वा निकुंभस्तु पुरीं वाराणसीं तदा। स्वप्ने नि
दर्शयामास मंकणं नाम नापितं। श्रेयस्तेऽहं करिष्यामि स्थानं मे रोचयानघ। मद्रूपां प्रतिमां कृत्वा नगर्यंते
तथैव च। ततः स्वप्ने यथादृष्टं सर्वं कारितवान्नृप। पुरीद्वारे तु विज्ञाप्य राजानं च यथाविधि। पूजां च महतीं
तस्य नित्यमेव प्रयोजयत्। गंधैश्च धूपमाल्यैश्च प्रेक्षणीयैस्तथैव च। अन्नपानप्रयोगैश्च अत्यद्भुतमिवा

मवत्॥ एवं संस्थिते तत्र नित्यमेव गणेश्वरः। ततो वरसहस्रं तु नागराणां प्रयच्छति। पुत्रान्हिरण्यमायु
श्च सर्वान्कामांस्तथैव च। राज्ञस्तु महिषी श्रेष्ठा सुयशा नाम विश्रुता। पुत्रार्थमागता देवी साध्वी राज्ञा
प्रचोदिता। पूजां च विपुलां कृत्वा देवी पुत्रान्मयाचत। पुनः पुनरथागम्य बहुशः पुत्रकारणात्। न प्रयच्छ
ति पुत्रं हि निकुंभः कारणान्न हि। राजा त्वथ दिसकुद्धो कार्यसिद्धिस्ततो न वै। अथ दीर्घेण कालेन
क्रोधो राजानमाविशत्। भूतमेतन्महाद्वारि नागराणां प्रयच्छति। प्रीतो वरान्प्रशतसो मम किं न प्रय
च्छति। मामकैः पूज्यते नित्यं नगर्यां मम चैव हि। विज्ञापितो मयात्यर्थं देव्या मे पुत्रकारणात्। न ननु ददा
ति च पुत्रं मे तस्मात्तद्भक्षः केन हेतुना। ततो नादेति सत्कारं मत्तः स्वकार्याद्विशिष्यतः। तस्मात्तु नासयिष्यामि स्था
नमस्य दुरात्मनः। एवं स तु विनिश्चित्य दुरात्मा राजकिल्बिषी। स्थानं गणपतेस्तस्य नाशयामास दुर्म
तिः। नष्टमायतनं दृष्ट्वा राजानमशपत्प्रभुः। यस्मादनपराधस्य त्वया स्थानं विनाशितं। पुर्यकस्मादियं
तस्मात्तव शून्या भविष्यति। ततस्तेन तु शापेन शून्या वाराणसी तदा। शप्त्वा पुरीं निकुंभस्तु महादेवमथा
गमत्। अकस्मात्तु पुरी सा तु विद्रुता सर्वतो दिशः। तस्यां पुर्यां ततो देवो निर्ममे पदमात्मनः। रमते तत्र वै ५२

देव्या रममाणो गिरिसुतां। नरमिं तत्र वै देवी लभते गृहविस्मयात्। वसाम्यत्र न पुर्यां तु देवी देवमथाब्र
वीत्॥ ॥श्रीमहादेव उवाच॥ नाहं वत्स्ये भविमास्यामि अविमुक्तं हि मे गृहं। नाहं तत्र गमिष्यामि गच्छ
देव गृहं प्रति॥ ॥सूत उवाच॥ भगवांस्त्र्यंबकस्त्रिपुरांतकः। यस्मात्तदविमुक्तं हि प्रोक्तं देवेन वै स्वयं।
एवं वाराणसी शप्ता अविमुक्तं च कीर्तितं। यस्मिन्वसति देवेशः सर्वदेवनमस्कृतः। युगेषु त्रिषु धर्मा
त्मा सह देव्या महेश्वरः। अंतर्धानं कलौ याति तत्पुरं हि महात्मनः। अंतर्हिते पुरे तस्मिन्पुरी तु वस
ते पुनः। एवं वाराणसी शप्ता निवेशं पुनरागता। भद्रश्रेण्यस्य पुत्रा वै दुर्दमो नाम विश्रुतः। दिवोदा
स न बालोऽति घृणया स विवर्जितः। हैहयस्य तु दायाद्यं हृतवान्स महीपतिः। आजह्रे पितृदायाद्यं दि
वोदासहृतं बलात्। भद्रश्रेण्यस्य पुत्रेण दुर्दमेन महात्मना। वैरस्यांतं महाराज क्षत्रियेण विधित्स
ता। दिवोदासाद्दृषद्वत्यां वीरो राजा प्रतर्दनः। तेन पुत्रेण बाल्येन प्रहृतं तस्य वै पुनः। प्रतर्दनस्य पु
त्रौ द्वौ वत्सो भर्गश्च विश्रुतौ। वत्सपुत्रो ह्यलर्कस्तु सन्नतिस्तस्य चात्मजः। अलर्कः काशिराजस्तु ब्रह्म
ण्यः सत्यसंगरः। अलर्कं प्रति जाताः श्लोकाः गीताः पुरातनैः। षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि चायुवा

रूपेणसंपन्न आसीत्काशिकुलोद्वहः। लोपामुद्राप्रसादेन परमायुरवाप सः। तस्यासीत्सुमहाद्वंशः रूपयौव
नशालिनः। सापत्यान्तं महाबाहुर्हत्वा क्षेमकराक्षसं। रम्यां निवेशयामास पुरीं वाराणसीं पुनः। संनत
रपि दायादः सुनीथो नाम धार्मिकः। सुनीथस्य तु दायादः क्षेम्यो नाम महायशाः। क्षेम्यस्य केतुमान्पुत्रः
सुकेतुस्तस्य चात्मजः। सुकेतोस्तनयश्चापि विभुर्नाम प्रजेश्वरः। आनर्तस्तु विभोः पुत्रः सुकुमारस्ततः सु
तः सुकुमारस्य पुत्रस्तु धृष्टकेतुः सुधार्मिकः। धृष्टकेतोस्तु दायादो वेणुहोत्रः प्रजेश्वरः। वेणुहोत्रसुत
श्चापि भार्गो नाम प्रजेश्वरः। वत्सस्य वत्सभूमिस्तु भृगुभूमिस्तु भार्गवात्। एते ह्यांगिरसः पुत्रा जाता वंशेऽ
थ भार्गवे। ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च पुत्राः सहस्रशः। इत्येते काशयः प्रोक्ता नहुषस्य निबोध
मे॥ ॥इति हरिवंशे॥ ॥वैशंपायन उवाच॥ उत्पन्नाः पितृकन्यायां विरजायां महौजसः। नहुषस्य ६०
तु दायादाः षडिंद्रोपमतेजसः। यतिर्ययातिः संयातिरायातिः पंचकोऽमतः। यतिर्ज्येष्ठस्ततः पश्चाद्ययाति
स्ततः परः। ककुत्स्थकन्यां गां नाम लेभे परमधार्मिकः। यतिस्तु मोक्षमास्थाय ब्रह्मभूतोऽभवन्मुनिः
तेषां ययातिः पंचानां विजित्य वसुधामिमां। देवयानीमुशनसः सुतां भार्यामवाप सः। शर्मिष्ठामासु

नेव

रीं तनयां वृषपर्वणः॥ यदुं च तुर्वसुं चैव देवयानी व्यजायत। द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी। तस्य
शक्रो ददौ प्रीतो रथं परमभास्वरं। असंगं कांचनं दिव्यं दिव्यैः परमवाजिभिः। युक्तं मनोजवैः शुभ्रैर्येन
कार्यं समुद्वहन्। स तेन रथमुख्येन षड्रात्रेणाजयन्महीं। ययातिर्युधि दुर्धर्षस्तथा देवान्सवासवा
न्। स रथः पौरवाणां च सर्वेषामभवत्तदा। यावत्तद्वसुनाम्नस्तु पौरवो जनमेजयः। कुरोः पुत्रस्य राजेंद्र न
जनु पारीक्षितस्य ह। जगाम स रथो नाशं शापाद्गार्ग्यस्य धीमतः। गार्ग्यस्य हि सुतं बालं स राजा जनमेज
यः। वाक्क्रूरं हिंसयामास ब्रह्महत्यामवाप सः। स लोहगंधी राजर्षिः परिधावन्नितस्ततः। पौरजानपदैस्त्यक्तो न
न लेभे शर्म कर्हिचित्। ततः स दुःखसंतप्तो नालभत्संविदं क्वचित्। इंद्रोतं शौनकं राजा शरणं प्रत्य
पद्यत। याजयामास चेंद्रोतः शौनको जनमेजयं। अश्वमेधेन राजानं पावनार्थं द्विजोत्तमः। स लोहगंधो व्य
नशत्तस्यावभृथमेत्य ह। स च दिव्यो रथो राजन्वसोश्चेदिपतेस्तदा। ततः शक्रेण तुष्टेन लेभे तस्माद्बृह
द्रथः। बृहद्रथात्क्रमेणैव गतो बार्हद्रथं नृपं। ततो हत्वा जरासंधं भीमस्तं रथमुत्तमं। प्रददौ वासुदेवाय
प्रीत्या कौरवनंदनः। सप्तद्वीपां ययातिस्तु जित्वा पृथ्वीं ससागरां। व्यभजत्पंचधा राजन्पुत्राणां नाहु

अंगारमाविव भूपं वंधुषु। निक्षिप्य यस्त्र पृथिवी। निरीक्ष्य पृथिवीपतिः। प्रीतिमानभवद्राजा।४

षः। दिशि दक्षिणपूर्वस्यां वसुमतिमतान्नृप। प्रतीच्यां उत्तरस्यां तु द्रुह्युं चानुं च नाहुषः। दिशि पूर्वोत्तरस्यां तु यदुं
श्रेष्ठं न्ययोजयत्। मध्ये पूरुं च राजानं अभ्यषिंचिन्नाहुषः। तैरियं पृथिवी सर्वा सप्तद्वीपा सपत्तना। यथा
प्रदेशं महाराज धर्मेण परिपाल्यते। धनुर्गृह्य पंच पक्षांश्च पंचभिः पुरुषर्षभैः। प्रजाः सर्वाः पुरस्तात्तु वशे मि
नृपसत्तम। सराजवानभवद्राजा ययातिरपराजितः। एवं विभज्य पृथिवीं ययातिर्यदुमब्रवीत्। जरां मे प्र
तिगृह्णीष्व पुत्र कार्यान्तरेण वै। तरुणस्तव रूपेण चरेयं पृथिवीमिमां। जरां त्वयि समाधाय यदुत्वं प्रभुर्भवा
च ह। अनिर्दिष्टा मया भिक्षा ब्राह्मणस्य प्रतिश्रुता। अनपाकृत्य तां राजन्न ग्रहीष्यामि तां जरां। जरा
यां बहवो दोषाः पानभोजनकारिताः। तस्मां जरां न ते राजन् ग्रहीतुं मदमुत्सहे। संति ते बहवः पु
त्रा मत्तः प्रियतरा नृप। प्रतिग्रहीतुं धर्मज्ञ पुत्रमन्यं वृणीष्व वै। स एवमुक्तो यदुना राजा कोपसमन्वि
तः। उवाच वदतां श्रेष्ठो ययातिर्गर्हयन् सुतं। आश्रमः कस्तवान्योऽस्ति को वा धर्मो विधीयते। मामनादृत्य
दुर्बुद्धे यदहं तव देशिकः। एवमुक्त्वा यदुं तात शशापैनं स मन्युमान्। अराज्यास्ते प्रजा मूढ भवित्री ति ६१
नराधिप। स तुर्वसुं च द्रुह्युं च अनुं च भरतर्षभ। एवमेवाब्रवीद्राजा प्रत्याख्यातश्च तैरपि। शशाप तान

पि क्रुद्धो ययातिरपराजितः। यथा ते कथितं पूर्वं मया राजर्षिसत्तम। एवं शप्त्वा सुतान् सर्वान् चतुरः पूरु
पूर्वजान्। तदेव वचनं राजा पूरुमप्याह भारत। तरुणस्तव रूपेण चरेयं पृथिवीमिमां। जरां त्वयि समाधा
य त्वं पूरो यदि मन्यसे। स जरां प्रतिजग्राह पितुः पूरुः प्रतापवान्। ययातिरपि रूपेण पूरोः पर्यचरन्महीं।
समार्गमाणः कामानामंतं नरतसत्तम। विश्वाच्या सहितो रेमे वने चैत्ररथे प्रभुः। यदा वितृप्तः कामानां भो
गेषु च नराधिप। तदा पूरोः सकाशाद्वै स्वां जरां प्रत्यपद्यत। तत्र गाथा महाराज शृणु गीता ययातिना। यतिः
प्रत्याहरत्कामान् सर्वशोऽङ्गानि कूर्मवत्। न जातु कामः कामानामुपभोगेन शाम्यति। हविषा कृष्णवर्त्मे
व भूय एवाभिवर्धते। यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः। नालमेकस्य तत्सर्वमिति पश्यन्न मुंचति
यदा भावं न कुरुते सर्वभूतेषु पापकं। कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा। यदान्यान्न बिभेति य
दा चास्मान्न बिभ्यति। यदा नेच्छति न द्वेष्टि ब्रह्म संपद्यते तदा। या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्य
तः। यासौ प्राणांतिको रोगस्तां तृष्णां त्यजतः सुखं। जीर्यंति जीर्यतः केशा दंता जीर्यंति जीर्यतः। धनाशा
जीविताशा च जीर्यतोऽपि न जीर्यति। यच्च काममुखं लोके यच्च दिव्यं महत्सुखं। तृष्णाक्षयसुखस्यैत

नार्हति षोडशीं कलां ॥ एवमुक्त्वा स राजर्षिः सदारः प्राविशद्वनं । कालेन महता चापि चचार विपुलं तपः । भृगुतुंगे
गतः पश्चात्तपसो ते महातपाः । अनश्नन् देहमुत्सृज्य सदारः स्वर्गमाप्तवान् । तस्य वंशे महाराज पंच राजर्षि
सत्तमाः । यैर्व्याप्ता पृथिवी सर्वा सूर्यस्येव गभस्तिभिः । यदोस्तु शृणु राजर्षे वंशं राजर्षिसत्तम । यत्र नारायणोऽ
जज्ञे हरिर्वृष्णिकुलोद्वहः । स्वस्थः प्रजावानायुष्मान् कीर्तिमांश्च भवेन्नरः । ययातेश्चरितं नित्यमिदं शृण्वन्नरा
धिप ॥ ॥ इति खिलेषु हरिवंशे ययातिवंशः ॥ ॥ जनमेजय उवाच ॥ पूरोर्वंशमहं ब्रह्मन् श्रोतुमिच्छामि तत्त्व
तः । द्रुह्योश्चानोर्यदोश्चैव तुर्वसोश्च पृथक् पृथक् । वृष्णिवंशप्रसंगेन स्वं वंशं पूर्वमेव हि । शृणु पूरोर्महा
राज वंशमुत्तमपौरुषं । विस्तरेणानुपूर्व्या च यत्र जातोऽसि पार्थिव । हंत ते वर्णयिष्यामि पूरोर्वंशमनुत्तमं ॥
द्रुह्योश्चानोर्यदोश्चैव तुर्वसोश्च नराधिप । पूरोः पुत्रः प्रवीरोऽभून्मनस्युस्तस्य चात्मजः । राजा चाभयदो नाम
मनस्योरभवत्सुतः । तथैवाभयदस्यासीत्सुधन्वा च महीपतिः । सुधन्वनः सुबाहुश्च राजा रौद्राश्वस्तस्य चात्म
जः । रौद्राश्वस्य दशार्णेयुः कृकणेयुस्तथैव च । कक्षेयुः स्थंडिलेयुश्च सन्नतेयुस्तथैव च । ऋचेयुश्च जलेयुश्च ६२
कृशजुश्च महाबलः । वनेनित्यावनेयुश्च पुत्रिकाश्च दश स्त्रियः । भद्रा शूद्रा च मद्रा च शलदा मलदा तथा

खला खला च राजेंद्र नलदा सुरसापि च । तथा गोचपला चैव स्त्रीरत्नकूटा च ता दश । ऋषिर्जातोऽत्रिवंशे तु तासां
भर्ता प्रभाकरः । भद्रायां जनयामास सुतं सोमं यशस्विनं । स्वर्भानुना हते सूर्ये पतमाने दिवो महीं । तमो
ऽभिभूते लोके च प्रभा येन प्रवर्तिता । स्वस्ति तेऽस्त्विति चोक्तो वै पतमानो दिवाकरः । वचनात्तस्य विप्रर्षेर्न प
पात दिवो महीं । अत्रिश्रेष्ठानि गोत्राणि यश्चकार महातपाः । यज्ञेष्वत्रेर्धनं चैव सुरैर्यस्य प्रवर्तितं । स ता
सु जनयामास पुत्रिकासु सनामकान् । दश पुत्रान्महासत्त्वान् तपस्युग्रे रतान् सदा । ते तु गोत्रकरा राजन् ऋष
यो वेदपारगाः । स्वस्त्यात्रेया इति ख्याताः किं त्वत्रिधनवर्जिताः । कक्षेयोस्तनयास्त्वासंस्त्रय एव महारथाः ।
सभानरश्चाक्षुषश्च परमन्युस्तथैव च । सभानरस्य पुत्रस्तु विद्वान् कालानलो नृप । कालानलस्य धर्मज्ञः
सृंजयो नाम वै सुतः । सृंजयस्याभवत्पुत्रो वीरो राजा पुरंजयः । जनमेजयो महाराज पुरंजयसुतोऽभव
त् । जनमेजयस्य राजर्षेर्महाशालोऽभवत्सुतः । देवेषु स परिज्ञातः प्रतिष्ठितयशा भुवि । महामना नाम
सुतो महाशालस्य धार्मिकः । जज्ञे वीरः सुरगणैः पूजितः सुमहामनाः । महामनास्तु पुत्रौ द्वौ जनयामास
भारत । उशीनरं च धर्मज्ञं तितिक्षुं च महाबलं । उशीनरस्य पत्न्यस्तु पंच राजर्षिवंशजाः । नृगा कृमी नवा

दृद्वीपंचमीचदृषद्वती।उशीनरस्यपुत्रास्तुपंचतासुकुलोद्वहाः।तपसामहताराजन्राजर्षेस्तस्यचात्मजाः।मृ
गायास्तुमृगःपुत्रः।कृमीकृमिरजायत।नवायास्तुनवःपुत्रोदृषद्वत्याःसुव्रतोऽभवत्।दृषद्वत्यास्तुसंजज्ञे
शिविरौशीनरोनृपः।शिवेस्तुशिवयस्तातयौधेयास्तुनृगस्यह।नवस्यनवराष्ट्रंतुकृमेस्तुकृमिलापुरी।सु
व्रतस्यतथांबष्ठाःशिविपुत्रान्निबोधमे।शिवेश्चपुत्राश्चत्वारोवीरास्त्रैलोक्यविश्रुताः।वृषदर्भःसुवीरश्चकेके
योमद्रकस्तथा।तेषांजनपदाःस्फीताःकेकयामद्रकास्तथा।वृषदर्भाःसुवीराश्चतितिक्षोस्तुप्रजाःशृणु
तितिक्षुरभवद्राजापूर्वस्यांदिशिभारत।उषद्रथोमहाराजफेनस्तस्यसुतोऽभवत्।फेनस्यसुतपाजज्ञेजज्ञे
सुतपसःसुतः।बलिर्मानुषयोनौतुसराजाकांचनेषुधिः।महायोगीसतुबलीर्बभूवनृपतिःपुरा।पुत्रानुत्पा
दयामासपंचवंशकरान्भुवि।अंगःप्रथमतोजज्ञेवंगःसुह्मस्तथैवच।पुंड्रःकलिंगश्चतथाबालेयंक्षत्रमु
च्यते।बालेयाब्राह्मणाश्चैवतस्यवंशकराभुवि।बलेस्तुब्रह्मणादत्तोवरःप्रीतेनभारत।महायोगित्वमा
युश्चकल्पस्यपरिमाणतः।संग्रामेचाप्यजेयत्वंधर्मेचैवप्रधानता।त्रैलोक्यदर्शनंचापिप्राधान्यंप्रसवेत
था।बलस्याप्रतिमत्वंवैधर्मतत्त्वार्थदर्शनं।चतुरोनियतान्वर्णांस्त्वंचस्थापयितेतिह।इत्युक्तोविभुनारा। ६३

जाबलिःशांतिंपरांययौ।कालेनमहताराजन्स्वंचस्थानमुपागमत्।तेषांजनपदाःपंचअंगावंगाःससुह्म
काः।कलिंगाःपुंड्रकाश्चैवप्रजास्त्वंगस्यमेशृणु।अंगपुत्रोमहानासीद्राजेंद्रोदधिवाहनः।दधिवाहनपु
त्रस्तुराजादिविरथोऽभवत्।पुत्रोदिविरथस्यासीच्छक्रतुल्यपराक्रमः।विद्वान्धर्मरथोनामतस्यचित्र
रथःसुतः।तेनधर्मरथेनाथतदाविष्णुपदेगिरौ।यजतासहशक्रेणसोमःपीतोमहात्मना।अथचित्ररथ
स्यापिपुत्रोदशरथोऽभवत्।लोमपादइतिख्यातोयस्यशांतासुताऽभवत्।तस्यदाशरथीवीरश्चतुरंगोमहा
यशाः।ऋष्यशृंगप्रसादेनयज्ञेकुलविवर्द्धनः।चतुरंगस्यपुत्रस्तुपृथुलाक्षइतिस्मृतः।पृथुलाक्षसुतस्तात
चंपोनाममहायशाः।चंपस्यतुपुरीचंपामालिनीयाभवत्पुरा।पूर्णभद्रप्रसादेनहर्यंगोऽस्यसुतोऽभ
वत्।ततोवैभांडकिस्तस्यवारणंशक्रवारणं।अवतारयामासमहींमंत्रैर्वाहनमुत्तमं।हर्यंगस्यतु
दायादोराजाभद्ररथःस्मृतः।पुत्रोभद्ररथस्यापिबृहत्कर्माप्रजेश्वरः।बृहद्दर्भःसुतस्तस्ययस्माज्जज्ञेबृहन्म
नाः।बृहन्मनास्तुराजेंद्रोजनयामासवैसुतं।नाम्नाजयद्रथंनामतस्माद्दृढरथोनृपः।आसीद्दृढरथस्या
पिविश्वजिज्जनमेजयः।दायादस्तस्यकर्णस्तुविकर्णस्तस्यचात्मजः।तस्यपुत्रशतंचासीदंगानांकुलव

हेनो।बृहत्कर्म्मस्य सुतो यस्य नाम्ना राजा बृहद्रथः।तस्य पत्नीद्वयं चासीद्वैदर्भ्ये सोनेस्कतेशुभे।यशोदेवी च सत्या
च ताभ्यां वंशस्य निद्यते।जयद्रथस्य राजेन्द्र यशोदेव्यां व्यजायत।ब्रह्मक्षत्रोत्तरः सत्यां विजयं नाम विश्रुते
विजयस्य धृतिः पुत्रस्तस्य पुत्रो धृतव्रतः।धृतव्रतस्य पुत्रस्तु सत्यकर्म्मा महारथः।सत्यकर्म्मस्य तत्रासीत्सू
तस्त्वधिरथस्त्वथ।यः कर्णं प्रतिजग्राह ततः कर्म्मस्य सूतजः।।तद्वः कथितं सर्व्वं कर्णप्रथितमाहवं।कर्णस्य
वृषसेनस्तु वृषसेनस्य पात्मजो ऽनवत्।एते ऽङ्गवंशजाः सर्व्वराजानः कीर्त्तिता मया।सत्यव्रता महात्मानः प्र
जावंतो महारथाः।ऋचेयास्तु महाराज रौद्राश्वतनयस्य वै।शृणु वंशं मनुष्येन्द्र यत्र जातो ऽसि पार्थिव।।।
इति खिलपु हरिवंशे कश्येयुवंशानुकीर्त्तनं नाम।। ।।वैशंपायन उवाच।।अनाधृष्यस्तु राजर्षिरृच
युश्वैकराडभूत्।ऋचेयात्तैलनानाम भार्य्या वै तक्षकात्मजा।तस्यां सदेयां राजर्षिर्म्मतिनारो महीपतिः
मतिनारस्य तास्त्वासंस्त्रयः परमधार्म्मिकाः।तस्करोद्य ऽप्रतिरथः सुवाहुश्चैव धार्म्मिकः।गौरी कन्या च वि
ख्याता मांधातुर्ज्जननी शुभा।सर्व्ववेदव्रतस्नाता ब्रह्मण्याः सत्यवादिनः।सर्व्वे कृतास्त्रा बलिनः सर्व्वे युद्धवि ६४
शारदाः।पुत्रो ऽप्रतिरथस्यासीत्काण्वः समभवन्नृप।मेधातिथिः सुतस्तस्य यस्मात्काण्वो ऽभवन्द्विजः।इलिना

मत्रयस्यासीत्कन्या वै जनमेजय।ब्रह्मवादिन्यधिस्त्री च तस्करामभ्यगच्छत।तंसुरोजोऽपि राजर्षिर्म्मेनत्रः प्रता
पवान्।ब्रह्मवादी पराक्रांतः तस्य भार्य्योपदानवी।उपदानवी सुतांल्लेभे चतुरस्तं स्कराघतः।दुष्यंतमथ स्क
धतं प्रवीरमनघं तथा।दुष्यंतस्य तु दायादो भरतो नाम वीर्य्यवान्।स सर्व्वदमनो नाम नागायुतबलो महा
न्।चक्रवर्त्ती सुतो जज्ञे दुष्यंतस्य महात्मनः।सकुंतलायां भरतो यस्य नाम्ना तु भारतं।भरतस्य विनष्टेषु
तनयेषु महीपतेः।मातॄणां तात कोपेन मया ते कथितं तदा।बृहस्पतेरांगिरसः पुत्रो राजन्महामुनिः
संक्रामितो भरद्वाजो मरुद्भिः क्रतुभिर्व्विभो।तत्रैवोदाहरंतीमं भरद्वाजस्य धीमतः।धर्म्मसंक्रमणं चा
पि मरुद्भिर्भरताय वै।अयाजयद्भरद्वाजो मरुद्भिः क्रतुभिर्हितः।पूर्व्वं तु वितथे तस्य कृते वै पुत्रजन्मनि।
ततो ऽथ वितथो नाम भरद्वाजसुतो ऽभवत्।ततो ऽथ वितथे जाते भरतस्तु दिवं ययौ।।वितथं चाभिषि
च्याथ भरद्वाजो वनं ययौ।स चापि वितथः पुत्रान्जनयामास पंच वै।सुहोत्रं च सुहोतारं गयं गर्गं त
थैव च।कपिलं च महात्मानं सुहोत्रस्य सुतद्वयं।काशिकं च महासत्वं तथा गृत्समतिं नृप।तथा गृत्समते पुत्राः
ब्राह्मणाः क्षत्रिया विशः।काशिकस्य तु काशेयः पुत्रो दीर्घतमास्तथा।बभूव दीर्घतमसो विद्वान्धन्वंतरिस्तु

ताः धन्वंतरेस्तु तनयः केतुमानिति विश्रुतः । अथ केतुमतः पुत्रो विद्वान्हेमरथः स्मृतः । दिवादासइति
ख्यातः सर्वक्षत्रविनाशनः । एतस्मिन्नेव काले तु पुरीं वाराणसीं नृपः । शून्यां निवेशयामास क्षेमको ना
म राक्षसः । शप्ता हि सा मतिमता निकुंभेन महात्मना । शून्या वर्षसहस्रं वै भवित्रीति नराधिप । तस्यां तु
शप्तमात्रायां दिवादासः प्रजेश्वरः । विषयान्ते पुरीं रम्यां गोमत्यां संन्यवेशयत् । भद्रश्रेण्यस्य पुत्राणां शत
मुत्तमधन्विनां । हत्वा निवेशयामास दिवादासः प्रजेश्वरः । दिवादासस्य पुत्रस्तु वीरो राजा प्रतर्दनः । प्रत
र्दनस्य पुत्रौ द्वौ वत्सो भार्गस्तथैव च । अलर्को राजपुत्रस्तु राजा सन्नतिमान्भुवि । हैहयस्य तु दायाद्यं
हृतवान्वै महीपतिः । आजह्रे पितृदायाद्यं दिवादासहृतं बलात् । भद्रश्रेण्यस्य पुत्रेण दुर्दमेन महात्मना ।
दिवादासेन बालो हि घृणया स विसर्जितः । अष्टरथो नाम नृपः सुतो भीमरथस्य वै । तेन पुत्रस्य बाल
स्य प्रहृतं तस्य भारत । वैरस्यान्तं महाराज क्षत्रियेण विधित्सता । अलर्कः काशिराजस्तु ब्रह्मण्यः सत्यसं
गरः । षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च । तस्यासीद्राज्यं रूपयौवनशालिनः । युवा रूपेण सं
पन्न आसीत्काशिकुलोद्वहः । लोपामुद्राप्रसादेन परमायुरवाप सः । वयसोऽन्ते महाबाहुर्हत्वा क्षे ६५

मकं राक्षसं । रम्यां निवेशयामास पुरीं वाराणसीं नृपः । अलर्कस्य तु दायादः क्षेमो नाम महायशाः । क्षेमस्य केतुमान्
पुत्रो वर्षकेतुस्ततोऽभवत् । वर्षकेतोस्तु दायादो विभुर्नाम प्रजेश्वरः । आनर्तस्तु विभोः पुत्रः सुकुमारस्ततोऽभ
वत् । सुकुमारस्य पुत्रस्तु सत्यकेतुर्महारथः । सुतोऽभवन्महातेजा राजा परमधार्मिकः । वत्सस्य वत्सभू ७३
मिस्तु भृगुभूमिस्तु भार्गवात् । एते ह्यंगिरसः पुत्रा जाता वंशेऽथ भार्गवे । ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च भ
रतर्षभ । सुहोत्रस्य बृहत्पुत्रो बृहतस्तनयास्त्रयः । अजमीढो द्विमीढश्च पुरुमीढश्च वीर्यवान् । अजमी
ढस्य पत्न्यस्तु तिस्रो रूपसमन्विताः । नीलिनी केशिनी चैव धूमिनी च वरांगनाः । अजमीढस्य केशिन्यां
जज्ञे जह्नुः प्रतापवान् । आजह्रे यो महासत्रं सर्वमेधमखं विभुः । पतिलोभेन यं गंगा विनीताभिससा
र ह । नेच्छतः प्लावयामास तस्य गंगा च तत्सदः । तया च प्लावितं दृष्ट्वा यज्ञवाटं समंततः । जह्नुरथाब्रवी
द्गंगां क्रुद्धो भरतसत्तम । एष ते त्रिषु लोकेषु संक्षिप्यापः पिबाम्यहं । अस्य गंगे अवलेपस्य सद्यः फलमवा
प्नुहि । ततः पीतां महात्मानो दृष्ट्वा गंगां महर्षयः । उपनिन्युर्महाभागां दुहितृत्वाय जाह्नवीं । युवनाश्वस्य
पुत्रीं तु कावेरीं जह्नुरावहत् । गंगाशापेन देहार्धं यस्याः पश्चान्नदीकृतं । जह्नोस्तु दयितः पुत्रो अजको ना

मवीर्य्यवान्। अथाजकस्य दायादो वलाकाश्वो महीपतिः॥ बभूव मृगयाशीलः कुशिकस्तस्य चात्मजः। पल्हवैः
सह संवृद्धो राजा वनचरैस्तदा। कुशिकस्तु तपस्तेपे पुत्रमिंद्रसमप्रभं। लभेयमिति तं शक्रस्त्रासादभ्येत्य
जज्ञिवान्। स गाधिरभवद्राजा मघवा कौशिकः स्वयं। विश्वामित्रस्तु गाधेयो राजा विश्वरथस्तथा। विश्वजि
द्विश्वकृच्चैव तथा सत्यवती नृप। ऋचीकात्तु जमदग्निस्तु सत्यवत्यामजायत। विश्वामित्रस्य च सुता देवरा
तादयः स्मृताः। प्रख्यातास्त्रिषु लोकेषु तेषां नामानि मे शृणु। देवश्रवाः कतिश्चैव यस्मात्कात्यायनाः स्मृ
ताः। शीलवत्यां हिरण्याक्षो रेणुर्यस्याप्यरेणुकः। सांकृत्यो गालवो राजन्मौद्गल्यश्चेति विश्रुताः। तेषां ख्या
तानि गोत्राणि कौशिकानां महात्मनां। पाणिनो बभ्रवश्चैव ध्यानजप्यास्तथैव च। पार्थिवा देवराताश्च सा
लंकायनसौश्रवाः। लोहित्या यमदूताश्च तथा कारीषयः स्मृताः। विश्रुताः कौशिका राजंस्तथान्ये सैंधवायना
ऋष्यन्तरविवाह्याश्च कौशिका बहवः स्मृताः। पौरवस्य महाराज महर्षेः कौशिकस्य च। संबंधोप्यस्य वंशेस्मिन्
ब्रह्मक्षत्रस्य विश्रुतः। विश्वामित्रात्मजानां तु शुनःशेफोऽग्रजः स्मृतः। भार्गवः कौशिकत्वं हि प्राप्तः स मुनिस ६६
त्तमः। देवरातादयश्चान्ये विश्वामित्रस्य वै सुताः। दृषद्वतीसुतश्चापि विश्वामित्रात्तथाष्टकः। अष्टकस्य सुतो लौ

हि प्रोक्तो जह्नुगणो मया। आजमीढोऽपरो वंशः श्रूयतां भरतर्षभ। अजमीढात्तु नीलिन्यां सुशान्तिरुपपद्यत। पु
रुजातिः सुशान्तेस्तु बाह्याश्वः पुरुजातितः। बाह्याश्वतनयाः पंच बभूवुरमरोपमाः। मुद्गलः संजयश्चैव राजा
बृहदिषुस्तथा। यवीनरश्च विक्रान्तः कृमिलाश्वश्च पंचमः। पंचैते रक्षणायालं देशानामिति विश्रुताः। पंचा
नां विद्धि पंचालान्स्फीतैर्जनपदैर्वृतान्। अलं संरक्षणे तेषां पंचाला इति विश्रुताः। मुद्गलस्य तु दायादो
मौद्गल्यः सुमहायशाः। सर्वे ह्येते महात्मानः क्षत्रोपेता द्विजातयः। एते ह्यंगिरसः पक्षं संश्रिताः काण्वमुद्गलाः
मौद्गल्यस्य सुतो ज्येष्ठो ब्रह्मर्षिः सुमहातपाः। इन्द्रसेनो यतो गर्भं वध्र्यश्वं प्रत्यपद्यत। वध्र्यश्वान्मिथुनं जज्ञे
मेनकायामिति श्रुतिः। दिवोदासश्च राजर्षिरहल्या च यशस्विनी। शरद्वतस्य दायादमहल्या संप्रसूय
त शतानंदमृषिश्रेष्ठं तस्यापि तु महायशाः। पुत्रः शतधृतिर्नाम धनुर्वेदस्य पारगः। तस्य शतधृतेर
तोद्दृश्याप्सरसमग्रतः। अवस्कन्नं शरस्तंबे मिथुनं समपद्यत। कृपया तच्च जग्राह शंतनुर्मृगयां गतः। कृ
पः स्मृतः स वै तस्माद्गौतमी च कृपी तथा। एते शारद्वताः प्रोक्ता एते ते गौतमाः स्मृताः। अत ऊर्ध्वं प्रवक्ष्या
मि दिवोदासस्य संततिं। दिवोदासस्य दायादो ब्रह्मर्षिर्मित्रयुर्नृपः। मैत्रायणास्ततः शाखा मैत्रेयास्तु

ततः स्मृताः ॥ एतेऽपि संश्रिताः पक्षाः क्षत्रोपेतास्तु भार्गवाः ॥ सर्वे एते महात्मानः क्षत्रोपेता द्विजातयः ॥ एते
ह्यंगिरसः पक्षं संश्रिताः काप्यमुद्गलाः ॥ आसीत्पंचजनः पुत्रः संजयस्य महात्मनः ॥ सुतः पंचजनस्यापि
सोमदत्तो महीपतिः ॥ सोमदत्तस्य दायादः सहदेवो महायशाः ॥ सहदेवसुतश्चापि सोमको नाम पार्थिवः
अजमीढात्पुनर्जातः क्षीणवंशे तु सोमकः ॥ सोमकस्य सुतो जंतुर्यस्य पुत्रशतं त्वभौ ॥ तेषां जवीयान्पृ-
षतो द्रुपदस्य पिता प्रभुः ॥ धृष्टद्युम्नस्तु द्रुपदात् धृष्टकेतुश्च तत्सुतः ॥ आजमीढाः स्मृता ह्येते महात्मान-
स्तु सोमकाः ॥ पुत्राणामजमीढस्य सोमकत्वं महात्मनां ॥ महिषी त्वजमीढस्य धूमिनी पुत्रगृद्धिनी ॥ तृतीया
तव सर्ववंशजननी पृथिवीपते ॥ सा तु पुत्रार्थिनी देवी व्रतचर्यसमन्विता ॥ तपो वर्षायुतं तेपे स्त्रीभिः परमदु-
श्चरं ॥ हुत्वाग्निं विधिवत्साऽपि पवित्रमितभोजना ॥ अग्निहोत्रकुशेष्वेव सुष्वाप जनमेजय ॥ धूमिन्या स तया दे-
व्या त्वजमीढः समेयिवान् ॥ ऋक्षं सा जनयामास धूम्रवर्णं सुदर्शनं ॥ ऋक्षात्संवरणो जज्ञे कुरुः संवरणात्
तथा ॥ यः प्रयागादपक्रम्य कुरुक्षेत्रं चकार ह ॥ पुण्यं च रमणीयं च पुण्यकृद्भिर्निषेवितं ॥ तस्यान्वायः सु-
महान्यस्य नाम्नाथ कौरवाः ॥ कुरोश्च पुत्राश्चत्वारः सुधन्वा सुधनुस्तथा ॥ परीक्षिच्च महाबाहुः प्रवरश्चा- ६१

Dr. BHAU DAJI

रिमेजयः ॥ सुधन्वनस्तु दायादः सुहोत्रो मतिमान् स्मृतः ॥ च्यवनस्तस्य पुत्रस्तु राजा धर्मार्थकोविदः ॥ च्यवना-
त्कृतयज्ञस्तु इष्ट्वा यज्ञैः सधर्मवित् ॥ विश्रुतं जनयामास पुत्रमिंद्रसखं नृपः ॥ चैद्योपरिचरं वीरं वसुं ना-
मांतरिक्षगं ॥ चैद्योपरिचराज्जज्ञे गिरिकायां सप्त मानवाः ॥ महारथो मगधराड् विश्रुतो यो बृहद्रथः ॥ प्रत्यग्र-
थः कुशश्चैव यमाहुर्मणिवाहनं ॥ शाकलश्च यदुश्चैव मत्स्यः काली च सप्तमः ॥ बृहद्रथस्य दायादः
कुशाग्रो नाम विश्रुतः ॥ कुशाग्रस्यात्मजो विद्वान् ऋषभो नाम वीर्यवान् ॥ दायादस्तस्य विक्रांतो राजा
सत्यहितः स्मृतः ॥ तस्य पुत्रः सुधर्मात्मा नाम्ना ऊर्जस्तु यज्ञवान् ॥ ऊर्जस्य संभवः पुत्रो यस्य जज्ञे स वी-
र्यवान् ॥ शकले द्वे स वै जातो जरया संधितः स तु ॥ जरया संधितो यस्माज्जरासंधस्ततः स्मृतः ॥ सर्वक्षत्र-
स्य जेता वै जरासंधो महाबलः ॥ जरासंधस्य पुत्रो वै सहदेवः प्रतापवान् ॥ सहदेवात्मजः श्रीमानुदा-
युः स महायशाः ॥ उदायुर्जनयामास पुत्रं परमधार्मिकं ॥ श्रुतधर्मेति राजानं मगधन्पाऽ
वसत्क्षितौ ॥ परीक्षितस्य दायादो धार्मिको जनमेजयः ॥ जनमेजयस्य दायादास्त्रय एव महारथाः ॥ हन्त
कथयिष्यामि यत्र जातोऽसि पार्थिव ॥ जह्नुस्त्वजनयत्पुत्रं सुरथं नाम भूमिपं ॥ श्रुतसेनाग्रसेनौ भी-

मसीनश्च नामतः। एते सर्वे महाभागा विक्रान्ता बलिशालिनः। जनमेजयस्य पुत्रोऽपि सुरथो मतिमांस्तथा
सुरथस्यापि विक्रान्तः पुत्रो यज्ञे विदूरथः। विदूरथस्य दायाद ऋक्ष एव महारथः। द्वितीयः स च नाराज
नाम्ना तेनैव विश्रुतः। द्वावृक्षौ तव वंशेऽस्मिन् द्वावेव परिकीर्तितौ। भीमसेनास्त्रयो राजन् द्वौ चापि ज
नमेजयौ। ऋक्षस्य तु द्वितीयस्य भीमसेनोऽभवत्सुतः। प्रतीपो भीमसेनात्तु प्रतीपस्य तु शंतनुः। देवापिर्बा
ह्लीकश्चैव त्रय एव महारथाः। शंतनोः प्रसवस्तुभ्यं यत्र जातोऽसि पार्थिव। बाह्लीकस्य तु राज्यं वै सप्तबाह्य
नरेश्वर। बाह्लीकस्य सुतश्चैव सोमदत्तो महायशाः। जज्ञिरे सोमदत्तात्तु भूरिर्भूरिश्रवाः शलः। उपाध्या
यस्तु देवानां देवापिरभवन्मुनिः। च्यवनस्य कृतः पुत्र इष्टश्चासीन्महात्मनः। शंतनुस्त्वभवद्राजा कौरवा
णां धुरंधरः। शंतनोः संप्रवक्ष्यामि यत्र जातोऽसि पार्थिव। गांगं देवव्रतं नाम पुत्रं सोऽजनयत्प्रभुः। स तु भी
ष्म इति ख्यातः पाण्डवानां पितामहः। काली विचित्रवीर्यं तु जनयामास भारत। शंतनोर्दयितं पुत्रं धर्मात्मा
नमकल्मषं। कृष्णद्वैपायनश्चैव क्षेत्रे वैचित्रवीर्यके। धृतराष्ट्रं च पाण्डुं च विदुरं चाप्यजीजनत्। धृत
राष्ट्रस्य गांधार्यां पुत्राणां तु शतं श्रुतं। तेषां दुर्योधनः श्रेष्ठः सर्वे पाण्डवसत्प्रभुः। पाण्डोर्धनंजयः पुत्रः सौभ ६८

ह॰

द्रस्य चात्मजः। अभिमन्योः परीक्षित्तु पिता तव जनेश्वर। एष ते पौरवो वंशो यत्र जातोऽसि पार्थिव॥ ॥ इति खिले
षु हरिवंशे पुरुवंशानुकीर्तनं नाम ॥ ॥ तुर्वसोस्तु प्रवक्ष्यामि द्रुह्योश्चानोर्यदोस्तथा। तुर्वसोस्तु सुतो वह्निर्गो
भानुस्तस्य चात्मजः। गोभानोस्तु सुतो राजा त्रैशानुरपराजितः। करंधमस्तु त्रैशानोर्मरुत्तस्तस्य चात्मजः। अ
न्यस्त्वावीक्षितो राजा मरुत्तः कथितस्तव। अनपत्योऽभवद्राजा यज्वा विपुलदक्षिणः। दुहिता संमता
म तस्यासीत्पृथिवीपते। दक्षिणार्थं हि सा दत्ता संवर्ताय महात्मने। दुष्यन्तं पौरवं चापि लेभे पुत्रमकल्मषं।
एवं जातः शापेन जरासंक्रमणात्तदा। पौरवं तुर्वसोर्वंशः प्रविवेश नृपोत्तम। दुष्यन्तस्य तु दायादः क्रूतधा
मः प्रजेश्वरः। क्रूतथमादथाक्रीडश्चत्वारस्तस्य चात्मजाः। पाण्ड्यश्च केरलश्चैव कोलश्चोलश्च पार्थिव। तेषां ज
नपदाः स्फीताः पाण्ड्याश्चोलाः सकेरलाः। द्रुह्योश्च तनयो राजन् बभ्रुसेतुश्च पार्थिव। अङ्गारसेतुस्तत्पुत्रो मरु
तां पतिरुच्यते। यौवनाश्वेन समरे कृच्छ्रेण निहतो बली। युद्धं सुमहदस्यासीन्मासान्परिचतुर्दश। अङ्गार
स्य तु दायादो गांधारो नाम पार्थिवः। ख्यायते यस्य नाम्नैव गांधारविषयो महान्। गांधारवंशजाश्चैव तुरगा
वाजिनां वराः। अनोस्तु पुत्रो धर्मोऽभूद्धृतस्तस्यात्मजोऽभवत्। धृताद्दुदुहो जज्ञे प्रचेतास्तस्य चात्मजः।

प्रचेतसः सुवसात्रे कीर्त्तिता ह्येते तवा मया। यदोर्वंशं प्रवक्ष्यामि ज्येष्ठस्योत्तमतेजसः। विस्तरेणानुपूर्व्याच्च गद
तो मे निबोध मे॥ ॥इति खिलेषु हरिवंशे पुरुवंशानुकीर्त्तनं नाम॥ ॥वभूवुस्तेयदोः पुत्राः पंच देवसुतोपमाः
सहस्रदः पयोदश्च क्रोष्टा नीलोऽञ्जिकस्तथा। सहस्रदायादास्त्रयः परमधार्मिकाः। हैहयश्च हयश्चैव राजा
वेणुहयस्तथा भवत्। हैहयस्याभवत्पुत्रो धर्मनेत्र इति श्रुतः। धर्मनेत्रस्य कार्तस्तु साहंजस्तस्य चात्मजः। साहंज
नी नाम पुरी तेन राज्ञा निवेशिता। साहंजस्य तु दायादो महिष्मान्नाम पार्थिवः। माहिष्मती नाम पुरी येन राज्ञा
निवेशिता। आसीन्माहिष्मतः पुत्रो भद्रश्रेण्यः प्रतापवान्। भद्रश्रेण्यस्य दायादो दुर्दमो नाम विश्रुतः। दुर्दम
स्य सुतो धीमान्कनको नाम नामतः। कनकस्य तु दायादाश्चत्वारो लोकविश्रुताः। कृतवीर्यः कृतौजाश्च कृत
वर्मा तथैव च। कृताग्निश्च चतुर्थोऽभूत्कृतवीर्यादथार्जुनः। यस्तु बाहुसहस्रेण सप्तद्वीपेश्वरोऽभवत्। जिगा
य पृथिवीमेको रथेनादित्यवर्चसा। स हि वर्षायुतं तप्त्वा तपः परमदुश्चरं। दत्तमाराधयामास कार्त्तवीर्योऽत्रि
संभवं। तस्मै प्रीतो वरान्प्रादाच्चतुरो भूरितेजसः। पूर्वं बाहुसहस्रं तु प्रार्थितं सुमहद्वरं। अधर्मेऽधीयमान
स्य सद्भिस्तत्र निवर्त्तनं। उग्रेण पृथिवीं जित्वा स्वधर्मेणानुरंजनं। संग्रामान्सुबहून्जित्वा हत्वा चारीन्सहस्रशः ६२

संग्रामे वर्त्तमानस्य वधं चाप्यधिकाद्रणे। तस्य बाहुसहस्रं तु युध्यतः किल भारत। योगाद्योगेश्वरस्येव प्रादुर्भव
ति मायया। तेनेयं पृथिवी सर्वा सप्तद्वीपा सपत्तना। ससमुद्रा सनगरा उग्रेण विधिना जिता। तेन सप्त सु द्वीपे
षु सप्त यज्ञशतानि वै। प्राप्तानि विधिना राज्ञा श्रूयन्ते जनमेजय। सर्वे यज्ञा महाबाहोः सहस्रशतदक्षिणाः॥
सर्वे कांचनयूपाश्च सर्वे कांचनवेदयः। सर्वे देवैर्महाराज विमानस्थैरलंकृताः। गंधर्वैरप्सरोभिश्च नित्यमेवोपशो
भिताः। यस्य यज्ञे जगौ गाथां गंधर्वो नारदस्तथा। वरीदासात्मजो विद्वान्महिम्ना तस्य विस्मितः॥ ॥नारद उ
वाच॥ न नूनं कार्त्तवीर्यस्य गतिं यास्यन्ति पार्थिवाः। यज्ञैर्दानैस्तपोभिश्च विक्रमेण श्रुतेन च। स हि सप्तसु द्वीपे
षु चर्मी खड्गी शरासनी। रथी द्वीपाननुचरन्योगी संदृश्यते नृभिः। अनष्टद्रव्यता चैव न शोको न च विभ्रमः॥
प्र नवा तु महाराज्ञो धर्मेण परिरक्षतः। स सर्वरत्नभाक्सम्राट् चक्रवर्ती बभूव ह। स एव पशुपालोऽभूत्क्षेत्रपालः
स एव हि। स एव वृष्ट्या पर्जन्यो योगित्वादर्जुनोऽभवत्। स वै बाहुसहस्रेण ज्याघातकठिनत्वचा। भाति रश्मि
सहस्रेण शरदीव दिवाकरः। स हि नागान्मनुष्येषु माहिष्मत्यां महाद्युतिः। कर्कोटकसुताञ्जित्वा पुर्यां त
स्यां निवेशयत्। स वै वेगं तु रवायाः प्राविट्काले द्वुजेहरणः। क्रीडन्नेव सुखोद्भिन्नं प्रतिस्रोतश्चकार ह। लु

०ताक्रीडितात तेन फेनस्रग्दाममालिना । तरंगभ्रूसहस्रेण संकिता मेतिनर्मदा । तस्य बाहुसहस्रेण क्षुभ्यमा
ने महोदधौ नया निलीना निश्चेष्टा पातालस्था महासुराः । चूर्णीकृत्य महावीचिं चलन्मीनमहातिमिं । मारुता
विद्धफेनौघमावर्त्तक्षोभसंकुलं । प्रावर्त्तयत्तदा राजा सहस्रेण च बाहुना । देवासुरसमाक्षिप्तः क्षीरोद इव मंद
रः । मंदरक्षोभचकिता अमृतोत्पादशंकिताः । सहसोत्पतिताश्चैव भीमं दृष्ट्वा नृपोत्तमं । नता निश्चलमूर्द्धानो
व नू वु स महारगाः । सायाह्ने कदलीखंडे कंपिता तस्य बाहुना । स वै बद्ध्वा धनुर्ज्यायां निरुत्सिक्तं पंचभिः शरैः
लंकेशं मोहयित्वा तु सबलं रावणं बलात् । निर्जित्य वशमानीय माहिष्मत्यां बबंध तं । श्रुत्वा तु बद्धं पौलस्त्यं
रावणं त्वर्जुनेन तु । ततो गत्वा पुलस्त्यस्तु अर्जुनं ददृशे स्वयं । मुमोच बद्धं पौलस्त्यं पुलस्त्येनानुयाचितः । यस्य
बाहुसहस्रस्य बभूव ज्यातलस्वनः । युगांते त्वंबुदस्येव स्फुटितस्याशनेरिव । अहो ऽस्य नृपते वीर्यं भार्गवस्य
यदा छिन्नत । राज्ञो बाहुसहस्रं तु हैमं तालवनं यथा । तृषितेन कदाचित्स भिक्षितश्चित्रभानुना । स भिक्षा
मददद्वीरः सप्तद्वीपान् विभावसोः । पुराणि ग्रामघोषांश्च विषयांश्चैव सर्वशः । जज्वाल तस्य सर्वाणि चित्रभानु
र्दिदृक्षया । स तेऽस्य पुरुषेंद्रस्य प्रभावेन महात्मनः । ददाह कार्त्तवीर्यस्य शैलांश्चैव वनानि च । स शून्यमाश्र ७०
ध

मं रम्यं वरुणस्यात्मजस्य वै । ददाह वनवन्नं दीप्तश्चित्रभानुः स हैहयः । यं लेभे वरुणः पुत्रं पुरा भास्वानमुत्तमं ।
वशिष्ठं नाम स मुनिः ख्यात आपव इत्यपि । यत्रापवस्तु तं क्रोधाच्छप्तवानर्जुनं विभुः । यस्मान्न वर्जित
मिदं वनं ते मम हैहय । तस्मात्ते दुष्करं कर्म कृतमन्यो हरिष्यति । रामो नाम महाबाहुर्जामदग्न्यः प्रतापवान्
छित्वा बाहुसहस्रं ते प्रमथ्य तरसा बली । तपस्वी ब्राह्मणः छित्वा वधिष्यति स भार्गवः । अनष्टद्रव्यता चैव
नशोकानच विभ्रमः । प्रभावेन नरेंद्रस्य प्रजा धर्मेण रक्षिताः । रामात्ततो ऽस्य मृत्युर्वै तस्य शापान्महामु
ने । वरश्चैव तु कौरव्य स्वयमेव वृतः पुरा । तस्य पुत्रशतं त्वासीत् पंच शेषा महात्मनः । कृतास्त्रा बलिनः शूरा
धर्मात्मानो यशस्विनः । शूरसेनश्च शूरश्च धृष्टोक्तः कृष्ण एव च । जयध्वजश्च नाम्नासीदावंत्यो नृपतिर्म
हान् । कार्त्तवीर्यस्य तनया वीर्यवंतो महाबलाः । जयध्वजस्य पुत्रस्तु तालजंघो महाबलः । तस्य पुत्राः स
ते ख्याता तालजंघा इति श्रुताः । तेषां कुले महाराज हैहयानां महात्मनां । वीतिहोत्राः सुजाताश्च भो
जाश्चावंतयः स्मृताः । तौंडिकेराश्च विक्रांतास्तालजंघास्तथैव च । भरताश्च सुजाताश्च बहुत्वान्नानुकी
र्त्तिताः । वृषप्रभृतयो राजन् यादवाः पुण्यकर्मणः । वृषो वंशधरस्तस्य तस्य पुत्रो ऽभवन्मधुः । मधोः पुत्रश–

तेंवासी दृढधणस्य वंशजस्तत। इषणो हलयः सर्वे मधोस्क मथवः स्मृता॥ यादवा यदुना चाग्रे निरुच्यंते च हैहयाः॥ नतस्य विज्ञनाम्नः स्यान्नष्टं प्रतिलभेद्वसु॥ कार्त्तवीर्यस्य जो यन्म कथये दिह नित्यशः॥ एतयया तिपुत्राणां पंचवंशा विश्वापतेः॥ कीर्त्तिता लोकवीराणां येलोकान्धारयंतिवै॥ भूतानीव महाराज पंच स्थावरजंगमान्॥ श्रुत्वा पंचविसर्गं तु राजा धर्मार्थकोविदः॥ वशी नवति पंचानामात्मजानां तथेश्वरः॥ लभेत्पंच वराश्चैव दुर्लभानिह लौकिकान्॥ आयुः कीर्त्तिं तथा पुत्रमैश्वर्यं भूतिमेव च॥ धारणात् श्रवणाच्चैव पंचवर्ग भारत॥ क्रोष्टोस्तु शृणु राजेंद्र वंशमुत्तम पूरुषं॥ यदोर्वंशधरस्याथ यज्वनः पुण्यकर्मणः॥ क्रोष्टोर्हि वंशं श्रुत्वेमं सर्वपापैः प्रमुच्यते॥ यस्यान्ववाय जो विष्णुर्हरिर्वृष्णिकुलप्रभुः॥ ॥इति खिले पुहरिवंशे॥ ॥

वैशंपायन उवाच॥ गांधारी चैव माद्री च क्रोष्टोर्भार्ये बभूवतुः॥ गांधारी जनयामास अनमित्रं महाबलं॥ माद्री युधाजितं पुत्रं ततोन्यं देवमीढुषं॥ वंशस्त्रिधा ततो वृष्णीनां कुलवर्द्धनः॥ माद्र्याः पुत्रौ तु जज्ञाते श्रुतौ वृष्ण्यंधकावुभौ॥ जज्ञाते तनयौ वृष्णेः श्वफल्कश्चित्रकस्तथा॥ श्वफल्कस्तु महाराज धर्मात्मा यत्र वर्त्तते॥ नास्ति व्याधिभयं तत्र नावर्षणभयं तथा॥ कदाचित्काशिराजस्य विभो र्नरतसत्तम॥ त्रीणि वर्षाणि विषये ७१

नपा २

येनावर्षत्पाकशासनः सतत्रवासयामास श्वफल्कं परमार्चितं॥ श्वफल्कपरिवर्त्तेन ववर्ष हरिवाहनः॥ श्वफल्कः काशिराजस्य सुतां भार्यामविंदत॥ गांदिनी नाम सा गां तु ददौ विप्रेषु नित्यशः॥ सा मातुरुदरस्था तु बहून्वर्षगणान्किल॥ निवसंती न वै जज्ञे गर्भस्थां तां पिताब्रवीत्॥ जायस्व लघु भद्रं ते किमर्थमिह तिष्ठसि॥ प्रोवाच चैनं गर्भस्था कन्या गां च दिने दिने॥ यदि दद्यास्ततो जाये पितरं तिलिमुवाच ह॥ तथेत्युवाच तां तस्याः पिता काममपूरयत॥ दाता यज्वा च वीरश्च श्रुतवानतिथिप्रियः॥ अक्रूरः सुषुवे तस्मात् श्वफल्काद्भूरिदक्षिणः॥ उपमद्गुस्तथा मद्गुर्मृदरश्चारिमेजयः॥ अरिक्षिपस्तथा क्षेपः शत्रुघ्नोथारिमर्द्दनः॥ धर्मभृद्यतिधर्मा च धर्मो जाम्बस्तथांधकः॥ आवाहप्रतिवाहौ च सुंदरी च वरांगना॥ अक्रूरेणोग्रसेनायां स्वगायां कुरुनंदन॥ प्रसेनश्चोग्रसेनश्च जज्ञाते देववर्चसौ॥ चित्रकस्याभवन्पुत्राः पृथुर्विपृथुरेव च॥ अश्वग्रीवोऽश्वबाहुश्च सुपार्श्वकगवेषणौ॥ अरिष्टनेमिरश्वश्च सुधर्मा धर्मभृत्तथा॥ सुबाहुर्बहुबाहुश्च श्रविष्ठाश्रवणे स्त्रियौ॥ अश्मक्यां जनयामास शूरं वै देवमीढुषः॥ महिष्यां जज्ञिरे शूराद्भोज्यायां पुरुषा दश॥ वसुदेवो महाबाहुः

र्द्धमानकदुंदुभिः।जज्ञेजस्यप्रसूतस्यदुंदुभ्यःप्राणदन्दिवि।आनकानांचसंह्लादःसुमहानभवद्दिवि
पपातपुष्पवर्षंचशूरस्यभवनेमहत।मनुष्यलोकेकृत्स्नेस्मिन्रूपेणाप्रतिमोभुवि।यस्यासीत्पुरु
षाग्र्यस्यकांतिश्चंद्रमसोयथा।देवभागस्ततोजज्ञे।ततोदेवश्रवाःपुनः।अनाधृष्टिःकनकदोव-
त्समालवगृंजिमः।श्यामःशमीकोगंडूषःपंचचास्यवरांगनाः।पृथुकीर्तिःपृथाचैवश्रुतदेवाश्रु
तश्रवाः।राजाधिदेवीचतथापंचैतावीरमातरः।कृतस्यश्रुतदेवायांमगधःसुषुवेनृप।श्रुतश्रवा
यांचैद्यश्चशिशुपालोमहाबलः।हिरण्यकशिपुर्योसौदैत्यराजोऽभवत्पुरा।पृथुकीर्त्यांसंजज्ञे
तनयोवृद्धशर्मणः।करूषाधिपतिर्वीरोदंतवक्रोमहाबलः।पृथांदुहितरंचक्रेकुंतीतांपांडु
रावहत।शूरःसख्योऽथवृद्धायकुंतिभोजायतांददौ।तस्मात्कुंतीतिविख्याताकुंतिभोजात्मजा
शुभा।यस्यांसधर्मात्मजज्ञेधर्माज्जज्ञेयुधिष्ठिरः।भीमसेनस्तथावायोरिंद्राच्चैवधनंजयः।लोकप्र ७२
तिहितोवीरःशक्रतुल्यपराक्रमः।अनमित्रात्शिनिर्जज्ञेकनिष्ठाद्वृष्णिनंदनात।सेनयःस-

त्यकस्तस्माद्युयुधानश्चसात्यकिः।उद्धवोदेवभागस्यमहाभागःसुतोऽभवत्।पंडितानांपरंप्राहुर्देवश्र
वसमुद्भवं।अश्मक्यांप्राप्तवान्पुत्रमनाधृष्टिर्यशस्विनं।निवृत्तशत्रुंशत्रुघ्नंतदेवाव्यजायत।श्रुतदेवा
प्रजातस्तुनैषादिर्यःप्रतिश्रुतः।एकलव्योमहाराजनिषादैःपरिवर्द्धितः।वत्सायतेत्वपुत्रायवसुदे
वःप्रतापवान्।अद्भिर्ददौसुतंवीरंशौरिःकौशिकमौरसं।गंडूषायत्वपुत्रायविष्वक्सेनोददौसुता
चारुदेष्णंसुचारुंचपंचालंकृतलक्षणं।असंग्रामेणयोवीरोनावर्त्ततिकदाचन।रौक्मिणेयोम
हाबाहुःकनीयान्भरतर्षभ।वायसानांसहस्राणियंयांतंपृष्ठतोऽन्वयुः।चारुमांसानिजाद्याभिचा
रुदेष्णहतानिच।तंतिलसंतिपालश्चसुतौकनकदस्यतु।वीरश्चाश्वहनुश्चैववीरौतावथगृंजिमौ
श्यामपुत्रःसुमित्रस्तुनैषादिर्यःपरिश्रुतः।जुगुप्समानोभोजत्वाद्राज्यंस्वमवापसः।अजातशत्रुःश
त्रूणांजज्ञेतस्यविनाशनः।वसुदेवसुतान्वीरान्कीर्त्तयिष्यामितान्शृणु।वृष्णेस्त्रिविधमुत्पन्नंवंश
त्रा।एवंमहौजसंधारयन्विपुलंवंशंनानार्थैरिहयुज्यते।। ।।इतिखिलेषुहरिवंशे।।वैशंपायनउ
वाच।।याःपत्न्योवसुदेवस्यचतुर्दशवरांगनाः।पौरवीरोहिणीनाममदिराचतथापरा।वैशाखीवत

थानन्दासुनाम्नीनवपंचमी।।सहदेवात्वंतिदेवाश्रीदेवादेवरक्षिता।।वृकदेव्युपदेवीचदेवकीचापिसप्तमी।।सुत
नुर्द्धानवीचैवतथाहृपरिचारिके।।पौरवीरोहिणीनामवाल्हीकस्यात्मजाऽभवत्।।ज्येष्ठापत्नीमहाराजदयि
तानकदुंदुभेः।।लेभेज्येष्ठसुतंराममत्रारणंशठमेवच।।दुर्द्दमंदमनंश्रुभ्रंपिंडारकमुशीनरं।।चित्रानामकु
मारीचरोहिणीतनयानव।।चित्रासुभद्रेतिपुनर्विख्याताकुरुनंदन।।वसुदेवाच्चदेवक्यांजज्ञेशौरिर्महा
यशाः।।रामाचनिशठंजज्ञेरेवत्यादयितःसुतः।।सुभद्रायांरथीपार्थादभिमन्युरजायत।।अक्रूरात्काशिक
न्यायांसत्यकेतुरजायत।।वसुदेवस्यभार्यासुमहाभागासुसप्तसु।।जेपुत्राजज्ञिरेशूरानामतस्तान्निबो
धमे।।भोजश्चविजयश्चैवशांतिदेवीसुतावुभौ।।वृकदेवःसुनामायांगदश्चास्याःसुतावुभौ।।अगावहंमहा
त्मानंवृकदेवीव्यजायत।।कन्यात्रिगर्त्तरायस्यभर्त्ताचशिशिरायणः।।जिज्ञासांपौरुषेचक्रेनचस्कंदेऽथ
पौरुषं।।कृष्णायससमयप्रख्यावर्षेद्वादशकेतथा।।मिथ्याभिशप्तोगार्ग्यस्तुमन्युनाभिसमीरितः।।गोपक
न्यामुपादायमैथुनायोपचक्रमे।।गोपालीचाप्सरास्तस्यगोपस्त्रीवेषधारिणी।।धारयामासगार्ग्यस्यगर्भंदुर्द्धरं ७३
गर्भमच्युतं।।मानुष्यांगर्ग्यभार्यायांनियोगाच्छूलपाणिनः।।सकालयवनोनामजज्ञेराजामहाबलः।।वृ

षपूर्वार्द्धकायास्तमवहन्वाजिनोरणे।।अपुत्रस्यसराज्ञस्तुववृधेंऽतःपुरेशिशुः।।यवनस्यमहाराजसका
लयवनोऽभवत्।।सयुद्धकामोनृपतिःपर्यपृच्छद्द्विजोत्तमान्।।वृष्ण्यंधककुलंतस्यनारदोऽकथयत्प्र
भुः।।अक्षौहिणीभिःसैन्यस्यमथुरामभ्यगात्तदा।।दूतंचप्रेषयामासवृष्ण्यंधकनिवेशने।।ततोवृष्ण्यंधकाः
कृष्णंपुरस्कृत्यमहामतिं।।समेतामंत्रयामासुर्यवनस्यभयात्तदा।।कृत्वाचनिश्चयंसर्वेपलायनपरायणाः
विहायमथुरांरम्यांमानयंतःपिनाकिनं।।कुशस्थलींद्वारवतींनिवेशयितुमीप्सवः।।इतिकृष्णस्यजन्मे
दंयःशुचिर्नियतेंद्रियः।।पर्वसुश्रावयेद्विद्वान्अनृणःससुखीभवेत्।। ।।इतिश्रीखिलेषुहरिवंशे।।।।
वैशंपायनउवाच।।क्रोष्टोरेवाभवत्पुत्रोवृजिनीवान्महायशाः।।वृजिनीवत्सुतश्चापिस्वाहस्तोवदतांवरः।।स्वाही
स्वाहिपुत्रोऽभवद्राजारुषद्गुर्वदतांवरः।।महाक्रतुभिरीजेयोविविधैराप्तदक्षिणैः।।ततःप्रसूतिमिच्छ
न्वैरुषद्गुःसोऽन्यमात्मजं।।जज्ञेचित्ररथस्तस्यपुत्रःकर्मभिरन्वितः।।आसीच्चैत्ररथिर्वीरोयज्वाविपुलद
क्षिणः।।शशबिंदुःपरंवृत्तंराजर्षीणामनुष्ठितः।।पृथुश्रवाःपृथुयशाराजासीच्छाशबिंदुजः।।शंसंतिचपुरा
णज्ञाःपार्थश्रवसमंतरं।।अंतरस्यसुयज्ञस्तुसुयज्ञोतनयोऽभवत्।।उषतोयज्ञमखिलं।।स्वधर्मेसुखतांवरः

शिवाच्चुरभवत्पुत्र उषतः शत्रुतापनः। मरुतस्तस्य तनयो राजर्षिरभवन्नृप। मरुतोऽलभत श्रेष्ठं सुतं कंबलबर्हिषं
च कालेऽरविपुलं धर्ममेमर्षी सत्यनागियात्। सतं प्रसवमिछन्वै सुतं कंबलबर्हिषः। बभूव रुक्मकवचं
सुतः प्रसवतस्ततः। निहत्य रुक्मकवचः शतं कवचिनां रणे। धन्विनां निशितैर्बाणैरवाप श्रियमुत्तमां। जज्ञे
च रुक्मकवचात्पुत्रः परवीरहा। जज्ञिरे पंच पुत्रास्तु महावीर्याः पराजिताः। रुक्मेषुः पृथुरुक्मश्च ज्यामघ :
पालितो हरिः। पालितं च हरिं चैव विदेहेभ्यः पिता ददौ। रुक्मेषुरभवद्राजा पृथुरुक्मस्य संश्रयात्। ताभ्यां
प्रव्राजितो राजा ज्यामघोवसदाश्रमे। प्रशांतः स वनस्थस्तु ब्राह्मणेश्च प्रबोधितः। जगाम रथमास्थाय देशमन्यं
ध्वजी रथी। नर्मदाकूलमेकाकी नगरीं मृत्तिकावतीं। ऋक्षवंतं गिरिं जित्वा शुक्तिमत्यामुवास सः। ज्यामघ
स्याभवद्भार्य्या शैब्या बलवती सती। अपुत्रोऽपि च राजा सो नान्यां भार्य्यामविंदत। तस्य सहि जयायुद्धे तत्र कन्या
मवाप सः। भार्य्यामुवाच संत्रस्तः। स्नुषेति स नरेश्वरः। एतच्छ्रुत्वाब्रवीदेनं कस्य चेयं स्नुषेति वै। अब्रवीत्स्त
पश्चात्तु ज्यामघो राजसत्तमः। यस्ते जनिष्यते पुत्रस्तस्य भार्य्येति जातनीः। उग्रेण तपसा तस्याः कन्यायाः साव ७४
ड्डायत। पुत्रं विदर्भं शुभगा सैव्या परिणिता सती। राजपुत्रौ तु विद्वांसौ स्नुषायां क्रथकैशिकौ। पश्चाद्विदर्भो

ऽजनयच्छूरौ रणविशारदौ। भीमो विदर्भस्य सुतः कुंतिस्तस्यात्मजोऽभवत्। कुंतेर्धृष्टः सुतो जज्ञे रणधृष्टः प्र
तापवान्। धृष्टस्य जज्ञिरे शूरास्त्रयः परमधार्मिकाः। आवंतश्च दशार्हश्च बली विषहनश्च यः। दशार्हस्य सु
तो व्योमा व्योम्नो जीमूत उच्यते। जीमूतपुत्रो बृहतिस्तस्य भीमरथः सुतः। अथ भीमरथस्यासीत्पुत्रो नवरथस्त
था। तस्य चासीद्दृढरथः शकुनिस्तस्य चात्मजः। तस्मात्करंभः कारंभिर्देवरातोऽभवन्नृपः। देवक्षत्रोऽभव
त्तस्य दैवक्षत्रिर्महायशाः। देवगर्भसमो जज्ञे देवक्षत्रस्य नंदनः। मधूनां वंशकृद्राजा मधुर्मधुरवाग
पि। मधोर्जज्ञे तु वैदर्भ्यां पुरुद्वान्पुरुषोत्तमः। माता जज्ञे तु वैदर्भ्यां भद्रवत्यां कुरूद्वह। ऐक्ष्वाकी चाभवद्भार्य्या
मात्त्वतस्तस्यामजायत सत्वसत्त्वगुणोपेतः। सात्वतां कीर्तिवर्द्धनः। इमां विसृष्टिं विज्ञाय ज्यामघस्य महात्मनः।
युज्येत परया प्रीत्या प्रजावांश्चभवत्सुतः।। इति खिलेषु हरिवंशे ज्यामघसृष्टिः।। वैशंपायन उवाच।। सत्व
तो सत्वसंपन्नात् कौशल्या जनयत्सुतान्। भजिनं भजमानं च दिव्यं देवावृधं नृपं। अंधकं च महावाहुं वृष्णि
च यदुनंदनं। तेषां च सर्गाश्चत्वारो विस्तरेणेह तान् शृणु। भजमानस्य संजन्या वाह्यका चोपवाह्यकाः। आ
स्तां भार्ये तयोस्तस्माज्जज्ञिरे बहवः सुताः। निमिश्च कृमिणश्चैव वृष्णिः शूरः पुरंजयः। एते बाह्यकस्रंजिन्यां भज

मानाहिजज्ञिरे। अधुना जिन्महस्राणि छता जिब्राथ दासकः। उपवाधकसंजन्यां मरुजमानाहिजज्ञिरे। यज्ञा
देववृधो राजा चचार विपुलं तपः। पुत्रः सर्वगुणोपेतो मम स्यादिति निश्चितः। संयुज्यात्मानमेवं तु वर्णाशा
याजलं स्पृशन्। सदोपस्पृशतस्तस्य चकार प्रियमापगा। चिंतयाभिपरीता सा जगामैकविनिश्चयं। कल्या
णत्वान्नरपतेस्तस्य सा निम्नगोत्तमा। नाध्यगच्छत तां नारीं यस्यामेवंविधः सुतः। जायात तस्मात्स्वयं गत्वा न
वामस्य सहव्रता। अथ भूत्वा कुमारी सा बिभ्रती परमं वपुः। वरयामास नृपतिं तामियेष च स प्रभुः। तस्या
मधत्त गर्भं स तेजस्विनमुदारधीः। अथ वासु सुवमासि दत्रामे सरितां वरा। पुत्रं सर्वगुणोपेतं वभ्रुं देवा
वृधान्नृपात्। अत्र वंशे पुराणज्ञा गायन्तीति परिश्रुतं। गुणान्देवावृधस्यैव कीर्तयंतो महात्मनः। यथैव
शृणुमो दूरात्संपश्यामस्तथांतिके। वभ्रुः श्रेष्ठो मनुष्याणां देवैर्देवावृधः समः। षष्टिश्च षट् च पुरुषाः सहस्रा
णि च सप्त च। एतेऽमृतत्वं संप्राप्ता वभ्रोर्देवावृधादपि। यज्ञा दानपतिर्धीमान्ब्रह्मण्यः सुदृढायुधः। तस्यान्व
वायः सुमहान्भोजा ये मार्तिकावताः। अंधकात्काश्यदुहिता चतुरो लभतात्मजान्। कुकुरं भजमानं च ७५
शमं कंवलवर्हिषं। कुकुरस्य सुतो धृष्णुर्धृष्णोस्तु तनयस्तथा। कपोतरोमा तस्याथ तैत्तिरिस्तनयोऽभव

जज्ञे पुनर्वसुस्तस्मादभिजित्तु पुनर्वसोः। तस्य वै पुत्रमिथुनं बभूवाभिजितः किल। आहुकश्चाहुकी चैव ख्या
तौ ख्यातिमतां वरौ। इमांश्चोदाहरंत्यत्र गाथां प्रति तमाहुकं। श्वेतेन परिवारेण किशोरप्रतिमो महान्।
अशीतिचर्मणा युक्तः स नृपः प्रथमं व्रजेत्। नापुत्रवान्नाशतदो नासहस्रशतायुषः। नाशुद्धकर्मा
नायज्वा यो भोजमभितो व्रजेत्। पूर्वस्यां दिशि नागानां भोजस्य प्रययुः किल। सोपासंगानुकर्षाणां ध्वजि
नां सवरूथिनां। रथानां मेघघोषाणां सहस्राणि तथैव च। रूप्यकांचनकक्षाणां सहस्राणि दशैवं तु
व सहस्राणि उत्तरस्यां तथा दिशि। आभूमिपालान्भोजांस्तान्तिष्ठत्किंकिणीकिनः। आहुकं चाप्य
वंतिभ्यः स्वसारं ददुरंधकाः। आहुकस्य तु काश्यायां द्वौ पुत्रौ संबभूवतुः। देवकश्चोग्रसेनश्च देवगर्भसम।
वुभौ। देवकस्याभवन्पुत्राश्चत्वारस्त्रिदशोपमाः। देववानुपदेवश्च सुदेवो देवरक्षितः। कुमार्यः सप्त
स्यासन्वसुदेवाय ता ददौ। देवकी शांतिदेवा च सुदेवा देवरक्षिता। वृकदेव्युपदेवी च सुनाम्नी चैव सप्त
मी। नवोग्रसेनस्य सुतास्तेषां कंसस्तु पूर्वजः। न्यग्रोधश्च सुनामा च कंकः शंकुश्च भूमिपः। राष्ट्रपालोऽथ
सुतनुरनाधृष्टिश्च पुष्टिमान्। एषां स्वसारः पंचासन् कंसा कंसवती तथा। सुतनू राष्ट्रपाली च कंका चैव वरांग

नाः॥ उग्रसेनः सह पत्न्या व्याख्यातः कुकुरोद्भवः। कुकुराणामिमं वंशं धारयन्नमितौजसां। आत्मनो वि
पुलं वंशं प्रजावानाप्नुयान्नरः॥ ॥इति खिलेषु हरिवंशे॥ ॥वैशंपायन उवाच॥ भजमानस्य पुत्रोऽथो-
रथमुख्यो विदूरथः। राजाधिदेव्याः शूरस्तु विदूरथसुतोऽभवत्। राजाधिदेवपुत्राश्च जज्ञिरे वीर्यवत्तराः
दत्तानुदत्तौ बलिनौ शोणाश्वः श्वेतवाहनः। शमी दण्डशर्मा च दन्तशत्रुः शत्रुजित्। श्रवणा च श्रविष्ठा
च स्वसारौ संबभूवतुः। शमीपुत्रः प्रतिक्षत्रः प्रतिक्षत्रस्य चात्मजः। स्वयंभोजः स्वयंभोजाद्धृदिकः संबभू
व ह। तस्य पुत्रा बभूवुर्हि सर्वे भीमपराक्रमाः। कृतवर्माग्रजस्तेषां शतधन्वा तु मध्यमः। देवार्हश्च नराख्य
श्च भिषग्वैतरणश्च यः। सुदान्तश्च विदान्तश्च निःकामः कामदंभकः। देवार्हस्य तु पुत्रोऽभूद्विद्वान्कंबलब
र्हिषः। असमौजास्तथा वीरो नासमौजाश्च तावुभौ। अजातपुत्राय सुतान्प्रददावसमौजसे। सुदंष्ट्रं
च सुचारुं च कृष्णमित्यन्धकास्त्रयः। गांधारी चैव माद्री च क्रोष्टुभार्ये बभूवतुः। गांधारी जनयामास अनि
मित्रं महाबलं। माद्री युधाजितं पुत्रं ततो वै देवमीढुषं। अनमित्रमभित्राणां जेतारमपराजितं। अन ७५
मित्रसुतो निघ्नो निघ्नतो द्वौ बभूवतुः। प्रसेनश्चाथ सत्राजिच्छत्रुसेनाजितावुभौ। प्रसेनो द्वारवत्यां

तु निवसत्यां महामणिं दिव्यं स्यमन्तकं नाम सूर्यादुपलब्धवान्। तस्य सत्राजितः सूर्यः सखा प्राणसमो
ऽभवत्। स कदाचिन्निशापाये रथेन रथिनां वरः। तोयकूलमुपस्प्रष्टुमुपस्थातुं ययौ रविं। तस्योप
तिष्ठतः सूर्यो विवस्वानग्रतः स्थितः। अस्पष्टमूर्तिर्भगवांस्तेजोमण्डलवान्प्रभुः। अथ राजा विवस्वन्त
मुवाच स्थितमग्रतः। यथैव व्योम्नि पश्यामि सदा त्वां ज्योतिषां पते। तेजोमण्डलिनं देवं तथैव च पुरः
स्थितं। को विशेषोऽस्ति मे तत्र सख्येनोपगतस्य वा। एतच्छ्रुत्वा तु भगवान्मणिरत्नं स्यमन्तकं। स्वकं
ठादवमुच्यैकान्ते न्यबध्नाद्विभुः। ततो विग्रहवन्तं तं ददर्श नृपतिस्तदा। प्रीतिमानथ तं दृष्ट्वा मुहू
र्तं कृतवान्कथां। तमभिप्रस्थितं भूयो विवस्वन्तं स सत्राजित्। लोकान्भासयसे यस्मात्तं त्वमेव सततं प्र
भो। तदेतन्मणिरत्नं वै मे भगवन्दातुमर्हसि। ततः स्यमन्तकमणिं दत्तवान्स तु भास्करः। स तमाबध्य
नगरं प्रविवेशाथ महीपतिः। तं जनाः पर्यधावन्त सूर्योऽयं गच्छतीति ह। पुरीं विस्मापयित्वाथ राजा-
न्तःपुरं तथा। तत्प्रसेनजिते दिव्यं मणिरत्नं स्यमन्तकं। ददौ भ्रात्रे नरपतिः प्रेम्णा सत्राजिदुत्तमं। सम

णीं स्यंदते रुक्मं हत्त्यंधकिनिवेशने। कालवर्षीव पर्जन्यो न च व्याधिभयं भवेत्। लिप्सां चक्रे प्रसेनात्तु मणि
रत्नं स्यमंतकं। गोविंदो न च तं लेभे शक्तोपि न जहार ह। कदाचिन्मृगयां यातः प्रसेनस्तेन भूषितः। स्यमं
तककृते सिंहाद्वधं प्राप्य वनेचरात्। अथ सिंहं प्रधावंतमृक्षराजो महाबलः। निहत्य मणिरत्नं तदादाय
बिलमाविशत्। ततो वृष्ण्यंधकाः कृष्णं प्रसेनवधकारणात्। प्रार्थनां तां मणेर्बुद्ध्वा सर्व एव शशंकिरे। स शं
क्यमानो धर्मात्मा नकारी तस्य कर्मणः। आहरिष्ये मणिमिति प्रतिज्ञाय वनं ययौ। यत्र प्रसेनो मृगयां
अचरत्तत्र चाप्यथ। प्रसेनस्य पदं गृह्य पुरुषैराप्तकारिभिः। ऋक्षवंतं गिरिवरं विंध्यं च गिरिमुत्तमं। अन्वे
षयन्परिश्रांतः स ददर्श महामनाः। साश्वं हतं प्रसेनं च नाविंदच्चैव तं मणिं। अथ सिंहः प्रसेनस्य शरीर-
स्याविदूरतः। ऋक्षेण निहतो दृष्टः पादैरृक्षस्य सूचितः। पादैरन्वेषयामास गुहां ऋक्षस्य माधवः। मह
दृक्षबिले वाणीं शुश्राव प्रमदेरितां। धात्र्या कुमारमादाय सुतं जांबवतो नृप। क्रीडयंत्या मणि
ना मा रोदीरित्यथेरितां। ॥धात्र्युवाच॥ सिंहः प्रसेनमवधीत्सिंहो जांबवता हतः। सुकुमारक मा रोदीस्तव ७६
ह्येष स्यमंतकः। व्यक्तीकृतश्च शब्दः स तूर्णं बिलमाविशत्। प्रविश्य चापि भगवांस्तदृक्षबिलमंजसा। स्था

पयित्वा बिलद्वारि यदूंल्लांगलिना सह। शार्ङ्गधन्वा बिलस्थं तं जांबवंतं ददर्श ह। युयुधे वासुदेवस्तु बिले
जांबवता सह। बाहुभ्यामेव गोविंदो दिवसानेकविंशतिं। प्रविष्टे तु बिलं कृष्णे वसुदेवपुरस्सराः। पुनर्द्वा
रवतीमेत्य हतं कृष्णं न्यवेदयन्। वासुदेवस्तु निर्जित्य जांबवंतं महाबलं। लेभे जांबवतीं कन्यामृक्षराजस्य
सम्मतां। मणिं स्यमंतकं चैव जग्राहात्मविशुद्धये। अनुनीय ऋक्षराजानं निर्ययौ च ततो बिलाद्द्वारका
मगमत्कृष्णः सविनीतः पुरःसरैः। एवं स मणिमाहृत्य विशोध्यात्मानमच्युतः। ददौ सत्राजिते तं वै सर्वया
दवसंसदि। एवं मिथ्याभिशस्तेन कृष्णेनामित्रघातिना। आत्मा विशोधितः पापाद्विनिर्जित्य स्यमंतकं। स
त्राजितो दश त्वासन् भार्यास्तासां शतं सुताः। ख्यातिमंतस्त्रयस्तेषां भंगकारस्तु पूर्वजः। वीरो वातपतिश्चैव उ
पस्वावांस्तथैव च। कुमार्यश्चापि तिस्रो वै दिक्षु ख्याता नराधिप। सत्यभामोत्तमा स्त्रीणां व्रतिनी च दृढव्र
ता। तथा प्रस्वापिनी चैव भार्यां कृष्णाय तां ददौ। सभाक्षो भंगकारिस्तु नारेयश्च नरोत्तमः। यज्ञाते गुणसं
पन्नौ विश्रुतौ गुणसंपदा। माद्र्याः पुत्रस्य संजज्ञे वृष्णिपुत्रो युधाजितः। जज्ञाते तनयौ वृष्णेः स्वफल्कश्चित्र
कस्तथा। स्वफल्कः काशिराजस्य सुतां भार्यामविंदत। गांदिनी नाम तस्याथ गाः सदा प्रददौ पिता। तस्यां ज

त्रैतदावीरः श्रुतवानिनिनारत। अक्रूरोऽथ महानागो यज्ञो विपुलदक्षिणः। उपमद्गुस्तथा मद्गुर्मृद्गुरश्च।
रिमर्दनः। गिरिक्षिपस्तथा दोपः शत्रुहा वारिमेजयः। धर्मवृद्धश्चापि धर्मात्मा गृध्रमोजो लकस्तथा। सु
वाहुः प्रतिवाहुश्च सुंदरीच वरांगना। विश्रुता सांवमहिषी कन्या चास्य वसुंधरा। रूपयौवनसंपन्ना
सर्वसत्वमनोहरा। अक्रूरेणोग्रसेन्यां तु द्वौ सुतौ कुरुनंदन। सुदेवश्चोपदेवश्च जज्ञाते देववर्चसौ। चि
त्रकस्यानवसुताः पृथुर्विपृथुरेव च। अश्वग्रीवः सुवाहुश्च सुपार्श्वकगवेषिणौ। अरिष्टनेमस्तस्य सुता
धर्माधर्मैन्द्र एव च। सुवाहुर्वहुवाहुश्च श्रविष्ठा श्रवणा स्त्रियौ। इमां मिथ्याभिशस्तिं यः कृष्णस्य समुदा
हृतां। वेद मिथ्याभिशापास्तं न स्पृशंति कदाचन॥ ॥इति खिले पुहरिवंशे स्यमंतकप्रत्याख्यानं॥ ॥
वैशंपायन उवाच॥ यत्तत्सत्राजिते लब्धो मणिरत्नं स्यमंतकं। ददावाहरयामास वक्रुकेशतधन्व
ना। सदा हि प्रार्थयामास सत्यभामामनिंदितां। अक्रूरांतरमन्विच्छन्मणिं चैव स्यमंतकं। सत्राजि
तं ततो हत्वा शतधन्वा महाबलः। रात्रौ तं मणिमादाय ततोऽक्रूराय दत्तवान्। अक्रूरस्तु तदा रत्नमा ७७
दाय नरतर्षभ। समयं कारयांचक्रे नावेद्योऽहं त्वयेत्युत। वयमभ्युपपत्स्यामः कृष्णेन त्वां प्रधर्षितं। म

माद्य द्वारका सर्वा वशे तिष्ठत्यसंशयं। हते पितरि दुःखार्ता सत्यभामा यशस्विनी। प्रययौ रथमारुह्य नगरं वा
रणावतं। सत्यभामाथ तद्वृत्तं भोजस्य शतधन्वनः। भर्तुर्निवेद्य दुःखार्ता पार्श्वस्थाश्रूण्यवर्त्तयत। पांड
वानां तु दग्धानां हरिः कृत्वोदकं तथा। कुल्यार्थे चापि पांडूनां नियोजयत सात्यकिं। ततस्त्वरितमागत्य द्वा
रकां मधुसूदनः। पूर्वजं हलिनं श्रीमानिदं वचनमब्रवीत्। हतः प्रसेनः सिंहेन सत्राजिच्छतधन्वना। स्यमं
तकस्स मागामी तस्य प्रभुरहं प्रभो। तदारोह रथं शीघ्रं भोजं हत्वा महाबलं। स्यमंतको महाबाहो अस्माकं
स भविष्यति। ततः प्रववृते युद्धं तुमुलं भोजकृष्णयोः॥ शतधन्वा ततोऽक्रूरमवैक्षत्सर्वतो दिशं। संरब्धौ
तावुभौ दृष्ट्वा तत्र भोजजनार्दनौ। शक्तोपि शाठ्याद्धार्दिक्यं नाक्रूरोऽभ्युपपद्यत। अपयाने ततो बुद्धिं भोज
श्चक्रे तथा हितः। योजनानां शतं साग्रं हयया प्रत्यपद्यत। विख्यातहृदया नाम सतत्या जनगामिनी
भोजस्य वडवा राजन् यया कृष्णमयोधयत। क्षीणां जवेन हृदयामध्वनः शतयोजने। दृष्ट्वा रथस्य स्वं वृद्धिं
शतधन्वानमार्द्दयत्। ततस्तस्या हयायास्तु श्रमाद्दुःखाच्च भारत। खमुत्पेतु रथप्राणाः कृष्णो राममथा
ब्रवीत्। तिष्ठस्वेह महाबाहो दृष्टदोषा हया मम। पद्भ्यां गत्वा हरिष्यामि मणिरत्नं स्यमंतकं। पद्भ्यामेव

ततो गत्वा शतधन्वानमच्युतः। मिथिलामभितो राजन् जघान परमास्त्रवित्। स्यमंतकं न चापश्यद्धत्वा
भोजं महाबलं। निवृत्तं चाब्रवीत्कृष्णं रत्नं देहीति लांगली। नास्तीति कृष्णश्चोक्तो वै ततो रामो रुषान्वितः
धिक्शब्दमसकृत्कृत्वा प्रत्युवाच जनार्दनं। भ्रातृत्वान्मर्षयाम्येष स्वस्ति तेऽस्तु व्रजाम्यहं। कृत्यं न मे द्वारक
या न त्वया न च वृष्णिभिः। प्रविवेश ततो रामो मिथिलामरिमर्दनः। सर्वकामैरुपहृतैर्मैथिलेनाभिपूजि
तः। एतस्मिन्नेव काले तु बभ्रुर्मतिमतां वरः। नानारूपान्क्रतून्सर्वानाजहार निरर्गलान्। दीक्षाम
यं स कवचं रक्षार्थं प्रविवेश ह। स्यमंतककृते राजा गांदीपुत्रो महायशाः। अथ रत्नानि चान्यानि द्रव्या
णि विविधानि च। षष्टिं वर्षाणि धर्मात्मा यज्ञेष्वेव न्ययोजयत्। अक्रूरयज्ञा इति ते ख्यातास्तस्य महात्मनः
बह्वन्नदक्षिणाः सर्वे सर्वकामप्रदायिनः। अथ दुर्योधनो राजा स गत्वा मिथिलां प्रभुः। गदाशिक्षां ततो
दिव्यां बलभद्रादवाप्तवान्। प्रसाद्य तु ततो रामो वृष्ण्यंधकमहारथैः। आनीतो द्वारकामेव कृष्णेन च महा
त्मना। अक्रूरस्त्वंधकैः सार्द्धमयायात्पुरुषर्षभ। हत्वा सत्राजितं युद्धे सहबंधुं महाबली। ज्ञातिभेदभ ७८
या कृष्णस्तमुपेक्षितवानथ। अपयाते तथाऽक्रूरे नावर्षत्पाकशासनः। अनावृष्ट्या तदा राष्ट्रमभवद्

बहुधा कृशं। ततः प्रसादयामासुरक्रूरं कुक्कुरांधकाः। पुनर्द्वारवतीं प्राप्ते तस्मिन्दानपतौ तदा। प्रववर्ष सहस्रा
क्षः कक्षे जलनिधेस्तथा। कन्यां च वासुदेवाय स्वसारं शीलसंमतां। अक्रूरः प्रददौ धीमान्प्रीत्यर्थं कुरु
नंदन। अथ विज्ञाय योगेन कृष्णो बभ्रुगतं मणिं। सभामध्यगतं प्राह तमक्रूरं जनार्दनः। यत्तद्रत्नं मणिवरं
तव हस्तगतं विभो। तत्प्रयच्छस्व मानार्ह मयि मानार्यकं कृथाः। षष्टिवर्षे गते काले यद्रोषोऽभून्ममान
घ। स संरूढोऽसकृत्प्राप्तस्ततः कालात्ययो महान्। ततः स कृष्णवचनात्सर्वसात्वतसंसदि। प्रददौ तं मणिं
बभ्रुरक्लेशेन महामतिः। ततस्तमार्जवात्प्राप्तं बभ्रोर्हस्तादरिंदमः। ददौ हृष्टमनाः कृष्णस्तं मणिं बभ्रवे पुन :
स कृष्णहस्तात्संप्राप्तं मणिरत्नं स्यमंतकं। आबध्य गांदिनीपुत्रो विरराजांशुमानिव॥ ॥इति खिलेषु हरिवं
शे सोमवंशसमुद्भवः॥ ॥जनमेजय उवाच॥ प्रादुर्भावान्पुराणेषु विष्णोरमिततेजसः। सतां कथयता
मेवं वाराह इति नः श्रुतं। न जाने तस्य चरितं न विधिं नैव विस्तरं। न कर्मगुणसंतानं न हेतुं न मनीषि
तं। किमात्मको वराहः स का मूर्त्तिः का च देवता। किमाचारः प्रभावो वा किं वा तेन पुरा कृतं। यज्ञार्थं स
मवेतानां मिषतां च द्विजन्मनां। महावाराहचरितं कृष्णद्वैपायनेरितं। यथा नारायणो ब्रह्मन्वाराहं रूप

मास्थितः। दंष्ट्रया गां समुद्धृष्टा भुजहारारिसूदनः॥ विष्णुरेणेव कर्म्माणि कुशलस्यारिपुघातनः। श्रोतुमिच्छामि शे
षाणि हरेः कुशलस्य धीमतः। कर्म्मणा मानुषेणैव प्राकृतेनाव्ययेविना॥ याचास्य प्रकृतिर्ब्राह्मी तां व्या-
ख्यातु महेसि। कथं च भगवान् विष्णुः सुरेशो रिपुसूदनः। वसुदेवकुले धीमान् सोवासुदेवत्वमागतः। अम
रैरावृतं पुण्यं पुण्यकृद्भिरलंकृतं। देवलोकं समुत्सृज्य मर्त्यलोकमिहागतः। देवमानुषयोर्नेता ह्यनुर्वाश्च
नवा विष्णुः किमर्थं दिव्यमात्मानं मानुष्ये संनियोजत। यश्चक्रं वर्त्तयत्येको मानुषाणां मनोमयं। मानुष्ये स क
थं बुद्धिं चक्रे चक्रभृतां वरः। गोपायनं यः कुरुते जगतः सर्वलौकिकं। स कथं गां गतो देवो विष्णुर्गोपत्वमा
गतः। महाभूतानि भूतात्मा यो दधार चकार ह। श्रीगर्भः स कथं गर्भे स्त्रिया भूचरया धृतः। येन लोकान् क्रमै
र्जित्वा त्रिभिस्त्रींस्त्रिदशेप्सया। स्थापिता जगतो मार्गास्त्रिवर्गाः प्रभवास्त्रयः। योऽन्तकाले जगत्पीत्वा कृ
त्वा तोयमयं वपुः। लोकमेकार्णवं चक्रे दृश्यपादृश्यपनवर्त्तनः। यः पुराणः पुराणात्मा वाराहं रूपमास्थितः। वि ७२
षाणाग्रेण वसुधामुज्जहारारिसूदनः। यः पुरा पुरुहूतार्थे त्रैलोक्यमिदमव्ययं। जिगाय ददौ वसुमतीं सुरा
णां सुरसत्तमः। येन सैंहं वपुः कृत्वा द्विधा कृत्वा च तत्पुनः। पूर्वं दैत्यो महावीर्यो हिरण्यकशिपुर्हतः। यः पुरा

ध्वनलोऽर्ण्णवाग्निर्वा संवर्त्तको विभुः। पातालस्थोऽर्णवगते पपौ तोयमयं हविः। सहस्रशिरसं चैव सहस्रांशु
सहस्रवसः। सहस्रचरणं देवं यमाहुर्वै युगे युगे। नाभ्यरण्यां समुत्पन्नं यस्य पैतामहं गृहं। एकार्णवगते
लोके नष्टे स्थावरजंगमे। येन ते निहता दैत्याः संग्रामे तारकामये। सर्वदेवमयं कृत्वा सर्वायुधमयं
वपुः। गरुडस्थेन चोन्मत्तः कालनेमिर्निपातितः। निर्जितश्च महादैत्यस्तारकश्च महासुरः। उत्तरान्तं स
मुद्रस्य क्षीरोदस्यामृतोदधेः। यः शेते शाश्वतं योगमास्थाय तिमिरं महत्। सुरारणी गर्भमधत्त दिव्यं तपः
प्रकर्षाद् दितिः पुरा। यां शक्रं च यो दैत्यमणावरूहं गर्भो वधनेन कृतं चकार। पदानि यो लोकमयानि
कृत्वा चकार दैत्यान् सलिलाशयस्थान्। कृत्वा च देवांश्चक्रे सुरेशं त्रिदशाधिपत्ये। पात्राणि दक्षिणा
दीक्षां चमसोलूखलानि च। गार्हपत्येन विधिना अन्वाहार्येण कर्म्मणा। अग्निमाहवनीयं च वेदीं चै
व कुशांस्रुचं। प्रोक्षणीयं ध्रुवं चैव आवभृथ्यं तथैव च। आश्राद्धानि त्रीणि यश्चक्रे हव्यः कव्यप्रदान् मखे।
हव्यादांश्च सुरान् यज्ञे कव्यादांश्च पितॄनपि। भागार्थे मंत्रविधिना यश्चक्रे मंत्रकर्म्मणा। यूपान् समित्सु
शं सोमं पवित्रान् परिधीनपि। याज्ञीयानि च द्रव्याणि यज्ञांश्च सचयानलान्। सदस्यान् यजमानांश्च मेधा

दीवक्रतन्तमान्‌। विचनाय पुरा सर्वं पारमेष्ठ्येन कर्म्मणा। युगानुरूपं यः कृत्वा लोकाननुपरिक्रमान्‌। क्षणा लवाश्च का
ष्ठाश्च कलास्त्रैकाल्यमेव च। मुहूर्त्तास्तिथयो मासाः पक्षाः संवत्सरास्तथा। ऋतवः कालयोगाश्च प्रमाणं त्रिविधं
त्रिषु। आयुःक्षेत्राण्युपचयो लक्षणं रूपसौष्ठवं। त्रयो वर्णास्त्रयो लोकास्त्रैविद्यं पावकास्त्रयः। त्रैकाल्यं त्री
णि कर्म्माणि त्रयो पापा त्रयो गुणाः। सृष्टा लोकास्त्रयो ऽनन्ता येनानन्तेन वर्त्मना। सर्वभूतगणाः सृष्टाः सर्वभू
तगुणात्मका। ह्याम्यामिंद्रियसर्वेण योगेन रमते च यः। गतागतिर्न्यायेनेता सर्वत्रउ गतीश्वरः। यो गतिर्यो
गयुक्तानामगतिः पापकर्म्मणां। चातुर्वर्ण्यप्रभवश्च चातुर्होत्रस्य रक्षिता। चातुर्विद्यस्य वेत्ता च चातुराश्र
मसंश्रयः। दिगंतरो नभो भूमिर्वायुरापो विभावसुः। चंद्रसूर्यसमज्योतिर्योगांशः क्षणदान्तकश्च यः परं
श्रूयते ज्योतिर्यः परं श्रूयते तपः। यः परं प्राकृतः परं यः परः परमात्मवान्‌। आदित्यादिस्तु यो देवो यश्च दैत्यान्त-
को विभुः। युगान्तेष्वन्तको यश्च यश्च लोकान्तकारकः। सेतुर्यो लोकसेतूनां मेध्यो यो मेध्यकर्म्मणां। वेद्यो यो
वेदविदुषां प्रभुर्यः प्रभवात्मनां। सोमभूतश्च सौम्यानां अग्निभूतो ऽग्निवर्चसां। मानुषाणां मनोभूतस्त
पसां च तपस्विनां। विनयो नयवृत्तानां तेजस्तेजस्विनामपि। स्वर्गकारश्च सर्गाणां लोकहेतुरनुत्तमः। ८०

विग्रहो विग्रहार्हाणां गतिर्गतिमतामपि। आकाशप्रभवो वायुर्वायुप्राणो हुताशनः। देवा हुताशनप्राणाः प्रा
णो ऽग्नेर्मधुसूदनः। रसात्तु शोणितं संभूतिः शोणितान्मांसमुच्यते। मांसान्मेदसो जन्म मेदसो ऽस्थीनि चोच्य
ते। अस्थ्नो मज्जा संभवति ततः शुक्रं प्रवर्त्तते। शुक्राद्गर्भः सम्भवत्य समूलेन कर्म्मणा। तत्रापां प्रथमो भागः
स सौम्यो राशिरुच्यते। गर्भोष्मा संभवो ज्ञेयो द्वितीयो राशिरुच्यते। शुक्रं सोमात्मकं विद्यादार्त्तवं पावकात्म
कं। भावा रसात्मका ज्ञेया वीर्यं च शशिपावकैः। कफवर्गो भवेच्छुक्रं पित्तवर्गश्च शोणितं। कफस्य हृदयं स्थानं
पित्तं नाभ्यां प्रतिष्ठितं। देहस्य मध्ये हृदयं स्थानं तन्मनसः स्मृतं। नाभिकोष्ठान्तरं यत्तु तत्र देवो हुताशनः। म
नः प्रजापतिर्ज्ञेयः कफः सोमो विभाव्यते। पित्तमग्निः स्मृतमेतदग्निसोमात्मकं जगत्‌। एवं प्रवर्त्तितो गर्भो वर्द्धि
ते फेनितः। वायुः प्रवेशं संचक्रे संगतः परमात्मना। ततो ऽङ्गानि विसृजन्ति बिभर्ति परिवर्त्तयन्‌। स पंचधा श
रीरस्थो भिद्यते वर्त्तते पुनः। प्राणो ऽपानः समानश्च उदानो व्यान एव च। प्राणो ऽस्य प्रथमं स्थानं वर्णयन्परिवर्त्त
ते। अपानः पश्चिमं कायमुदानो ऽर्द्धं शरीरिणः। व्यानो व्यायच्छते येन समानः संनिवर्त्तते। भूतावाप्तिस्तत
स्य जायते इन्द्रियगोचरा। पृथिवी वायुराकाशमापो ज्योतिश्च पंचमं। तस्येन्द्रियनिविष्टानि स्वं स्वं योगं प्रचक्र

रे। पार्थिवं देहमाकुर्वन्प्राणात्मानं च मारुतं। छिद्राण्याकाशयोनीनि जलस्रावं प्रवर्त्तते। ज्योतिश्चक्षु
र्धि तेजो ह्यात्मा तेषां यंता मनः स्मृतं। ग्रामाश्च विषयाश्चैव यस्य वीर्य्यात्प्रवर्त्तिताः। इत्येतान्पुरुषान्सर्वान्स
ज ल्लोकान्सनातनान्। कथं लोके नृधनेऽस्मिन्नरत्वं विष्णुरागतः। एष मे संशयो ब्रह्मन् एष मे विस्मयो
महान्। कथं गतिर्गतिमतामापन्नो मानुषीं तनुं। कृतान्तस्स्य संवस्य सर्वेषां चैव सत्तमः। श्रोतुमिच्छामि
विष्णोस्त्वद्धीनां तु यथाक्रमे। आश्चर्यं परमं विष्णुर्देवदैत्यैश्च कथ्यते। विष्णोरुत्पत्तिमाश्चर्यं ममाचक्ष्व
महामुने। एतदाश्चर्यमाख्यानं कथयस्व सुखावहं। प्रख्यातबलवीर्यस्य विष्णोरमिततेजसः। कर्म्मणा
श्चर्यभूतस्य विष्णोस्तत्त्वमिहोच्यते॥ ॥इति हरिवंशे प्रादुर्भावप्रश्नः॥ ॥वैशंपायन उवाच॥ प्रश्नभारो
महांस्तात त्वयोक्तः शार्ङ्गधन्विनः। यथाशक्ति प्रवक्ष्यामि श्रूयतां वैष्णवं यशः। विष्णोः प्रभावश्रवणे दि
ष्ट्या ते मतिरुत्थिता। हंत विष्णोः प्रवृत्तिं च शृणु दिव्यां मयोरितां। सहस्रास्यं सहस्राक्षं सहस्रचरणं च यत्। सहस्र
शिरसं देवं सहस्रकरमव्ययं। सहस्रजिह्वं भास्वन्तं सहस्रमुकुटं प्रभुं। सहस्रदं सहस्रादिं सहस्रभु
जमव्ययं। सवनं हवनं चैव हव्यं होतारमेव च। पात्राणि च पवित्राणि वेदीं दीक्षां चरुं चिरं। स्रुकुमामं ५९

BHAU DAJI MEMORIAL

स्रुग्भुमुशलं प्राग्वंशं दक्षिणायनं। अध्वर्य्युं सामगं विप्रं सदस्यं सदनं सदः। यूपं समित्कुशं दर्वीं चमसोलूखल
नि च। प्रायश्चित्तानि चार्थं च स्थंडिलानि कुशास्तथा। मंत्रयज्ञवहं वह्निं भागं भागवहं च यत्। अग्रेभुजं सो
मभुजं हुतार्चिषमुदायुधं। आयुर्वेदविदो विप्रा यज्ञं तत्र प्रचक्षते। तस्य विष्णोः सुरेशस्य श्रीवत्सांकस्य धी
मतः। प्रादुर्भावाः सहस्राणि अतीतानि न संशयः। भूतश्चैव भविष्यन्ति एवमाह प्रजापतिः। यत्पृच्छसि महारा
ज पुण्यां दिव्यां कथामिमां। यदर्थं भगवान्विष्णुः सुरशत्रुनिषूदनः। देवलोकं समुत्सृज्य वसुदेवकुले
भवत्। तत्तेऽहं संप्रवक्ष्यामि शृणु सर्वमशेषतः। वासुदेवस्य माहात्म्यं चरितं च महाद्युतेः। हितार्थं सुरमर्त्या
लो॰रू॰ नां प्रभवाय च वा विकृताः सर्वे भूतात्मा प्रादुर्भवति कार्यतः। प्रादुर्भावान्प्रवक्ष्यामि पुण्यान्दिव्यगुणैर्यु
२ १ तान्। छंदसामीनिरुदारा निःश्वसिति निःसमलं गतान्। शुचिः प्रयत्नवान्भूत्वा निबोध जनमेजय। इदं पु
राणं परमं पुण्यं वेदैश्च समितं। हंत ते कथयिष्यामि विष्णोर्दिव्यां कथां शृणु। यदा यदा हि धर्मस्य ग्लानि
र्भवति भारत। धर्मसंस्थापनार्थाय तदा संभवति प्रभुः। तस्यैका महाराज मूर्त्तिर्भवति सत्तम। नित्यं दिवि
ष्ठा या राजन्तपश्चरति दुश्चरं। द्वितीया चास्य शयने निद्रायोगमुपाययौ। प्रजासंहारसर्गार्थं किमध्यात्म

विचितकं।सृष्ट्वायुगसहस्रंयःप्रादुर्भवतिकार्यवान्।सर्वंयुगसहस्रेषुदेवदेवोजगत्पतिः॥पितामहोलोक
पालश्चंद्रादित्यौकृतात्मनः।देवाःसमर्पयश्चैवकश्चमहाबलः।वायुःसमुद्राःशैलाश्चतस्यदेहंसमाश्रि
ताः।सनत्कुमारश्चमहात्मनावामहाबुर्महात्मानगवान्प्रजाकरः।पुराणदेवोऽथपुराणिचक्रेप्रदीप्तवै
श्वानरतुल्यतेजाः।जेनचार्णवमध्यस्थोनष्टस्थावरजंगमे।नष्टदेवासुरगणेप्रनष्टोरगराक्षसे।योहकामा
धुकृहषौदानवौमधुकैटभौ।हतौप्रनवतातेनतयोर्हत्वामितस्वरं।पुराकमलनाभस्यस्वपनःसागरां
भसि।पुष्करेयत्रसंभूतादेवाःसर्षिगणाःपुरा।एषपौष्करकोनामप्रादुर्भावोमहात्मनः।पुराणंकथ्यतेयत्र
वेदश्रुतिसमाहितं।वाराहस्कश्रुतिमुखः।प्रादुर्भावोमहात्मनः।यत्रविष्णुःसुरश्रेष्ठोवाराहंरूपमास्थि
तः।महीसागरपर्यंतांसशैलवनकाननां।वेदपादोयूपदंष्ट्रःक्रतुहस्तश्चितीमुखः।अग्निजिह्वादर्भ
रोमाब्रह्मशीर्षोमहातपाः।अहोरात्रेक्षणोदिव्योवेदांगःश्रुतिभूषणः।आज्यनासःश्रुवःस्कंडःसाम
घोषस्वनोमहान्।धर्मसत्यमयःश्रीमान्क्रमविक्रमसत्कृतः।प्रायश्चित्तनखोवीरःपशुजानुर्महाबाहु
जः।उद्गातांत्रोहोमलिंगः।फलबीजमहौषधिः।वाय्वंतरात्मामंत्रस्फिग्विधिकृतःसोमशोणितः।[illegible] ८२
वेद

स्कंधोहविर्गंधिर्हव्यकव्यातिवेगवान्।प्राग्वंशकायोद्युतिमान्नानादीक्षाभिरन्वितः।दक्षिणाहृदयोयो
गीमहासत्रमयोमहान्।उपाकर्मोष्टरुचकः।प्रवर्ग्यावर्तभूषणः।नाना[illegible]पथोगुह्योपनिषदा
सनः।छायापत्नीसहायोवैमेरुशृंगइवोच्छ्रितः।महीसागरपर्यंतांसशैलवनकाननां।एकार्णवजले
मग्नांएकार्णवगतांप्रभुः।दंष्ट्रयायःसमुद्धृत्यलोकानांहितकाम्यया।सहस्रशीर्षदेवादिश्चकारपृथिवी
पुनः।एवंयज्ञवराहेणभूत्वाभूतहितार्थिना।उद्धृतापृथिवीसर्वासागरांबुधरापुरा।वाराहएषकथितो
नारसिंहमतःशृणु।यत्रभूत्वामृगेंद्रेणहिरण्यकशिपुर्हतः।पुराकृतयुगेराजन्सुरारिर्बलदर्पितः।दै
त्यानामादिपुरुषश्चकारतपउत्तमं।दशवर्षसहस्राणिदशवर्षशतानिच।जलोपवासस्थश्चासीत्स्थान
मौनदृढव्रतः।ततःशमदमाभ्यांचब्रह्मचर्येणचानघ।ब्रह्माप्रीतिमनास्तस्यतपसानियमेनच।तंवै
स्वयंभूर्भगवान्स्वयमागम्यभूपते।विमानेनार्कवर्णेनहंसयुक्तेनभास्वता।आदित्यैर्वसुभिःसाध्यैर्म
रुद्भिर्दैवतैरपि।रुद्रैर्विश्वसहायैश्चयक्षराक्षसकिन्नरैः।दिशाभिर्विदिशाभिश्चनदीभिःसागरैस्तथा
नक्षत्रैश्चमुहूर्तैश्चखेचरैश्चमहाग्रहैः।देवर्षिभिस्तपोवृद्धैःसिद्धैःसप्तर्षिभिस्तथा।राजर्षिभिःपुण्यतमैर्गं

धर्व्वैरप्सरोगणैः। चराचरगुरुः श्रीमान् वृतः सर्वैः सुरैस्तथा। ब्रह्मा ब्रह्मविदां श्रेष्ठो दैत्यं वचनमब्रवीत्। प्रीतो
ऽस्मि तव भक्तस्य तपसाऽनेन सुव्रत। वरं वरय भद्रं ते यथेष्टं काममाप्नुहि॥ ॥हिरण्यकशिपुरुवाच
न देवासुरगंधर्वा न यक्षोरगराक्षसाः। न मानुषाः पिशाचा वा निहन्युर्मां कथंचन। ऋषयो वा न मां शा
पैः क्रुद्धा लोकपितामह। शपेयुस्तपसा युक्ता वर एतद्वृणोम्यहं। न शस्त्रेण न चास्त्रेण गिरिणा पादपेन
च। न शुष्केण न चार्द्रेण स्यान्न चान्येन मे वधः॥ पाणिप्रहारेणैकेन सभृत्यबलवाहनं। यो मां नाशयितुं श
क्तः स मे मृत्युर्भविष्यति। भवेयमहमेवार्कः सोमो वायुर्हुताशनः। सलिलं चान्तरिक्षं च नक्षत्राणि दिशो
दश। अहं क्रोधश्च कामश्च वरुणो वासवो यमः। धनदश्च धनाध्यक्षो यक्षः किंपुरुषाधिपः॥ ॥ब्रह्मोवा
च। एते दिव्या वरास्तात मया दत्तास्तवाद्भुताः। सर्वान्कामानिमांस्तात प्राप्स्यसि त्वं न संशयः। एवमुक्त्वा तु भग
वान् जगामाकाशमेव च। वैराजं ब्रह्मसदनं ब्रह्मर्षिगणसेवितं। श्रुत्वा देवा वरं दत्तं सलिलयोनिना
विभुं विज्ञापयामासुर्देवाः शक्रपुरोगमाः॥ ततो देवाश्च नागाश्च गंधर्वा मुनयस्तथा। वरप्रदानं श्रुत्वैव पिता
महमुपस्थिताः॥ ॥देवा ऊचुः॥ वरेणानेन भगवान् वधिष्यति स नोऽसुरः। तत्प्रसीदस्व भगवन् वधोऽ ८३

स्याभिविचिंत्यतां। भगवान्सर्वभूतानां स्वयंभूरादिकृद्विभुः। स्रष्टा च हव्यकव्यानामव्यक्तप्रकृतिर्ध्रुवः।
ततो लोकहितं वाक्यं श्रुत्वा देवः प्रजापतिः। प्रोवाच भगवान्वाक्यं सर्वान्देवगणांस्तथा। अवश्यं त्रिद
शास्तेन प्राप्तव्यं तपसः फलं। तपसोऽन्ते स भगवान्वधं विष्णुः करिष्यति। एतच्छ्रुत्वा सुराः सर्वे वाक्यं पंक
जसंभवात्। स्वानि स्थानानि दिव्यानि जग्मुस्ते वै मुदायुताः। लब्धमात्रे वरे चापि सर्वाः सोऽबाधत प्रजाः।
हिरण्यकशिपुर्दैत्यो वरदानेन दर्पितः। आश्रमेषु महाभागान्मुनीन्वै संशितव्रतान्। सत्यधर्मपरा
न्दांतान्पुरा धर्षितवांस्तु सः। देवांस्त्रिभुवनस्थांश्च पराजित्य महासुरः। त्रैलोक्यं वशमानीय स्वर्गे वस
ति दानवः। यदा वरमदोन्मत्तो न्यवसद्दानवो दिवि। याज्ञीयान्कृतवान्दैत्यान्देवांश्चैवाप्ययज्ञियान्। तदा आदि
त्याश्च ततो रुद्रा विश्वेऽथ वसवस्तथा। शरण्यं शरणं विष्णुमुपतस्थुर्महाबलं। देवं यज्ञमयं ब्रह्म ब्रह्मदेवं सना
तनं। भूतं भव्यं भविष्यं च प्रभुं लोकनमस्कृतं। नारायणं प्रभुं देवाः शरण्यं शरणं गताः॥ ॥देवा ऊचुः॥ त्रा
यस्व नोऽद्य देवेश हिरण्यकशिपोर्भयात्। त्वं हि नः परमो देवस्त्वं हि नः परमो गुरुः। त्वं हि नः परमो धाता ब्र
ह्मादीनां सुरोत्तम। उत्फुल्लांबुजपत्राक्ष शत्रुपक्षक्षयावह। क्षयाय दितिवंशस्य शरणं त्वं भवस्व

नः॥ ॥विष्णुरुवाच॥ भयंत्यजध्वममराः अभयंवोददाम्यहं। तथैवत्रिदिवंदेवाः प्रतिपत्स्यथमाचिरं। एषतंस
गणंदैत्यंवरदानेनदर्पितं। अवध्यममरेंद्राणांदानवेंद्रंनिहन्म्यहं॥ ॥वैशंपायनउवाच॥ एवमुक्त्वा
सभगवान्विसृज्यत्रिदशेश्वरान्। हिरण्यकशिपोराज्ञोनृतोजगामहरिःसभां। नरस्यकृत्वार्द्धतनुं
सिंहस्यार्द्धतनुंप्रभुः। नारसिंहेनवपुषापाणिंसंस्पृश्यपाणिना। जीमूतघनसंकाशोजीमूतघनवा
निस्वनः। जीमूतघनदीप्तौजाजीमूतइववेगवान्। दैत्यंसोतिवलंदृप्तंदृप्तशार्दूलविक्रमं। दृप्तैर्दैत्यग
१०प णैर्गुप्तंहतवानेकपाणिना। नृसिंहःकथितोह्येषवामनोऽपरः। यत्रवामनमाश्रित्यरूपंदैत्यविना पं
शनं। वलेर्बलवतोयज्ञेवलिनाविष्णुनापुरा। विक्रमैस्त्रिभिरक्षोभ्याःक्षोभितास्तेमहासुराः॥ विप्रचि
त्तिःशिविःशंकुरयःशंकुस्तथैवच। अयःशिराअश्वशिराहयग्रीवश्चवीर्यवान्। वेगवान्केतुमानुग्रः
सोऽग्रव्ययोमहासुरः। पुष्करःपुष्कलश्चैवशाश्वोऽश्वपतिरेवच। प्रह्लादोऽश्वशिराःकुंभःसंह्रादोगगन
प्रियः। अनुह्रादोहरिहरौवराहःसंवरोऽहरः। शरभःशलभश्चैवकुपनःकोपनःक्रथः। बृहत्कीर्तिर्म ८४
हाजिह्वः। शंकुकर्णोमहास्वनः। दीर्घजिह्वोऽर्कनयनोमृदुचापोमृदुप्रियः। वायुर्यविष्ठोनमुचिःसंव

रोविष्वरोमहाश्चचंद्रहन्ताक्रोधहन्ताक्रोधवर्द्धनएवचकालकःकालकेयश्चवृत्रःक्रोधोविरोचनः। गविष्ठश्चप्र-
विष्टश्चप्रलंबनरकावुभौ। इंद्रतापनवातापीकेतुमांवलदर्पितः। असिलोमाप्रलोमाचवाष्कलःप्रमदोमदः
शृगालवदनःकरालःकेशिकापरः। एकाक्षश्चंद्रहाराहुःसंह्रादोमधुरस्वनः। शतघ्नीचक्रहस्ताश्चतथाप
रिघपाणयः। अश्ममयंत्रायुधोपेताभिंडिपालायुधास्तथा। शूलोलूखलहस्ताश्चपरश्वधधरास्तथा। पाशमुद्गर
हस्ताश्चतथामुशलपाणयः। महाशिलाप्रहरणाःशूलहस्ताश्चदानवाः। नानाप्रहरणाघोरानानावेषामहाज
वाः। कूर्मकुक्कुटवक्त्राश्चशशोलूकमुखास्तथा। खरोष्ट्रवदनाश्चैववराहवदनास्तथा। भीमामकरवक्त्राश्चक्रो
ष्टुवक्त्राश्चदानवाः। आखुदर्दुरवक्त्राश्चघोरावृकमुखास्तथा। मार्जारगजवक्त्राश्चमहावक्त्रास्तथापरे। नक्रमे
षाननाःशूरागोऽजाविमहिषाननाः। गोधाशल्यकवक्त्राश्चक्रौंचवक्त्रास्तथाऽपरे। गरुडाननाःखड्गमुखाम
यूरवदनास्तथा। गजेंद्रचर्मवसनास्तथाकृष्णाजिनांवराः। चीरसंवृतगात्राश्चतथावल्कलवाससः। उष्णीषि
णोमुकुटिनस्तथाकुंडलिनोऽसुराः। किरीटिनोलंबशिखाःकंबुग्रीवाःसुवर्चसः। नानावेषधरादैत्यानानामा
ल्यानुलेपनाः। स्वान्यायुधानिसंगृह्यप्रदीप्तानिचतेजसा। क्रममाणंहृषीकेशमुपावर्त्तन्तसर्वशः। प्रमथ्यसर्वा

तदेत्त्येयानपादस्य तलेःप्रभुः। रूपं स्रवा महानीमं जहाराशु समेदिनी।। तस्य विक्रमतान्भूमिं चंद्रादित्यौ भुनान्तर
नमःप्रक्रममाणस्य नाभ्यां किल समास्थितौ। परमाक्रममाणस्य जानुदेशाव्यवस्थितौ।। विष्णोरतुलवीर्यस्य
वदंत्येवं द्विजातयः। हृत्वा स मेदिनीं सर्वां हत्वा चासुरपुंगवान्। ददौ शक्राय त्रिदिवं विष्णुर्बलवतां वरः। एष ते
वामनो नाम प्रादुर्भावो महात्मनः। वेदविद्भिर्द्विजैरेवं कथ्यते वैष्णवं यशः। भूयो भूतात्मनो विष्णोः प्रादुर्भावो
महात्मनः। दत्तात्रेय इति ख्यातः क्षम्या परमायुतः। तेन नष्टेषु वेदेषु क्रियासु च मखेषु च। चातुर्वर्ण्ये पाऽनुसं
कीर्णे धर्म्मे शिथिलितां गते। अभिवर्द्धति चाधर्म्मे सत्ये नष्टेऽनृते स्थिते। प्रजासु शीर्यमाणासु धर्म्मे चाकुलतां
गते। सहयज्ञक्रिया वेदाः प्रत्यानीता हि तेन वै। चातुर्वर्ण्यमसंकीर्णं कृतं तेन महात्मना। तेन हैहयराजस्य का
र्त्तवीर्यस्य धीमता। वरदेन वरा दत्ता दत्तात्रेयेण धीमता। एतद्बाहुद्वयं यत्ते तत्ते मम कृते नृप। शतानि दश बा
हूनां न विध्यंति न संशयः। पालयिष्यसि कृत्स्नां च वसुधां वसुधेश्वर। दुर्निरीक्ष्योऽरिवृंदानां धर्म्मज्ञश्च भविष्य
सि। एष ते वैष्णवः श्रीमान्प्रादुर्भावोऽद्भुतः शुभः। भूयश्च जामदग्न्योऽयं प्रादुर्भावो महात्मनः। यत्र बाहुसह ८५
स्राणं विस्मितं दुर्जयं रणे। रामोऽर्जुनमतीकष्टं जघान नृपतिं प्रभुः। रथस्थं पार्थिवं रामः पातयित्वार्जुनं भुः

वि। धर्म्मयित्वा यथाकामं क्रोशमानं च मेघवत्। कृत्स्नं बाहुसहस्रं च चिच्छेद भृगुनंदनः। परस्वधेन दीप्तेन ज्ञाति
भिः सहितस्य वै। कीर्णा क्षत्रियकोटीभिर्मेरुमंदरभूषणा। त्रिःसप्तकृत्वः पृथिवी तेन निःक्षत्रिया कृता। कृत्वा
निःक्षत्रियां चैव भार्गवः सुमहाबलः। सर्व्वपापविनाशाय वाजिमेधेन चेष्टवान्। तस्मिन्यज्ञे महादाने दक्षि
णां भृगुनंदनः। मारीचाय ददौ प्रीतः कश्यपाय वसुंधरां। वारणांस्तुरगाणां च रथांश्च रथिनां वरः। हि
रण्यमक्षयं धेनुर्गजेंद्रांश्च महामनाः। ददौ तस्मिन्महायज्ञे वाजिमेधे महायशाः। अद्यापि च हितार्थाय लो
कानां भृगुनंदनः। चरमाणस्तपो दीप्तं जामदग्न्यः पुनः पुनः। तिष्ठते देववच्छ्रीमान्महेंद्रे पर्वतोत्तमे। एष
विष्णोः सुरेशस्य श्रीवत्सांकस्य धीमतः। जामदग्न्य इति ख्यातः प्रादुर्भावो महात्मनः। चतुर्विंशे युगे चापि
विश्वामित्रपुरःसरः। यज्ञे दशरथस्याथ पुत्रः पद्मदलेक्षणः। कृत्वात्मानं महाबाहुश्चतुर्द्धा प्रभुरीश्वरः। लोके रा
म इति ख्यातः तेजसा भास्करोपमः। प्रसादनार्थं लोकस्य रक्षसां निग्रहाय च। धर्म्मस्य च विवृध्यर्थं जज्ञे तत्र
प्रतापवान्। तमप्याहुर्म्मनुष्येंद्रं सर्व्वभूतपतेस्तनुं। यस्मै दत्तानि चास्त्राणि विस्वातिमण धीमता। वधार्थं देवशत्रू-
णां दुर्द्धराणि सुरैरपि। यज्ञविघ्नकरा येन मुनीनां भावितात्मनां। मारीचश्च सुबाहुश्च बलेन बलिनां वरौ। नि

हतो च निराशो व हतो तेन महात्मना। वर्त्तमाने मखे येन जनकस्य महात्मनः। भग्नं माहेश्वरं चापं क्रीडता
लीलया पुरा। यः समः सर्वधर्मज्ञश्चतुर्द्दश वने ऽवसत्। लक्ष्मणानुगतो यश्च सर्वभूतहिते रतः। चतुर्द्दश
वने तस्यात पोवर्षाणि राघवः। रूपिणी यस्य पार्श्वस्था शीतेति प्रथिता जने। पूर्वोचिता तस्य लक्ष्मीर्भर्त्ता
रमनुगच्छति। जनस्थाने वहा कार्यं त्रिदशानां चकार ह। तमास्कारितां हत्य रणक्रूरं पौलस्त्यं कुलपांश
नं। शीतायाः पदमन्विच्छन् लक्ष्मणानुचरो विभुः। विराधं च कवंधं च राक्षसौ भीमविक्रमौ। जघान पुरुषव्या
घ्रो गंधर्वौ शापविह्वलौ। हुताशनार्कांशु तडिद्घनाभैः प्रदीप्तचित्राहन दचित्रपुंखैः। महेन्द्रवज्राशनितुल्य
सारैः शरैः शरीराणि विजाजितो हौवलात। सुग्रीवस्य कृते जेन वानरेंद्रो महावलः। वाली विनिहितो युद्धे सु
ग्रीवश्चाभिषेचिनः। देवासुरगणानां च यक्षराक्षसपक्षिणां। यत्रावध्यं राक्षसेन्द्रं रावणं युद्धदुर्म्मदं। युक्तरक्ष
सकोटीभिर्नीलांजनचयोपमं। त्रैलोक्यद्रावणं क्रूरं क्रूराचारं महावलं। दुर्जयं दुर्द्धरं दृप्तं शार्दूलसमविक्र
मं। दुर्निरीक्ष्यं सुरगणैर्वरदानेन दर्पितं। जघान सचिवैः सार्द्धं ससैन्यं रावणं युधि। महाधनानृसंकाशं महा ८६
कायं महावलं। तमागस्कारितां क्रूरं पौलस्त्यं युधि दुर्ज्जयं। सचान्तपुत्रसचिवं ससैन्यं क्रूरनिश्चयं। रावणं नि

जघानाजौ रामो नृतपतिः पुरा। मधेश्च तनयो दृप्तो लवणो नाम राक्षसः। हतो मधुवने नीमो वरदत्तो महासुरः॥
समरे युद्धशौण्डेन तथान्येऽपि च राक्षसाः। एतानि चान्यकर्माणि रामो धर्मभृतां वरः। दशाश्वमेधान् यष्ट्वा माजहार
४२ निर्गलान्। नाश्रूयन्ताशुभा वाचो नाकुलं मारुतो ववौ। न वित्तहरणं चासीद्रामे राज्यं प्रसाशति। पर्य्यदेवन्न वि
धवा नानार्थाश्च न वल्क्कचित्। सर्व्वमासीज्जगद्दान्तं रामे राज्यं प्रशासति। न प्राणिनां भयं चापि जलानिलवि
घातजं। न च स्म वृद्धा बालानां प्रेतकार्याणि कुर्वते। ब्रह्म चक्षं चरं क्षत्रं विशः क्षत्रमनुव्रताः। शूद्राश्चैव हि व
र्णांस्त्रीन् शुश्रूषन्त्यनहंकृताः। नार्यो नात्यचरन् भर्तॄन् भार्य्यां वात्यचरत् पतिः। सर्व्वमासीज्जगद्दान्तं निर्दस्युर
भवन्मही। राम एको भवद्भर्त्ता रामः पालयिताऽभवत्। आयुर्वर्षसहस्राणि तथा पुत्रसहस्रिणः। आरोगाःप्रा १
णिनाश्चासन् रामे राज्यं प्रशासति। देवतानामृषीणां च मनुष्याणां च सर्व्वशः। पृथिव्यां सह वासोऽभूद्रामे रा
ज्यं प्रसाशति। गाथामप्यत्र गायंति ये पुराणविदो जनाः। रामे निवद्धतत्त्वार्था माहात्म्यं तस्य धीमतः। श्यामो यु
वा लोहिताक्षो दीप्तास्यो मितभाषिता। आजानुवाहुः सुमुखः सिंहस्कंधो महाभुजः। दशवर्षसहस्राणि द
शवर्षशतानि च। अयोध्याधिपतिर्भूत्वा रामो राज्यमकारयत्। ऋक्सामयजुषां घोषो ज्याघोषश्च महात्मनः॥

अमुच्छिन्नोऽवज्ञाय दीपतां नुत्पतामिति॥ स एवानुगुणसंपन्नो दीप्यमानः स्वतेजसा॥ अतिचंद्रं च सूर्यं च रामो
दाशरथिर्बभौ॥ इज्येष्ट क्रतुत्राते: पुण्यैः समाप्तवरदक्षिणैः॥ हित्वायोध्यां दिवं यातो राघवः स महाबलः॥ एवमे
ष महाबाहुरिक्ष्वाकुकुलनंदनः॥ रावणं सगणं हत्वा दिवमाचक्रमे विभुः॥ ॥वैशंपायन उवाच॥ अपरः
केशवस्यायं प्रादुर्भावो महात्मनः॥ विख्यातो माथुरे कल्पे सर्वलोकहिताय वै॥ यत्र शाल्वं च मैंदं च द्विविदं
कंसमेव च॥ अरिष्टमृषभं केशिं पूतनां दैत्यदारिकां॥ नागं कुवलयापीडं चाणूरं मुष्टिकं तथा॥ दैत्यान् मानु
षदेहस्थान् सूदयामास वीर्यवान्॥ छिन्नं बाहुसहस्रं च बाणस्याद्भुतकर्मणः॥ नरकश्च हतः संख्ये यव
नश्च महाबलः॥ हृतानि च महीपानां सर्वरत्नानि तेजसा॥ दुराचाराश्च निहताः पार्थिवा य महीतले॥ नवमः
परो विष्णुरष्टाविंशे तथा युगे॥ वेदव्यासस्तनो यत्र जातः कर्णपुरस्सरः॥ एको वेदश्चतुर्धा तु कृतस्तेन महात्म
ना॥ जनितं भारतं वंशं सत्यवत्याः सुतेन च॥ एते लोकहितार्थाय प्रादुर्भावा महात्मनः॥ अतीता॥ कथिता रा
जन्न कथ्यंते चाप्यनागताः॥ कल्की विष्णुयशा नाम संभलग्रामको द्विजः॥ सर्वलोकहितार्थाय भूयश्चोत्प ८७
स्यते प्रभुः॥ दशमो भाव्यसंपन्नो याज्ञवल्क्यपुरःसरः॥ क्षपयित्वा च तान् सर्वान् भावनार्थेन चादितान्॥ गंगाय

स्थानं १

मुनयो मध्ये प्राप्स्यति सानुगः॥ ततः काले व्यतीते च सामान्ये सह सैनिके॥ नृपेष्वथ प्रनष्टेषु तदा त्वप्रग्रहाः प्रजाः॥
रक्षणे नष्टतिहतं धवेल त्वा चान्योन्यमाहवे॥ परस्परहतास्ताश्च निराक्रंदाः सुदुःखिताः॥ एवं कष्टमनुप्राप्ताः क
सध्यांसके तथा॥ प्रजाः क्षयं प्रयास्यंति सार्द्धं कलियुगेन हि॥ क्षीणे कलियुगे तस्मिन् ततः सत्ययुगे पुनः॥ प्रपत्स्य
ते यथान्यायं स्वभावादेव नान्यथा॥ एते चान्ये च बहवो दिव्या दिव्यगणैर्युताः॥ प्रादुर्भावाः पुराणेषु गीयंते ब्रह्म
वादिभिः॥ यत्र देवानुमोह्यंते प्रादुर्भावानुकीर्त्तने॥ पुराणं वर्त्तते यत्र वेदश्रुतिसमाहितं॥ एतदुद्देशमात्रेण प्रादु
र्भावानुकीर्तनं॥ कीर्तितं कीर्तनीयस्य सर्वलोकगुरोः प्रभोः॥ प्रीयंते पितरस्तस्य प्रादुर्भावानुकीर्तनात्॥ वि
ष्णोरतुलवीर्यस्य वदन्त्येवं द्विजा नयः॥ एता श्रुत्वा योगेश्वरयोगमायाः श्रुता नराः॥ मुच्यति सर्वपापैः॥ ऋद्धिं समृद्धिं
विपुलां च भोगान् प्राप्नोति शीघ्रं नव स्वसादात्॥ ॥इति खिले पु हरिवंशे प्रादुर्भावसंग्रहः॥ ॥वैशंपायन उवा
च॥ विष्णुवंश एष मे विख्यातो हरित्वं च कृते युगे॥ वैकुंठत्वं च देवेषु कृष्णत्वं मानुषेषु च॥ ईश्वरत्वं हि दत्तस्य गह
नो कर्मणां गतिः॥ संप्रत्यतीतान् भव्यांश्च शृणु राजन्यथा तथा॥ अव्यक्तो व्यक्तलिंगस्थो य एष भगवान्प्रभुः
नारायणो ह्यनंतात्मा प्रभवो ऽव्यय एव च॥ एष नारायणो भूत्वा हरिरासीत् कृते युगे ब्रह्मा शक्रश्च सोमश्च धर्मः

ऋक्षो बृहस्पतिः। अदितेरपि पुत्रत्वमेतया दवनंदन॥ एष विष्णुरिति ख्यात इंद्रादवरजो नवत्सप्रसादजं ह्यस्य विनो
रदित्यां पुत्रजन्म तत्॥ वधार्थं सुरसत्रूणां दैत्यदानवराक्षसां॥ प्रधानात्मा पुरा ह्येष ब्रह्माणमसृजत्प्रभुः॥ सोऽसृ
जत्पूर्वपुरुषः पुरा कल्पे प्रजापतीन्॥ ते तन्वाना सन्तस्तत्र ब्रह्मवंशाननुक्रमात्॥ तेभ्यो नवन्महान्भ्यो वङ्कश्च
ब्रह्म शास्वतं। एतदाश्चर्य्यभूतस्य विष्णोः कर्म्मानुकीर्त्तनं। कीर्त्तितं कीर्त्तनीयस्य कीर्त्यमानं निबोध मे। वृत्तेस्स
वधे तात वर्त्तमाने युगे युगे। आसीत्त्रैलोक्यविख्यातः संग्रामस्तारकामयः। तत्रासन्दानवा घोराः सर्व्वे संग्राम
दर्प्पिताः। घ्नंति देवान्सगंधर्व्वान्सयक्षोरगराक्षसान्। ते वध्यमाना विमुखाः क्षीणप्रहरणा रणे। त्रातारं शर
णं जग्मुर्देवं नारायणं प्रभुं। एतस्मिन्नंतरे मेघा निर्व्वाणांगारवर्षिणः। सार्क्कचंद्रग्रहगणं छादयंतो नभस्तलं
चंचद्विद्युद्गणा विद्धा घोरा निर्ह्रादकारिणः। तेऽन्योऽन्यवेगनिहताः प्रववुः सप्त मारुताः। दीप्ततोयाशनीपातै
र्व्वज्रवेगानिलाकुलैः। ररास घोरैरुत्पातैर्दह्यमानमिवांबरं। पेतुरुल्काः सहस्राणि पेतुराकाशगान्यपि। पुंजा
निचा विमानानि प्रपत्यंत्युत्पतंति च। चतुर्युगांतपर्य्याये लोकानां यद्भयं भवेत्। तादृशान्येव रूपाणि तस्मि ८८
न्नुत्पातदर्शने। तमसा निःप्रभं सर्व्वं न प्राज्ञायत किंचन। तिमिरौघपरिक्षिप्ता न रेजुश्च दिशो दश। निशेव रूपिणी

काली कालमेघावगुंठिता। द्यौर्न्ननात्यनिभूतार्क्का घोरेण तमसावृता। घनौघान्सतिमिरान्दोर्भ्यां विक्षिप्य स
प्रभुः। वपुः संदर्शयामास दिव्यं कृष्णवपुर्हरिः। बलाहकांजननिभं बलाहकतनूरुहं। तेजसा वपुषा चैव
कृष्णं कृष्णमिवाचलं। दीप्तपीतांबरधरं दीप्तकांचनभूषणं। धूम्रांधकारवपुषं युगांताग्निमिवोत्थितं। चतु
र्द्विगुणपीनांसं किरीटच्छन्नमूर्द्धजं। चामीकरकराकारैरायुधैरुपशोभितं। चंद्रार्क्ककिरणोद्योतं गिरिकू
टमिवोच्छ्रितं। नंदकानंदितकरं शराग्नीविषधारिणं। शक्तिवज्रहलोदग्रं शंखचक्रगदाधरं। विष्णुशैलं क्षमामूलं
श्रीवत्सं शार्ङ्गलक्षणं। हर्य्यश्वरथसंयुक्तो सुपर्णध्वजशोभिते। चंद्रार्क्कचक्ररचिते मंदराक्षधृतांतरे। अनंत
रश्मिसंयुक्ते दुर्द्दर्षे मेरुकूवरे। तारकाचित्रकुसुमे ग्रहनक्षत्रबंधुरे। भयेष्वभयदं व्योम्नि देवा दैत्यपराजिताः
ददृशुस्ते स्थितं दिव्ये देवं लोकमये रथे। ते कृतांजलयः सर्व्वे देवाः शक्रपुरोगमाः। जयशब्दं पुरस्कृत्य शरण्यं शर
णं गताः। स तेषां ताः गिरः श्रुत्वा विष्णुर्द्दैवतदैवतः। मनश्चक्रे विनाशाय दानवानां महामृधे। आकाशे तु स्थि
तो विष्णुः साक्षमे पुरुषोत्तमः। उवाच देवताः सर्व्वाः सप्रतिज्ञमिदं वचः। शांतिं व्रजत भद्रं वो मा भैष्ट मरुतां गणाः
जिता मे दानवाः सर्व्वे त्रैलोक्यं प्रतिगृह्यतां। ते तस्य सत्यसंधस्य विष्णोर्व्वाक्येन तोषिताः। देवाः प्रीतिं समाजग्मुः।

प्राप्यामृतमिवोत्थितां। ततस्सम: संहृयने विनेयुश्च वलाहका:॥ प्रनवुश्च सुखावाता: प्रसन्नाश्च दिशो दश॥ ज्यो-
तींषि च स्फुनावहि चंद्रं च क्रुप्रदक्षिणं। दीप्तिमंति च तेजांसि चक्रुरर्कं प्रदक्षिणं॥ न विग्रहं ग्रहाश्चक्रुः प्रसेदु-
श्चापि सिंधवः। नीरजस्का वभूर्मार्गा नाकष्टग्घादयस्त्रयः। यथार्थं मृङ्ः सरिता नातिचुक्षुभिरेऽर्णवाः॥ आ-
सनुस्तुनानीन्द्रियाणि नराणि मंतरात्मसु। महर्षयो वीतशोका वेदानुचैरधीयत॥ यज्ञेषु च हवि: स्वादु शिव-
मस्त्रातिपावकः। प्रवृत्तधर्म्मा: संवृत्ता लोका मुदितमानसा:॥ विष्णोर्हि प्रतिज्ञस्य श्रुत्वारि निधने गिरं॥ ॥
इति खिलेषु हरिवंशे विष्णुप्रतिज्ञानाम॥ ॥वैशंपायन उवाच॥ ततोऽनयं विष्णुमुखं श्रुत्वा वै दैत्यदानवा:॥
उद्योगं परमं चक्रुर्युद्धाय युधि दुर्जया:। मयस्तु कांचनं दिव्यं त्रिनल्वांतरमव्ययं। चतुश्चक्रं सुवपुषं सुकल्पि-
ममहायुधं। किंकणीजालनिर्घोषं द्वीपचर्म्मपरिस्कृतं। रुचिरं हेमजालैश्च रत्नजालैश्च भूषितं। ईहामृग-
गणाकीर्णं पक्षिभिश्च विराजितं। दिव्यास्त्रतूणीरधरं पयोधरनिनादितं। स्वक्षं ध्वजधुरं धुर्य्यं सूपस्थं स्व-
गमोपमं। गदापरिघसंपूर्णं मूर्त्तिमंतं महार्णवं। हेमकेयूरवलयं स्वर्णमंडलकूवरं। सपताकं ध्वजोदग्रं सा-
दित्यमिव मंदरं। गजेंद्राभोदवपुषं क्वचित्केसरिवर्चसं। युक्तमृक्षसहस्रेण सहस्रांबुदनादितं। दीप्तमा- ८१

काशगं दिव्यं रथं परस्थात्तुजो। अश्म निष्कृपणाकांक्षी मेरुं दीप्तमिवांशुमान्। तारकस्तु क्रोधविस्तारमायसं वायसध्वजं। शै-
लाकारसमाकारं नीलांजनचयोपमं। काललोहाष्टचरणं लोहपायुगकूबरं। तिमिरोद्गारकिरणं गर्जंतमिव तोयदं।
लोहजालेन महता सगवाक्षेण दंशितं। आयुधैः परिघैः शूलैः क्षेपणीयैस्सयष्टिभिः। प्रासैः पाशैश्च विधृगतान्य-
वराहर्षपु चापरोक विरवाख्यातारः केचिज्ञायदवाहना:॥ नानापक्षिगताश्चान्ये केचित्यवनवाहना:। पत्तिन-
स्वपरे दैत्या भीषणा विकृतानना:। एकपादा द्विपादाश्च नदंतो युद्धकांक्षिण:। प्रक्ष्वेडमाना वहव: स्फोटयंत्र
श्च तेनुजाना दृप्ता:। हंसशब्दनिर्घोषा नेदुर्दानवपुंगवा:। ते गदापरिघैरुग्रैर्नुपायामप्रधाविना। वज्रनि:परिघाका-
रैस्तर्जयंति मदवता:। प्रासै: पाशैश्च खड्गैश्च तोमरांकुशपट्टिशै:। चिक्रीडुस्ते शतघ्नीभि:। शितधारैश्च मुद्गरै:। गं-
डशैलश्च शैलश्च परिघैश्चोत्तमायुधै:। क्रेश्च दैत्यप्रवराश्चक्रुरानंदिनं वलं। कालनेमि विजयं युद्धे दानवा युद्धदुर्मदा
ा वेदानवसैन्यं तत्संघैर्युद्धमदोत्कटं। देवनानि मुखं तस्थौ मेघानीकमिवोद्धतं। अत्युद्धतं दैत्यसहस्रगाढं वा-
न्वाग्नितायां वुदशैलकल्पं वलं रणायात्युदयान्मुदीर्णं ययुस्त्रयोऽन्मत्तमिवांबुनाम्॥ ॥इति हरिवंशे देवासुर-
युद्धे दैत्यसैन्यवर्णनं॥ वैशंपायन उवाच॥ श्रुतस्स दैत्यसैन्यस्य विस्तरस्तात वैमविग्रहे क्रूराणां सर्व्वसैन्यस्य वेष्टवे-

विस्तरं शृणु।। आदित्या वसवो रुद्रा अश्विनौ च महाबलौ।। सबलाः सानुगाश्चैव संनह्यंत यथाक्रमं। पुरुहूतस्तु पुरतो
लोकपालः सहस्रदृक्। ग्रामणीः सर्वदेवानामारुरोह सुरद्विपं। सव्ये चास्य रथः पार्श्वे पक्षिप्रवरवेगवान्। सुचारुचक्र-
चरणो हेमवज्रपरिष्कृतः। देवगंधर्वयक्षौघैरनुयातः सहस्रशः। दीप्तिमद्भिः सदस्यैश्च महर्षिभिरभिष्टुतः। वज्रविस्फूर्जि-
तोद्भूतैर्विद्युदिंद्रायुधार्पितैः। गुप्तो बलाहकगणैः पर्वतैरिव कामगैः। समारूढः स भगवान् पर्येति मघवा गजे। हविर्धा-
नेषु गायंति विप्रा मखमुखे स्थिताः।। स्वर्गे शक्रानुयातेषु देवतूर्यनिनादिषु। इंद्रं समुपनृत्यंति शतशोऽप्सरसां ग-
णाः। केतुना वंशजातेन भ्राजमानो यथा रविः। युक्तो हयसहस्रेण मनोमारुतरंहसा। स स्यंदनवरो भाति युक्तो मातलि-
ना तदा। कृत्स्नः परिवृतो मेरुर्भास्करस्येव तेजसा। यमस्तु दंडमुद्यम्य कालयुक्तं च मुद्गरं। तस्थौ सुरगणानीके दैत्या-
न्नादेन भीषयन्। चतुर्भिः सागरैर्गुप्तो लेलिहानैश्च पन्नगैः। शंखमुक्ताङ्गदधरो बिभ्रत्तोयमयं वपुः। कालपाशं तु संग-
गृह्य वाजिभिः शशिकरोपमैः। वायुवीरितजलाकारैः कुर्वन् लीलाः सहस्रशः। पांडुरोद्धूतवसनः प्रवालरुचिराधरः। मणिश्यामो-
त्तमवपुर्हारभारावभूषितः। वरुणः पाशधृङ्मध्ये देवसैन्यस्य तस्थिवान्। युद्धवेलामभिलषन् भिन्नवेल इवार्णवः। य- २०
क्षराक्षससैन्येन गुह्यकानां गणैरपि। मणिरूपामोत्तमवपुः कुबेरो नरवाहनः। युक्तश्च शंखपद्माभ्यां निधीनामधिपः प्रभुः।

[illegible]

राजराजेश्वरः श्रीमान् गदापाणिरदृश्यत। विमानयोधी धनदो विमाने पुष्पके स्थितः। स राजराजः शुशुभे युद्धार्थी नरवा-
हनः। प्रेक्षमाणः शिवसखः साक्षादिव शिवः स्वयं। पूर्वपक्षं सहस्राक्षः पितृराजस्तु दक्षिणं। वरुणः पश्चिमं पक्षमुत्त-
रं नरवाहनः। चतुर्षु युक्ताश्चत्वारो लोकपाला बलोत्कटाः। स्वासु दिक्षु अरक्षन्त वै तस्य देवबलस्य ते। सूर्यः स-
प्ताश्वयुक्तेन रथेनांबरगामिना। त्रिदिवद्वारि विश्रांतस्तपमानेन दीप्यमानः स्वरश्मिभिः। उदयास्तसमं चक्रेण
मेरुपर्यंतगामिना।। रराज मध्ये देवानां द्वादशात्मा दिनेश्वरः। सोमः श्वेतहयो भाति स्पंदने शीतरश्मिवान् हि-
मतोयपरूर्णाभिर्भाभिराह्लादयन् जगत्। तमृक्षयोगानुगतं शिशिरांशुं द्विजेश्वरं। जगच्छायांकिततनुं नैशस्य
तमसः क्षयं। ज्योतिषामीश्वरं व्योम्नि रसानां रसदं प्रभुं। ओषधीनां परित्राणं निधानममृतस्य च। जगतः प्रथमं
भागं सौम्यं शीतमयं रसं। ददृशुर्दानवाः सोमं हिमप्रहरणे स्थितं। यः प्राणः सर्वभूतानां पंचधा विद्यते नृषु। सप्त-
स्कंधगतो लोकान् त्रीन् दधार यश्चराचरान्। यमाहुरग्निकर्तारं सर्वप्रभवमीश्वरं। सप्तस्वरगता यस्य योनिर्गी-
र्निरुदीर्यते। यं वदंत्युत्तमं भूतं यं वदंत्यशरीरिणं। यमाहुराकाशगमं शीघ्रगं शब्दयोनिजं। स वायुः सर्वभूता-
युरुद्भूतः स्वेन तेजसा। ववौ प्रमथयन् दैत्यान् प्रतिलोमः सतोयदः। मारुता देवगंधर्वा विद्याधरगणैः सह। चि-
क्रीडुरसिभिः शुभ्रैः निर्मुक्तैः पन्नगैरिव। सृजंतः सर्पपतयस्तीव्ररोषजं विषं। शरभूताः सुरेंद्राणां चेरुर्व्यात्तमु-

स्वा दिवि।पर्व्वताश्च शिलाःशृंगैःशतत्राश्चैवपादपैः।उपतस्थुःसुरगणान्प्रहर्त्तुंदानवंबलात्।यःसदेवोहृषीकेशःप
द्मनाभस्त्रिविक्रमः।कृष्णवर्त्मायुगान्ताभोविश्वस्रग्जगतःप्रभुः।समुद्रयोनिर्म्मधुहाहव्यकक्रतुसन्नतः।म
रापोमेघोमनन्तात्मासमःशांतिकरोऽरिहा।जगद्योनिर्द्वगह्वीजाजगद्गुरुरुदारधीः।सोर्कमग्निमिवोद्यन्नमुद्यम्या
त्वमितौजसं।अरिघ्नममरानीकेचक्रंचक्रगदाधरः।सपरीवेषमुद्यन्तंसवितुर्म्मण्डलंयथा।सव्येनालंव्यमहतीं।
सर्वासुरविनाशिनीं।करेणकालीवदनींशत्रुकालप्रदांगदां।शेषेर्क्केजःप्रदीप्तानिनगारिध्वजप्रभुः।दक्षिणा
युधजालानिशार्ङ्गीनिमहायशाः।सकस्यपस्यात्मजंवैद्विजंनगजगनोजनं।पवनाधिकसंपातंगगनक्षोभणं
खगं।नजगेन्द्रणवदनंनिविष्टनविराजितं।अमृतारंनिर्म्मकंमंदराद्रिमिवास्थितं।देवासुरविमर्द्देषुत्रातसं
हस्रविक्रमं।महेन्द्रेणामृतस्यार्थेवज्रेणकृतलक्षणं।शिखिनंचूडिनंचैवतप्तकुंडलभूषणं।विचित्रपत्रवसनं
धातुमन्तमिवाचलं।तीक्ष्णतुंडाग्रनखरंवंवत्प्लसमाकुलं।स्फीतक्रोडावलंवेनशीतांशुसमतेजसा।भो
गिभोगावसक्तेनमणिरत्नेनभास्वता।पक्षाभ्यांचारुचित्राभ्यांछादयंतंवलीलया।युगान्तसन्ध्याचापाभ्यांते
यदाभ्यामिवांवरंनीलाक्लोहितपीताभिः।पताकाभिरलंकृतं।केतुवेषप्रतिच्छन्नंमहाकायनिकेतनं।अरुणा २१
वरजंश्रीमान्आरुरोहरणेहरिः।सदेवःस्वेनवपुषासुपर्णंखेचरोत्तमं।नमन्त्ययुर्देवगणामुनयश्चसमाहि

ताः।गीर्भिःपरममंत्राभिंस्तुष्टुवुश्चगदाधरं।तंवैश्रवणसंश्लिष्टंवैवस्वतपुरस्सरं।वारराजपरिक्षिप्तंदेवराजविरा
जितं।चंद्रप्रभाभिर्विमलंयुद्धमन्नरवेगिनं।पवनाविद्धनिर्घोषंसंप्रदीप्तक्रतानानं।विष्णोर्ज्वलितस्सहिजिह्म
श्चन्त्राजिह्मास्तेजसाहृतं।बलंवलयदुहृत्तंयुद्धायसमवर्त्तत।स्वस्त्यस्तुदेवेभ्यइतिस्तुवन्नेत्रांगिराजगौ।एव
स्वस्तिदैत्येभ्यइतिउशनावाक्यमब्रवीत्॥ ॥इतिखिलेषुहरिवंशेतारकामयविष्णुःसन्नहनं॥ ॥वैशं
पायनउवाच॥सद्येदेवमयोयस्तुसर्व्वधर्म्ममयःस्तुयः।तस्यविष्णोःसुरेशस्यतेजसाविधृताःसुराः।सक-
लासानुगाश्चैवत्रिदशाश्चमदोत्कटाः।ताभ्यांवलाभ्यांयद्बैत्रमलोविपरहस्सदा।असुराणांचसुराणांचपर
स्परजयैषिणां।दानवादेवतैःसार्द्धंनानाप्रहरणोद्यताः।समीयुर्युध्यमानावैपर्व्वताइवपर्व्वतैः।तत्रासुरसं
युक्तंयुद्धमत्यद्भुतंह्यभूत्।धर्म्माधर्म्मसमायुक्तंदर्पेणविनयेनच।ततोरथाःप्रज्वलिताःवाहनैश्चप्रचोदितैः
उत्पतद्भिश्चगगनंचापहस्तैःसमंततः।विक्षिप्यमानैर्मुक्ताभिःप्रेर्य्यमाणैश्चसायकैः।चापैर्विस्फार्य्यमाणैश्च
पात्यमानैश्चमुद्गरैः।तद्युद्धमभवद्घोरंदेवदानवसंकुलं।जगत्संत्रासजननंयुगसंवर्त्तकोपमं।स्वहस्तमुक्तैः
परिघैःक्षिप्रमुक्तैश्चपर्व्वतैः।दानवाःसमरेजघ्नुर्देवानिंद्रपुरोगमान्।तवध्यमानावलिभिर्द्दानवैर्जितकाशि

न्निः॥ विपन्नमनसो देवा जग्मुरार्त्तिं परां मृधे॥ तेऽस्त्रजालैः प्रमथिताः परिघैर्भग्नमस्तकाः॥ निस्त्रारस्का दितिसुत
र्वैमरक्तं व्रणैर्घक्ताः। स्पंदनाः पाशजालेश्च निःप्रयत्नाः कृताः कृताः॥ प्रविश्य दानवीं मायां न शेकुस्ते विचेष्टितुं
संस्तंभितमिवानानि निःप्राणसदृशान्यति। बलं सुराणामसुरैर्निःप्रयत्नायुधं कृतं। मायापाशान्विकर्षंश्च
छिदन्नु चक्रेणाता नसुरान्नु शक्रो दैत्यबलं घोरं विवेश वरलोचनः॥ स दैत्यान्नु प्रमुखे दृष्ट्वा तदा दानवबलं स
हतानामसेनास्त्रजालेन तमोन्नतमथाकरोत्। तेऽन्योऽन्यं नाववुध्यंत देवा दानवास्तथा। घोरेण तमसा
विष्टाः पुरुहूतस्य तेजसा॥ मायापाशैर्विमुक्ताश्च यत्नवंतः सुरोत्तमाः। वपुंषि दैत्यसंघानां तमोभूतान्यपात
यन्॥ अपध्वस्ता विसंज्ञाश्च तामसा नीलवर्चसः। पेतुस्ते दानवगणाश्छिन्नपक्षा इवाचलाः॥ दैत्यानां ततश्चनि
न्नतमंधकारमहार्णवं। प्रविष्टं बलमुद्दसे तमोन्नतमिवाववनौ। तदासृजन्मयस्तां मायां मयस्तां तामसीं दह
युगान्ते लोकदहनीं सृष्टां मौर्घणा वह्निना॥ सा ददाह ततः सर्वं मायामयविकल्पिता। दैत्याश्चादित्यवपुषः।
संदृष्ट्वा त्वसुरा ह्रवा मायामौर्वीं समासाद्य दह्यमाना दिवौकसः॥ नेत्रिरे वंड विषयं शीतांशुसलिलं हृदं। ते दह्य
मानकुर्वन्तो तेजसा ग्रस्तेजसः॥ शरसं शुर्वज्ञिणं देवाः संतप्ताः शरणैषिणः॥ संतसे मायया सैन्ये दह्यमाने च दान २२

वैः। चादितो देवराजेन वरुणो वाक्यमब्रवीत्॥ ॥ वरुण उवाच॥ पुरा ब्रह्मर्षिजः शाक्तिस्तपस्सेपे सुदारुणं। ऊर्व :
सर्वसत्तेजस्वी सदृशो ब्रह्मणो गुणैः। तत्रपंतमिवादित्यं तपसा जगदव्ययं। उपतस्थुर्मुनिगणा देवा देवर्षिभिः स
ह। हिरण्यकशिपुश्चैव दानवो दानवेश्वरः। ऋषिविज्ञापयामासुः पुरा परमतेजसं। तेन मूचुर्ब्रह्मर्षयो वचनं
धर्मसंहितं। ऋषिवंशेषु भगवान् छिन्नमूलमिदं कुलं। एकस्त्वमनपत्यश्च गोत्रं यन्नानुवर्तसे। कौमारब्र
तमास्थाय क्लेशमेवानुवर्तसे। बहूनि विप्रर्षि गोत्राणि मुनीनां भावितात्मनां। एकदेहानि तिष्ठंति विनष्टे
न विना प्रजाः॥ वंशाश्च छिन्ने तेषु ते पुनानासि कारणं। भगवांस्तपसा श्रेष्ठः प्रजापतिसमद्युतिः। तत्प्रवर्त
स्ववंशाय वर्धयात्मानमात्मना। त्वमाधत्स्वा द्वितीयं तेजो द्वितीयां कुरुवैतनुं। स एवमुक्तो मुनिभिर्मुनिर्मन
सितोऽितः। जगर्हतान् ऋषिगणान्वचनं चेदमब्रवीत्। यथायं शाश्वतो धर्मो मुनीनां विहितः पुरा। आर्ष
हिंसवितं कर्म वन्य मूलफलाशिनां। ब्रह्मयोनौ प्रसूतस्य ब्राह्मणस्यात्मवर्तिनः। ब्रह्मचर्यं सुचरितं।
ब्रह्माणमपि चालयेत्। द्विजानां वृत्तयस्तिस्रो ये गृहाश्रमवासिनः। अस्माकं तु वने ह्नि सिद्धे नाश्रमनि
वासिनां। अब्भक्षा वायुभक्षाश्च दन्तोलूखलिनस्तथा। अश्मकुट्टा निरशनाः पंचातपतपाश्च ये। एतेतप

सितिष्ठंतो व्रतैरपि सुदुश्चरैः। ब्रह्मचर्यं पुरस्कृत्य प्रार्थयंति परां गतिं। ब्रह्मचर्याद्ब्राह्मणस्य ब्राह्मणत्वं विधीयते।
एवमाहुः परे लोके ब्रह्म ब्रह्मविदो जनाः। ब्रह्मचर्ये स्थितं धैर्यं ब्रह्मचर्ये स्थितं तपः। ये स्थिता ब्रह्मचर्येषु ब्राह्म
णास्ते दिवि संस्थिताः। नास्ति योगं विना सिद्धिर्न सिद्धिं विना यशः। नास्ति लोके यशोमूलं ब्रह्मचर्यात्परं त
पः। सन्निगृहीतेंद्रियग्रामं भूतग्रामं च पंचकं। ब्रह्मचर्यं समाधत्ते किमतः परमं तपः। अयोगे केशग्रहणमसंक
ल्पव्रतक्रिया। अब्रह्मचर्या चर्या च त्रयं स्याद्दंभसंज्ञितं। क्व दाराः क्व च संयोगः क्व च भावविपर्ययः। यथेयं ब्र
ह्मणा सृष्टा मनसा मानसी प्रजा। यद्यस्ति तपसो वीर्यं युष्माकमजितात्मनां॥ मुखनेत्रविकारेण स्पर्शनेर्नोष
णोरपि। स्मरणात्स्कंदरीणां च मनसो विचलितः परः। यासां मुनिः स माप्नोति तस्य बीजं क आवहेत्। पापात्मा विफ
लो मूढा नवा किंसः इति श्रुतिः। स्मृत्वा ब्रह्मपदाख्यिन्नो हृष्टश्शुक्रं प्रमुंचति। सृष्ट्वा विरायत्यात्मानमस्यां जीवकं
आवहेत्। ब्रह्मचर्यं यदान्यते नवद्यदि विनिश्चयः। प्राणिनो दधतिकरतिं ततो योषितां वपुषि निष्टुणेऽशुचौ।
ब्रह्मचर्यमपरं मुनिश्रितः कुर्महे समनिकां स्थितं सती। सृष्टवं मानसान्पुत्रान्प्राजापत्येन कर्मणा। मानमा
निर्मितायो निराश्रमनया तपस्विना। नदारयोगाबीजं वा व्रतमुक्तं तपस्विनो। यदिदं लुप्तधर्मार्थं युष्माभिरिह नि ५२

र्णयः। स्माहृतं मन्त्रिरित्यर्थं स समझिरिव मे मतं। वपुर्दीप्तांतरात्मानमेष कृत्वा मनोमयं। दारयोगं विना स्रक्ष्ये पुत्रमात्म
तनूरुहं। एवमात्मानमात्मा मे द्वितीयं जनयिष्यति। वन्येनानेन विधिवद्दिदृक्षंतमिव प्रजाः। ऊर्द्ध्वरेतस तपसावि
ष्टाविनेश्रय रुद्रक्तमिति। ममंथैकेन दर्भेण सुकृतस्य प्रजवारणिं। तस्योरुं सहसा भित्त्वा ज्वालामाली निरिंधनः। जगतो
दहनाकाङ्क्षी पुत्रोऽग्निसमपद्यत। ऊर्द्ध्वस्योरुं विनिर्भिद्य ऊर्द्ध्वे निमाह्वकोऽनलः। दिधक्षन्निव त्रीन्लोकानूर्ज्ञेण
रमकम्पनः। उत्पन्नमात्रश्चोवाच पितरं दीनया गिरा। क्षुधमा बाधते तात जगद्भक्षे त्यजस्व मां। त्रिदिवारोदि नि
र्घ्नोलेर्द्धं न मार्णा दिवोत्रा दत्रा॥ निर्दहन्नूर्द्ध्वं भूतानि वहत्थमाऽंतकोऽनलः। एतस्मिन्नंतरे ब्रह्मा सर्वलोकपतिः
प्रभुः। आजगाम मुनिर्यत्र व्यसृजत्पुत्रमुत्तमं। सददर्शोरुमूर्द्ध्वस्य दीप्यमानं सुताग्निना। सर्वेकोपाग्निसंतप्तालो
कांश्च ऋषिनिःसहान्। मुवाच ततो ब्रह्मा मुनिश्रेष्ठं समाजयन्। पुत्रेदं वार्यतां तेजो लोकानां क्रियतां यदा। अन
स्यापत्यस्य ते विप्र करिष्ये सदमुत्तमं। वासमस्य प्रदास्यामि प्रसन्नं चामृतोपमं। तथ्यमेतन्मम वचः श्रृणु त्वं वदतां व
र॥ ॥ऊर्द्ध्वरुवाच॥ धन्योऽस्म्यनुगृहीतोस्मि यस्य मे भगवांस्थितः। मतिमेतां ददातीह परमानुग्रहाय वै। प्रन
वकाले संप्राप्ते काङ्क्षितस्य समागमे। भगवन्सर्प्पितः पुत्रः कैर्द्रव्यैः प्राप्स्यते सुखं। कुत्रावास्य निवासः स्यात्ते भो
जनं च किमात्मकं। विधास्यति भवानस्य वीर्यतुल्यं महौजसः॥ ॥ब्रह्मोवाच॥ वडवामुखस्य वसतिः समुद्रा

स्यन विष्पतिममयो निर्ज्जलं विष्टतत्त्वतोयमयं हविः। तत्रायमास्यान्निरतः पिबन्वारिमयं हविः। तद्वचिस्रवपुत्रस्य वि
सृजाम्यालयं नु तत्। ततो युगान्ते नाना मेष चाहस्कचबृत सहितो नष्टविष्यावो लोकान् इह पुनः पुनः॥ एषो
ऽग्निरंतकालस्य सलिलाशी मया कृतः। दहनः सर्वभूतानां सदेवासुररक्षसां॥ एवमुक्तिवति सोऽप्यग्निः संहृत
ज्वालमंडलः। प्रविवेशार्णवमुखं निक्षिप्य पितरि प्रभो। प्रतियातस्ततो ब्रह्मा ते च सर्वे महर्षयः। और्वस्याग्नेः प्र
वज्ञाः स्वां स्वां गतिमुपाश्रिताः॥ हिरण्यकशिपुर्दृष्ट्वा तदद्भुतमहाजयता। और्वं प्रणतसर्वांगो वाक्यं चेदमुवाच
ह। भगवन्नस्रद्भुतमिदं निर्वृत्तं लोकसाक्षिकं। तपसा ते मुनिश्रेष्ठ परितुष्टः पितामहः॥ अहं तु तव पुत्रस्य तव
चैव महाव्रत। भृत्य इत्यवगंतव्यः श्लाघ्योऽस्मि यदि कर्मणा॥ तन्मां पश्य समापन्नं तवैवाराधने रतं। यदि सी
दे मुनिश्रेष्ठ तवैव स्यात्पराजयः॥ ॥ और्व उवाच॥ धन्योऽस्म्यनुगृहीतोऽस्मि यस्य तेऽहं गुरुः स्मृतः। नास्ति ते म
त्प्रसादेन भयमद्येह सुव्रत। इमां च मायां गृह्णीष्व मम पुत्रेण निर्मितां। निरिंधनामग्निमयीं दुःस्पर्शां पावकै
रपि। एषा ते स्वस्य वंशस्य वशगा गिरिनिग्रहे। रक्षिष्यत्यात्मपक्षांश्च दानवेश्वरः। सैषा दुर्विषहा माया देवैरपि दुरासदा
और्वेण निर्मिता पूर्वं पावकेनोर्वसूनुना। तस्मिन्व्युत्थिते दैत्ये निर्वीर्या एषा न संशयः। शापो ह्यस्याः पुराद २४
त्तः सृष्टा येन तेजसा। यद्येषा प्रतिहंतव्या कर्त्तव्यो भगवान्प्रभुः। दीयतां मम सखा शक्रतो यथा निन्निशा

स्यपत्रं ते वरं चैव प्रहृष्ट्या एवमुक्तितं ततः ... मुनिपुंगवः।
...मश्चि दिव दृष्ट्वा ... माया

करः। तेनाहं सह संगम्य यादोनिःश्वसमाहितः। मायामेतां हनिष्यामि त्वत्प्रसादान्न संशयः॥ ॥इति श्रीखिले पु
रिवंशे और्ववाग्निसंभवः॥ ॥वैशंपायन उवाच॥ एवमस्त्विति संहृष्टस्त्र्यक्षस्त्रिदशवर्द्धनः। संदिदेशाथ तत्र सो
मं युद्धमयं त्रिरायुधं। गच्छ सोम सहायत्वं कुरु पाशधरस्य वै। असुराणां विनाशाय जयार्थं च दिवौकसां॥
त्वमप्रतिमवीर्यश्च ज्योतिषां चैव चेश्वरः। त्वन्मयं सर्वलोकानां रसं रसविदो विदुः। क्षयवृद्धी तवाव्यक्ते सागर
स्येव मंडले। परिवर्तस्यहोरात्रं कालं जगति योजयन्। लोकच्छायामयं लक्ष्म तवांके शशसंज्ञितं। न विदुः
सोम देवापि ये च नक्षत्रयोगिनः। त्वमादित्यपथादूर्ध्वं ज्योतिषां चोपरि स्थितः। तमः प्रोत्सार्य सहसा भासयस्यखि
लं जगत्। श्वेतभानुर्हिमतनुर्ज्योतिषामधिपः शशी। अब्दकृत्कालयोगात्मा इज्यो यज्ञरसोऽव्ययः। ओषधी
शः क्रियायोनिरब्जयोनिरनुष्णभाक्। शीतांशुरमृताधारश्चपलः श्वेतवाहनः। त्वं कांतिः कान्तवपुषां त्वं सोमः
सोमपायिनां। सौम्यस्त्वं सर्वलोकानां तिमिरघ्नस्त्वमृक्षराट्। तद्गच्छ त्वं महासेन वरुणेन वरूथिना। त्रासयस्व
सुरीं मायां यया दह्याम संयुगे॥ ॥सोम उवाच॥ यन्मां वदसि युद्धार्थे देवदेव जगत्पते। एष वर्षामि शिशिरं प्र दैत्यमायाप्र-
तीक्ष्णमच्छीनं निर्दहंश्च न रूपं पश्य हिमवेष्टितान् विमदांश्चैव दानवांस्तु महामृधे॥ ॥वैशंपायन उवाच॥ त कर्षणं २

दिमायाप्र

तो हिमकरो स्रष्टाः सवाष्पादिमवर्षयः । ववर्षुर्ति स्मनान्न्धारान्दैत्यान्मेघगणा इवा । तौ पाशशुष्कौ सुवेरोवरु
णौ हमहारणे । जघ्नतुर्दिमपातैश्च पात्रापातैश्च दानवान् । द्वावेवु नाथौ समरतो पात्राद्दिमयाधिनौ । मृधे वर
त्तुरं नो निः स्कन्धा विव महार्णवौ । तान्या मालाविर्तसो म्यतदानवमरदस्त्पत जगत्संवर्त्तकौ नादः प्रवृत्तरिव
संहत्रं । तावुद्यतौ शुपाशौ त्रात्रांक वरुणावुनौ । त्रामया मासतर्मायां देवादैत्यविनिर्मितां । त्रीतां शुज
लनिर्द्दग्धाः पात्रोश्चास्पंदितारणे । नत्राक्रमश्च लिन्तुदैत्यानां विपरीतप्रनाणिदा । विमानानि विचित्राणि नि
पतंस्तुस्पतं निचातां पात्राहस्तग्रथितांच्छादितां त्रीतरश्मिना । मयोददर्शमायांवै दानवानां महात्मनां । त्र
लिलाजालवितती गंडशैलाट्टहासिनी । पादपोत्कटकूटाग्रां कंदरोत्कीर्णकाननां । सिंहव्याघ्रगजाकी
र्णां पवनाघूर्णितद्रुमां । निर्मितां स्वेन पुत्रेण क्रोधेन दिविकामगां । प्रसृतां पार्वतीमायां ससृजे दानवान्तमः
सात्रमत्रादृः शिलावर्षैः प्रपतद्भिश्च पादपैः । निजघ्ने देवसंघांश्च दानवांश्चाप्यवीजियत । नैत्रा करी वारु
णीं च मायेऽ तर्द्धितस्तता । अत्रमनिश्च त्रात्रांकान्कौ सादवरणो गणे । मात्रमसंघातविषमोद्रुमपर्वत	९५
संकटा । अनवद्वारसंचारा पृथिवी पर्वतैरिव । नानाहतोऽस्मिन्निःकश्चित्तु शिलानिश्चाप्यतोऽतिः । नाना

रुद्राद्रुमगणोर्द्दवोऽप्यपत संयुगे । तदप्यवष्टधनुर्षं नम्न प्रहरणा विलो । निःप्रयत्नं सुरानीकं वर्ज्जयित्वा गदा
धरं । सहि युद्धमनाः श्रीमानीशानस्मव्यकंयत । सहि स्मुचाऽजगत्स्वामी न चुकोप गदाधरः । कालज्ञः काल
मेघाभः समीक्षन्कालमाहवे । देवासुर विमर्द्दं च द्रष्टुकामो जनार्द्दनः । ततो भगवता दृष्टौ रणे पावकमारु
तौ । मायायाः संप्रहृष्टायाः प्रद्दष्टायाः त्रामायवौ । ततः प्रवृद्धावन्योऽन्यं प्रवृद्धज्वालवेगनौ । चोदितौ विष्णु
वाक्येन तौ मायामपकर्षतां । ताभ्यामुद्भूत मेघाभ्यां प्रवृद्धाभ्यां महामृधे । दग्धा सा पार्वती माया नत्रमीन
तान नानाद्दासोऽनिलोऽनलसंयुक्तः सानलश्चानिलाकुलः दैत्यसेनां ददहतुर्युगान्ते विसृष्टितौ । वायुः
प्रधावितस्तत्र पश्चादग्निश्च मारुतात् । चरत्रद्दानवानीके क्रीडंतावनिलानिलौ । नस्मावयवनृत्तपु प्रपत
स्त्पतस्त्व चा दानवानां विमानेषु ज्वलत कर्म्माणि पावके । वातस्कंधमयविद्धेषु विमानेषु समंततः । मायाबन्ध
चनिर्द्दग्धा स्तूयमाने गदाधरे । निःप्रयत्नेषु दैत्येषु त्रैलोक्ये मुक्तबंधने । संप्रहृष्टेषु देवेषु साधुसाधिति सर्वशः
जयेदत्रात्रातोऽत्र स्यमयस्य च पराजये । दिक्षु सर्वासु शुद्धासु प्रवृत्ते धर्म्मसंस्तरे । अपावृत्ते चंद्रपथे त्रयनष्ठे
दिवाकरे । प्रकृतिस्थेषु नृतषु चिपुचारिवंधुषु । अनिन्नवंधनमृत्यो हूयमाने कृतात्राने । यज्ञभागिषु देवेषु स

गार्थं दत्त्वाय यक्षश्चालोकपालेषु सर्व्वेषु दिक्षु संस्थानवर्त्तिषु ॥ नावेतपसि श्रद्धानामनावे पापकर्म्मणां ॥ देवपक्षे
प्रमुदिते दैत्यपक्षे च सीदति ॥ त्रिपादविग्रहे धर्म्मे अधर्म्मे पादविग्रहे ॥ अपावृते महाद्वारे वर्त्तमाने च सत्प
थे ॥ स्वधर्म्मस्थेषु वर्णेषु लोकेऽस्मिन्नाश्रमेषु च ॥ प्रजारक्षणयुक्तेषु भ्राजमानेषु राजसु ॥ गीयमानासु गाथा
सु देवसंस्तवनादिषु ॥ प्रशांतकलुषे लोके शांते तमसि दारुणे ॥ अग्निमारुतयोस्तस्मिन्वृत्ते संग्रामकर्म्म
णि ॥ तन्मया विमला लोकास्तात्पंजय कृतक्रियाः ॥ स्पर्द्धं देवनयं श्रुत्वा मारुताग्निकृतामयं ॥ कालनेमिरि
ति ख्यातो दानवः प्रत्यदृश्यत ॥ भास्कराकारमुकुटः शिंजिताभरणांगदः ॥ मंदराचलसंकाशो महाराजतत्रि
निनः ॥ शिवप्रहरणोदग्रः शतबाहुः शताननः ॥ शतशीर्षः शतश्रीमान् शतशृंग इवाचलः ॥ कक्षे मह
ति संवृद्धे निदाघ इव पावकः ॥ धूम्रकेशो हरित्श्मश्रुः दंष्ट्रोष्ठपुटाननः ॥ त्रैलोक्यांतरविस्तारं धारयित्वि
पुलं वपुः ॥ बाहुभिस्तुलयन्व्योम क्षिपन्पादौ महीधरान् ॥ ईरयन्मुखनिःश्वासैर्वृष्टिमंतो बलाहकान् ॥
तिर्यगायतरक्ताक्षं मंदरोदरवर्चसं ॥ दिधक्षंतमिवायांतं सर्व्वान्देवगणान्मृधे ॥ तर्जयंतं सुरगणान्छा २६
दयंतं दिशो दश ॥ संवर्त्तकाले तृषितं दृप्तं मृत्युमिवोच्छ्रितं ॥ सतलेनोच्छ्रयवता विपुलांगुलिपर्व्वणा ॥ माला

भरणाहर्तेन किंचिदुच्छलितवर्म्मणा ॥ उच्छ्रितेनाग्रहस्तेन दक्षिणेन वपुष्मता ॥ दानवान्देवनिहतानुत्तिष्ठतेति ब्रुव
वन् ॥ तं कालनेमिं समरे द्विषतां कालसंनिभं ॥ वीक्षंते स्म सुराः सर्व्वे भयविक्लवलोचनाः ॥ तं स्म वीक्षंति भूतानि क्रमं
तं कालनेमिनं ॥ त्रिविक्रमं विक्रममाणं नारायणमिवापरं ॥ सोच्छ्रयं प्रथमं पादं मरुताघूर्णितांबरं ॥ प्राक्रामदसु
रो युद्धे त्रासयन्सर्व्वदेवताः ॥ स मयेनासुरेंद्रेण परिष्वक्तः क्रमन्रणे ॥ कालनेमिर्बभौ दैत्यः स विष्णुरिव मंदरः ॥
अथ प्रव्यथिता देवाः सर्व्वे शक्रपुरोगमाः ॥ दृष्ट्वा कालमिवायांतं कालनेमिं भयावहं ॥ ॥ इति खिलेषु हरिवंशे
कालनेमिप्रक्रमणं नाम ॥ ॥ वैशंपायन उवाच ॥ दानवाश्चापि पिप्रीयुः कालनेमिं महासुरं ॥ अभ्यवर्द्धन महा
तेजा घपांतेजदलो यथा ॥ तं त्रैलोक्यांतरगतं दृष्ट्वा ते दानवोत्तमाः ॥ उत्तस्थुरपरिश्रांताः प्राप्येवामृतमव्ययं ॥ ते वी
तभयसंत्रासा मयतारपुरोगमाः ॥ तारकामयसंग्रामे सततं जयकांक्षिणः ॥ रेजुरायोधनगता दानवा युद्ध
दुर्म्मदाः ॥ अस्त्रमन्त्यस्यतां तेषां व्यूहांश्च परिधावतां ॥ प्रहरतां वा भवत्प्रीतिर्दानवा कालनेमिनं ॥ ये तु तत्र म
यस्यासन्मुख्या युद्धविशारदाः ॥ तेऽपि सर्व्वे भयं त्यक्त्वा हृष्टा योद्धुमुपस्थिताः ॥ मयस्तारो वराहश्च हयग्री
वश्च वीर्यवान् ॥ विप्रचित्तिसुतश्श्वेतः खरलंबावुभावपि ॥ अरिष्टो बलिपुत्रश्च किशोरोष्टौ तथैव च ॥ स्वर्भानु

श्चामरः प्रम्लो वक्रयोधी महाबलः। एते चास्त्रविदः सर्व्वे सर्व्वे तपसि संस्थिताः॥ दानवाः कृतिनो जग्मुः। कालनेमिम
नुत्तमं। ते गदानिस्त्रिंशयुधी निस्त्रिंशचक्रश्वस्त्रपरश्वधाः। कालकल्पैश्च मुसलैः क्षेपणीयैश्च मुद्गरैः। अश्मभिश्चाद्रिसदृशै
र्गण्डलैश्च दंसिताः। पट्टिसैर्भिण्डिपालैश्च परिघैश्चोत्तमायुधैः। घातनीभिश्च गुर्व्वीभिः शतघ्नीभिस्तथैव च। युगैर्यंत्रैश्च
निर्मुक्तैरर्गलैश्चाग्रताडिताः। दोर्भिश्चायतपीनांसैः प्रासैः पाशैश्च मुद्गरैः। सर्पैर्ललिह्यमानैश्च विसर्पद्भिश्च साय
कैः। वज्रैः प्रहरणीयैश्च दीप्यद्भिश्च तोमरैः। विकोशैश्चासिभिः शीतैः शूलैश्च शितनिर्म्मलैः। ते वै संदीप्तमनसः
प्रगृहीतास्त्रमायुधाः। कालनेमिं पुरस्कृत्य तस्थुः संग्राममूर्द्धनि। सा दीप्तशस्त्रप्रवरा दैत्यानां रुरुचे चमूः। द्यौर्निमी
लितनक्षत्रा सघनेवाम्बुदागमे। देवतानामपि चमूः रुरुचे शक्रपालिता। दीप्ताशीताष्लतेजोभ्यां चंद्रभास्करव
र्चसा। वायुवेगवती सौम्या तारागणपताकिनी। तोयदाविद्धवसना ग्रहनक्षत्रहासिनी। यमेन्द्रवरुणैर्गुप्ता धन
देन च धीमता। संप्रदीप्ताग्निपवना नारायणपरायणा। सा समुद्रौघसदृशी दिव्या देवमहाचमूः। रराजास्त्रवनी
नी मा यक्षगंधर्व्वशालिनी। तयोस्तु सेनयोरासीत्तदानीं तु वनं समं समागमः। द्यावापृथिव्योः संयोगो यथा स्याद्युगप २१
र्यये। तद्युद्धमभवद्घोरं देवदानवसंकुलं। क्षमापराक्रममयं दर्पस्य विनयस्य च। निश्चक्रमुर्बलाभ्यां ते सौम्य

नि५

भीमाः सुरासुराः। पूर्व्वापराभ्यां संरब्धाः सागराभ्यामिवाम्बुदाः। ताभ्यां बलाभ्यां संहृष्टाश्चेरुस्ते देवदानवाः। वनाभ्यां
पार्व्वतीयाभ्यां पुष्पिताभ्यां यथा गजाः। समाजघ्नुस्तथा भेरीः शंखान्दध्मुरनेकशः। स शब्दो द्यां भुवं चैव खं दिशश्च स
मपूरयत्। ज्याघाततलनिर्घोषा धनुषां कूजितानि च। दुंदुभीनां च निनदा दैत्यमंतर्दधुः स्वनं। तेऽन्योन्यमभिसंपे
तुः पातयंतः परस्परं। बभंजुर्बाहुद्वंद्वमन्योऽन्यं दानवा युयुत्सवः। देवतास्त्वस्त्रानी घोराः परिघांश्चोत्तमायसान्
ससर्ज्जुराजौ निस्त्रिंशान्गदा गुर्व्वीश्च दानवाः। गदापातैर्भग्नांगा बाणैश्च शकलीकृताः। परिपेतुर्भृशं केचित्पुनः
केचित्समर्जिरे। ततो रथैः सविमानैश्च तुरगैश्चाशुगामिभिः। समीयुस्ते च संरब्धा रोषादन्योऽन्यमाहवे। संवर्त्तमा
नाः समरे निवर्त्तंतस्तथापरे। रथा रथैर्निरुध्यंते पदाताश्च पदातिभिः। तेषां रथानां तुमुलः स शब्दः शब्दवाहिनां
बभूवाथ प्रक्रान्तानां नभसीव पयोमुचां। बभंजिरे रथान्केचित्केचित्संमृदिता रथैः। संबाधमेके संप्राप्य न
शेकुश्चलितुं रथाः। अन्योऽन्यस्याथ समरे दोर्भ्यां संक्षिप्य दर्पिताः। संह्रादमाना नराणा जघ्नुस्तत्रासिचर्म्मि
णः। अस्त्रैरन्ये विनिर्भिन्नाः रक्तं ववमुर्हतायुधि। क्षरज्जलानां सदृशा जलदानां समागमे। तदस्त्रैस्त्रास्त्रग्रथितं
क्षिप्तासिक्षिप्तगदाविलं। देवदानवसंरब्धं संकुलं युद्धमाबभौ। तद्दानवमहामेघं देवायुधतडित्प्रभं। अन्योऽन्य

लाणाकर्षियुद्धं द नवावनौ ।एतस्मिन्नंतरे क्रुद्धः कालनेमिर्म्महासुरः ।अवर्द्धत समुद्रांते आपूर्य्यमाण इवांबुदः ।
तस्यपीविद्युद्वलापीडाः प्रदीप्ताद्रानिवर्षिणः ।गात्रेन्नगशिराः प्रख्या विनिष्पेतुर्बलाहकाः ।क्रोधान्निःश्वस
तस्तस्य भ्रूभेदस्वेदवर्षिणः ।साग्निविस्फुलिंगपवना मुखान्निश्चेरुरर्चिषः ।तिर्य्यगूर्द्ध्वं च गगनं ववृधुस्तस्य बाहवः
पंचास्याः कृष्णवपुषो लेलिहाना इवोरगाः ।सोऽस्त्रजालैर्बहुविधैर्द्धनुर्भिः परिघैरपि ।दिव्यमाकाशमावव्रे नि :
श्वसितः पर्व्वतैरिव ।सोऽनिलोद्धतवसनो तस्थौ संग्राममूर्द्धनि ।संध्यातपग्रस्तशिखरः सानुमान्मेरुरिवापरः ।उर्द्धवेग
प्रविद्धैश्च शैलशृंगाग्रपादपैः ।अपातयद्देवगणान्वज्रेणेव महागिरीन् ।बहुभिः शस्त्रनिस्त्रिंशैश्छिन्नभि
न्नशिरोरसः ।न शेकुश्चलितुं देवाः कालनेमिहता युधि ।मुष्टिभिर्न्निहताः केचित्केचिच्च विदलीकृताः ।य
क्षगंधर्वपतयः पेतुः सह महोरगैः ।तेन वित्रासिता देवाः समरे कालनेमिना ।न शेकुर्यत्नवंतोऽपि कर्तुं यत्नं
विचेतसः ।तेन शक्रः सहस्राक्षः स्पंदितः शरबंधनैः ।ऐरावतगतः संख्ये चलितुं न शशाक ह ।निर्जलांभोदसंका
शो निर्जलार्णवसप्रभुः ।निश्चेष्टो पाशः कृतस्तेन विपाशो वरुणो मृधे ।रणे वैश्रवणस्तेन परिघैः कालरूपिभिः ।विल
तो लोकपालेशस्त्याजितो धनदक्रियां ।यमः सर्वहरस्तेन मृत्युप्रहरणो रणे ।याम्यामवस्थां समरे नीतः स्वां दिश २८

माविशत् ।स लोकपालानुत्सार्य्य कृत्वा तेषां च कर्म्म तत् ।दिक्षु सर्वासु देहं स्वं चतुर्द्धा विदधे तदा ।स नक्षत्रपथं
गत्वा दिव्यं स्वर्भानुदर्शितं ।जहार लक्ष्मीं सोमस्य तं चास्य विषयं महत् ।चालयामास दीप्तांशुं स्वर्गद्वारात्स
भास्करं ।सायनं चास्य विषयं जहार दिनकर्म च ।सोऽग्निं देवमुखं दृष्ट्वा चकारात्ममुखे स्थितं ।वायुं च तरसा जित्वा
चकारात्मवशानुगं ।स समुद्रान्समानीय सर्वाश्च सरितो बलात् ।चकारात्मवशे वीर्य्याद्देहभूताश्च सिंधवः ।आ
पः स्ववशगाः कृत्वा दिविजा याश्च भूमिजाः ।स्थापयामास जगतीं सुगुप्तां धरणीधरैः ।स्वयंभूरिव भूतानां मः
हाभूतपतिर्म्महान् ।सर्व्वलोकमयो दैत्यः सर्व्वलोकभयावहः ।स लोकपालैकवपुश्चंद्रसूर्य्यग्रहात्मवान् ।पा
वकानिलसंकाशो रराज युधि दानवः ।पारमेष्ठ्ये स्थितः स्थाने लोकानां प्रभवोऽव्ययः ।तं तुष्टुवुर्दैत्यगणा देवा इ
व पितामहं ॥ ॥इति खिलेषु हरिवंशे तारकामये कालनेमिप्रभावः ॥ ॥वैशंपायन उवाच ॥ पंचत्वं नाभ्यव
र्त्तंत विपरीतेन कर्म्मणा ।वेदो धर्मः क्षमा सत्यं श्रीश्च नारायणाश्रया ।स तेषामनुपस्थानात्सक्रोधो दानवेश्वरः ।
वैष्णवं पदमन्विच्छन्ययौ नारायणांतिकं ।स ददर्श सुपर्णस्थं शंखचक्रगदाधरं ।दानवानां विनाशाय भ्रा ।
मयंतं गदां शुभां ।सजलांभोदसदृशं विद्युत्सदृशवाससं ।स्वारूढं स्वर्णपत्राढ्यं शिखिनं काश्यपं खगं ।दृष्ट्वा दै

त्वविनात्रायस्वणोस्त्वं छोमिवाञ्छितं। दानवो विष्णुमहूानांस्तं न नापेक्ष्व मानसः॥ अयं स रिपुरस्माकं सर्व्वेषां देवत
द्विषां। अर्णवावसिनां चैव मधोर्व्वै कैटभस्य च॥ अयं स विग्रहोऽस्माकं अशाम्यः किल कथ्यते। येन नः संयु
गे घद्य वह्वो दानवा हताः॥ अयं स निर्घृणो युद्धे स्त्रीवालवधकारकः। देवदानवनारीणां सीमंतोद्धारणं कृ
तं। अयं स विष्णुर्देवानां वैकुंठश्च दिवौकसां। अनंतो नागिनामप्सु स्वयंभूश्च स्वयंभुवः। अयं स नाथो देवानां
अस्माकं विप्रियस्थितः। अस्य क्रोधेन महता हिरण्यकशिपुर्हतः। अस्यच्छायां समाश्रित्य देवा हव्यमुखे स्थि
ताः॥ आज्यं महर्षिभिर्दत्तमश्नुवंति त्रिधाकृतं। अयं स निधने हेतुः सर्व्वेषां देवविद्विषां। अस्य चक्रे प्रविष्टा
नि कुलान्यस्माकमाहवे। अयं स किल युद्धेषु सुरार्थे त्यक्तजीवितः। सवित्रे तेजसा तुल्यं चक्रं क्षिपति शत्रु
षु। अयं स कालो भूतानां कालभूते मयि स्थितः। अतिक्रांतस्य कालस्य फलं प्राप्स्यति दुर्म्मतिः। दिष्ट्या दानां सम
क्षं मे विष्णुरेष समागतः। अद्य मद्वाणनिष्पिष्टो मामेव प्रणमिष्यति। यास्याम्यपपन्न तिं क्षिप्रं सर्वेषां। अद्य संयुग
इमं नारायणं हत्वा दानवानां भयावहं। क्षिप्रमेव वधिष्यामि रणे नारायणाश्रयान्। जात्यंतरगतो ह्येष रणे २९
बाधति दानवान्। य एषोऽनंतः पुरा भूत्वा। पद्मनाभ इति स्मृतः। जघानैकार्णवे घोरौ तावुभौ मधुकैटभौ॥ विनिव

स्य स्वके जाने॥ निहतो दानवश्रेष्ठो द्विधाभूतं वपुः कृत्वा सिंहार्द्धं नरसंस्थितं। पितरं मे जघानैको हिरण्यक
शिपुं पुरा। श्वेतं गर्भमधत्तैनं महीतिदेवतारणिं। यत्र काले बलिर्यो वैः बद्धो वामनरूपिणा। त्रीन् लोकांश्च
जहारैष क्रममाणस्त्रिभिः क्रमैः। नूयस्त्विदानीं समरे संप्राप्ते तारकामये। मया सह समागम्य सदेव
स्त्वं नंक्ष्यति। स एवमुक्त्वा बहुधा क्षिपन्नारायणं रणे। वाग्भिरप्रतिरूपाभिर्युद्धमेवान्वरोचयत्। क्षिप्यमा
णोऽसुरेन्द्रेण नचुकोप गदाधरः। क्षमाबलेन महता सस्मितं वाक्यमब्रवीत्। अल्पं दर्प्पबलो दैत्यः स्थितः
क्रोधमदसहनः। हतस्त्वमात्मना दोषैः क्षमां योऽतीत्य भाषसे। अधमस्त्वं मम मतो धिगेतत्तव वाक्बलं। न
यत्र पुरुषाः संति तत्र गर्ज्जंति योषितः। अहं त्वां दैत्य पश्यामि पूर्व्वेषां मार्गगामिनं। प्रजापतिकृतं सेतुं को भित्त्वा
स्वस्तिमान्व्रजेत्। अद्य त्वां नाशयिष्यामि देवव्याघातकारकं। स्वेषु स्वेषु च स्थानेषु स्थापयिष्यामि देवताः। ए
वं ब्रुवति वाक्यं मधे श्रीवत्सधारिणि। जहास दानवः क्रोधाद्धस्तांश्चक्रे च सायुधान्। स बाहुशतमुद्यम्य सर्व्वास्त्र
ग्रहणं रणे। क्रोधाद्विगुणरक्ताक्षो विष्णुवक्षस्यताडयत्। दानवाश्चापि समरे मयतारपुरोगमाः। उद्यतायुध
निस्त्रिंशा दृष्ट्वा विष्णुमभिद्रवन्। गां श्वे ऽधातत्र वादयंतो महासुराः। तालाग्रयाश्च रुतुर्महो ऽवद्रावनो॥

सताड्यमानोऽरिबलैर्दैत्यैः सर्वायुधोद्यतैः । न चचाल हरिर्युद्धे कंप्यमान इवाचलः ॥ स संसक्तश्च सुपर्णेन का-
लनेमिर्महासुरः । सर्वप्राणेन महतीं गदामुद्यम्य बाहुभिः ॥ मुमोच ज्वलितां घोरां संरब्धो गरुडे परि । कर्म-
णा तेन दैत्यस्य विष्णुर्विस्मयमागतः ॥ यदा तस्य सुपर्णस्य पातिता मूर्ध्नि सा गता । तदागमत्पदान्नमिं । पक्षी
व्यथितविग्रहः ॥ सुपर्णं व्यथितं दृष्ट्वा क्षतं चैव पुरात्मनः ॥ क्रोधसंरक्तनयनो वैकुंठश्चक्रमाददे ॥ स ववृधे
न वेगेन सुपर्णेन समं प्रभुः ॥ भुजाश्चास्य व्यवर्द्धंत व्याप्नुवंतो दिशो दश ॥ स दिशः प्रदिशश्चैव खं गां चैव प्रपूरयन्
ववृद्धे च पुनर्लोकान्क्रांतुकाम इवौजसा ॥ तं युद्धायसकंडेणां वर्द्धमानं नभस्तले । ऋषयः सहसंगम्य तुष्टुवु-
र्मधुसूदनं ॥ स द्यां किरीटेनालिखन्साक्रम्य वांबरं । पद्भ्यामाक्रम्य वसुधां दिशः प्रच्छाद्य बाहुभिः ॥ सूर्यस्य र-
श्मितुल्यानां सहस्रारमरिक्षयं । दीप्ताभिसहसंघारं दर्शनीयं सुदर्शनं ॥ सुवर्णनेमिपर्यंतं वज्रनाभं भयावहं ।
मेदोऽस्थिमज्जारुधिरैः सिक्तं दानवसंभवैः ॥ अद्वितीयं प्रहारेषु क्षुरपर्यंतमंडलं ॥ स्रग्दाममाल्यविततं
कामगं कामरूपिणं । स्वयं स्वयंभुवा सृष्टं भयदं सर्वविद्विषां ॥ महर्षिरोषैराविष्टं नित्यमाहवदर्पितं ॥ क्षे- १००
पणाद्यस्य मुह्यंति लोकाः सस्थाणुजंगमाः ॥ क्रव्यादानि च जन्तूनि तृप्तिं यांति महाहवे ॥ न अप्रतिमकर्माणं

समानं सूर्यवर्चसा ॥ चक्रमुद्यम्य समरे क्रोधदीप्तो गदाधरः ॥ समुल्लनन्दानवं तेजः समरे स्वेन तेजसा ॥ चिच्छेदा
बाहूंश्चक्रेण श्रीधरः कालनेमिनः ॥ तच्च वक्त्रशतं घोरं साग्निचूर्णाट्टहासितं ॥ तस्य दैत्यस्य चक्रेण प्रममाथ
बलाद्धरिः ॥ स छिन्नबाहुर्विशिरा न प्राकंपत दानवः ॥ कबंधश्चास्थितः संख्ये विशाख इव पादपः ॥ तं वित
त्य महापक्षौ वायोः कृत्वा समं जवं । उरसा पातयामास गरुडः कालनेमिनं ॥ स तस्य देहो विमुखो विशाखः
खमुपरिभ्रमन् । पपात सदिवं त्यक्त्वा क्षोभयन्धरणीतलं ॥ तस्मिन्निपतिते दैत्ये देवाः सर्षिगणास्तथा ॥ सा
धु साध्विति वैकुंठं समेताः प्रत्यपूजयन् ॥ अपरे ये तु दैत्या वै युद्धे दृष्टपराक्रमाः ॥ ते सर्वे बाहुभिर्व्याप्ता न शेकुः
चलितुं रणे ॥ कांश्चित्केशेषु जग्राह कांश्चित्कंठेऽप्यपीडयत् ॥ पाटयत्कस्यचिद्वक्त्रं मध्ये कांश्चिदथाग्रहीत् ॥
ते गदाचक्रनिर्दग्धा गतसत्वा गतासवः ॥ गगनाद्भ्रष्टसर्वांगा निपेतुर्धरणीतले ॥ तेषु सर्वेषु दैत्येषु हतेषु पुरुषो
त्तमः ॥ तस्थौ शक्रप्रियं कृत्वा कृतकर्मा गदाधरः ॥ तस्मिन्विमर्दे निर्वृत्ते संग्रामे तारकामये ॥ तं देशमाजगा-
माशु ब्रह्मा लोकपितामहः ॥ सर्वैर्ब्रह्मर्षिभिः सार्द्धं गंधर्वैश्चाप्सरोगणैः ॥ देवदेवो हरिं देवं पूजयन्वाक्यमब्रवी
त् ॥ ॥ ब्रह्मोवाच ॥ कृतं देव महत्कर्म सुराणां शल्यमुद्धृतं ॥ वधेनानेन दैत्यानां वयं च परितोषिताः ॥ योऽयं त्वया

हतो विष्णो कालिनेमिर्महासुरः। त्वमेकोऽस्य मृधे हन्ता नान्यः कश्चन विद्यते।। एष देवान् परिभवंल्लोकांश्च सच
राचरान्। ऋषीन् कदनं कृत्वा मामपि प्रतिगर्जति। तदनेन तवोग्रेण परितुष्टोऽस्मि कर्मणा।। यदयं कालतु
ल्येनाजौ कालनेमिस्त्वया हतः। तदागच्छस्व भद्रं ते गच्छावो दिवमुत्तमां महर्षयस्त्वां तत्रस्थाः प्रतीक्षन्ते सदो
गताः। अहं महर्षयश्चैव तत्र त्वां वदतां वर। विधिवद्यद्विधिष्यामो गीर्भिर्हृद्याभिरच्युत। किं वा तत्र वदा
स्यामि वरं कुरु नतां वर। सुरेष्वपि सदैत्येषु वराणां वरदो भवान्।। निर्यातयैतत् त्रैलोक्यं स्फीतं निहतकण्टकं। अ
स्मिन्नेव मृधे विष्णो शक्राय सुमहात्मने।। एवमुक्तो भगवता ब्रह्मणा हरिरीश्वरः। देवान् शक्रमुखान् स
र्वाननुवाच शुभया गिरा।। ।।विष्णुरुवाच।। श्रूयतां त्रिदशाः सर्वे यावन्तस्थ समागताः। श्रवणावहितैर्देवैः पु
रस्कृत्य पुरंदरं। अस्मिन्नः समये सर्वे कालिनेमिमुखा हताः दानवा विक्रमोपेताः शक्रादपि महत्तराः। अ
स्मिन्महति संक्रन्दे द्वावेव तु विनिःसृतौ। वैरोचनिश्च दैत्येन्द्रः स्वर्भानुश्च महाग्रहः। तदिष्टां भजतां शक्रो दिशं
वरुण एव च। याम्यां यमः पालयतां उत्तरां च नराधिपः। ऋक्षैः सह यथायोगं काले चरतु चन्द्रमा। अब्दं चरतु ९१
रवं सूर्यो भजतामयनैः सह। आज्यभागाः प्रवर्तन्तां सदस्यैरभिपूजिताः। हूयन्तामग्नयो विप्रैर्वेददृष्टेन कर्मणा।

वाश्च बलिहोमेन स्वाध्यायेन महर्षयः। श्राद्धेन पितरश्चैव तृप्तिं यान्तु यथासुखं। वायुश्चरतु मार्गस्थस्त्रिधा दीप्यतु पा
वकः। त्रयो वर्णाश्च लोकांस्त्रीन् सर्पयन्त्वात्मनो गुणैः। क्रतवः संप्रवर्तन्तां दीक्षणीयद्विजातिभिः। दक्षिणाश्चोपवर्तन्तां
यथोक्तं सत्रयाजिनो।। गावः सूर्यो रसान् सोमो वायुः प्राणांश्च प्राणिषु। तर्पयन्तः प्रवर्तन्तां शिवैः सौम्यैश्च कर्मभिः
यथावदनुपूर्व्वेण महेन्द्रसलिलोद्भवाः। त्रैलोक्यमातरः सर्वाः सागरं यान्तु निम्नगाः। दैत्येभ्यस्त्यज्यतां भीश्च शां
तिं व्रजत देवताः। स्वस्ति वोऽस्तु गमिष्यामि ब्रह्मलोकं सनातनं। स्वगृहे स्वर्गवासे वा संग्रामे वा विशेषतः।। विश्रं
भो हि न कर्तव्यो नित्यं क्षुद्रा हि दानवाः। छिद्रेषु प्रहरन्त्येते न चैषां संस्थितिर्ध्रुवा। सौम्यानामृजुभावानां भवानां
चार्यवामतिः। अहं त्वदुष्टभावानां युष्माकं शुद्धात्मनां। असंभ्रमवर्तमानानां मोहं दास्यामि देवताः। यदाच
सुरा धर्षं दानवेभ्यो नयं न वेत्थ। तदा समुपगम्याशु विधास्ये च सतोऽनयं।। ।।वैशंपायन उवाच।। एवमुक्त्वा
सुरगणान् विष्णुः सत्यपराक्रमः। जगाम ब्रह्मणा सार्द्धं ब्रह्मलोकं महायशाः। एतदाश्चर्यमभवत् संग्रामे तारका
मये। दानवानां च विष्णोश्च यन्मां त्वं परिपृच्छसि।। ।।इति खिले पुहरिवंशे कालिनेमिवधो नाम।। ।।जनमेजय उ
वाच।। ब्रह्मणा देवदेवेन सार्द्धं सलिलयोनिना। ब्रह्मलोकगतो ब्रह्मन् वैकुण्ठः किं चकार ह। किमर्थं चादिदेव

ननीतः सखिलयोनिना॥ विस्नुर्हत्य वधंछन्ने देवैश्चलत मत्र्ययः॥ ब्रह्मलोके च किं स्थानं कं वा योगमुपास्रसः॥ कं
वा स्वधारनियमं सवितुर्नतनावनः॥ कथं तस्यासतस्तत्र विश्वं जगदिदं महत्॥ श्रियमाप्नोति विपुलं सुरासुर
गणार्चितं॥ कथं स्वपिति धर्मातिवुद्ध्यतवां वुद्धया॥ कथं च ब्रह्मलोकस्थो धुरं वहति लोकिकी॥ चरितंत
स्य विप्रेंद्र दिव्यं नवति नोदिवि॥ विस्तरेण यथातत्वं सर्वमिछामि वेदितुं॥ ॥वैशंपायन उवाच॥ शृणु नाराय
णस्यादौ प्रवृत्तीर्विस्तरेणतु॥ ब्रह्मलोकं यथारूढो ब्रह्मणा सह मोदते॥ कामंगतिस्तस्य सत्स्मा देवर पिंडुरास-
दा॥ यत्र वत्स्याम्यहं राजन् स्तन्मे निगदतः शृणु॥ एषलोकमयो देवो लोकाश्चतन्मयास्त्रयः॥ एषदेवमयश्चैव देवाश्च
तन्मया दिवि॥ अस्यपारं न पश्यंति वहवः पारकांक्षिणः॥ एषपारं परं चैव लोको नां वेद माधवः॥ अस्य वेदार्थकार-
स्य मार्गितव्यस्य देवतः॥ शृणुवैयत्तदादृत्तं ब्रह्मलोके पुरातनं॥ भगवान् ब्रह्मणा लोके दृष्टापतामहं पदं॥ ववंदे
तान् ऋषीन् सर्वान् पारमेष्ठेन कर्मणा॥ सो ऽग्निं प्राक्स्व वने दृष्टा हूयमानं महर्षिभिः॥ अववंद महातेजाः स्व-
चा सर्वाह्निकी क्रियां॥ स ददर्श मखं घोरे रिज्यमानं महर्षिभिः॥ नागं यज्ञमय मम्लानं स्वदेह परमेष्ठितं॥ अनि
वार्यो ऽनिवार्यो ना मृषीणां ब्रह्मवर्चसां॥ परिचक्राम सो ऽचिंत्यो ब्रह्मलोकं सनातनं॥ स ददर्श स्थितान् नृपा १०२

चषालाग्र विनूषितान्॥ मखेषु च ब्रह्मर्षिभिः त्रातशाः स्नात लक्षणान्॥ आज्यधूमं समाघ्राय शृण्वन् वेदान् हि
जेरितान्॥ यज्ञे रिज्यंत मात्मानमुपत्रूपं स तत्र चचार ह॥ तामृचुर्क्ष पयोदेवाः सदस्याः सदसि स्थिताः॥ अथार्थ्यप्र
तनुजाः सर्वं पवित्रात्तरपाणयः॥ देवेषु वर्त्तते यद्धि तद्धि सर्वं जनार्दनात्॥ यद्यत्प्रवृत्तं देवेभ्यस्तद्धि हि मधुसूद
नात्॥ अग्निष्टाम मयं लोकं यं विद्धि विद्धि वा जनाः॥ तं सामममिं लोकं च वेद विष्णुं पितामहं॥ क्षीराद्यथा दधिन
वेत्॥ दध्नः सर्पिर्यथा नवेत्॥ मथ्यमानेषु तत्तेषु तथा लोको जनार्दनात्॥ तथैं द्रियैश्च भूतैश्च परमात्मा निधी
यते॥ तथा वेदेश्च देवैश्च लोकैश्च विदितो हरिः॥ यथान्तो ऽद्रियावाक्षि र्विहिता नु विदेहिनां॥ तथा प्राणस्वरू
वासिह्वानां दिविवेछवी॥ स निर्गुणः सत्रफलदः पवित्रं परमाश्रवाः॥ लोकतत्व च वराघेष मंत्रमंत्र इवार्च्य
ते॥ ॥ऋषय ऊचुः॥ स्वागतं ते सुरश्रेष्ठ पद्मनाभ महाद्युते॥ इत्युं जज्ञियमातिथ्यं मं ततः प्रतिगृह्यतां॥ त्वमस्य
जज्ञद्दत्तस्य पात्रं पाद्यस्य पावनः॥ अतिथिस्त्वं हिमं चोक्तः स्कंदष्टः सततं मतः॥ त्वयि युध्द गते विष्णो न प्रवर्त
तनः क्रियाः॥ अवक्लवस्य जज्ञस्य न हि कर्म विधीयते॥ सदक्षिणस्य जज्ञस्य त्वत्प्रसूति फलं न वेत्॥ अथा
त्मानमिहास्माभिरिज्यमानं निरीक्ष्यते॥ एवमाभाषितान् विप्रान् नगवान् प्रत्यभाषत॥ मुमुदे ब्रह्मलोक

छो ब्रह्मेवादि पितामह॥ ॥इति श्री हरिवंशे ब्रह्मलोकगमनं नाम॥ वैशंपायन उवाच॥ ऋषिभिः पूजितस्ते
स्तु विवेशाहरिरीश्वरः॥ पौराणं ब्रह्मसदनं दिव्यं नारायणाश्रयं। तत्र विविशे हंसयुक्तानामं असदागतान्
पूर्णमध्यादिदेवाय ब्रह्मणे पद्मयोनये। स्वेन नाम्ना परिज्ञाते स तन्नारायणाश्रयं। प्रविशन्नेव भगवान्
आयुधानि व्यसर्जयत्। स तत्राम्बुपतिप्रख्यं ददर्शालयमात्मनः। स्वधिष्ठितं देवगणैः तथा शाश्वतैश्च महर्षिभिः ः
संवर्तकाम्बुदोपेतं नक्षत्रस्थानसंकुलं तिमिरौघपरिक्षिप्तं कं अप्रधृष्यं भास्करैः। न तत्र विषयो वायोर्नेन्
दोर्नैव विवस्वतः। वपुषा पद्मनाभस्य स देशस्तेजसावृतः। स तत्र प्रविशन्नेव जटाभारं समुद्वहन्। सह
स्रशिरसा नन्तान्नारायणो योपचक्रमे। लोकानामन्तकालज्ञा कालीनयनशालिनी। सुप्तस्थं महात्मानं
निद्रा तं कामरूपिणी। स शिश्ये नारायणे दिव्ये समुद्रान्तादृशीतले। हरिः कार्णवा केन व्रतेन व्रतिनां वरः तं
नारायणं महात्मानं भवायजगतः प्रभुं। उपसांचक्रिरे विष्णुं देवाः सर्षिगणास्सदा। तस्य सुप्तस्य शुशुभे ना
भीमध्यात्समुत्थितं। आद्यं तस्यासनं पद्मं ब्रह्मणः सूर्यवर्चसं। सहस्रपत्रं वर्णाढ्यं सुकुमारं विभूषितं। ब्र
ह्मसूत्रोद्यतकरः स्वपन्नेव महामुनिः। आवर्तयति लोकानां सर्वेषां कालपर्ययं। निश्वासस्य वदना ९३

न्निःश्वासः पवनोरिताः। प्रजानां पतयो ह्येव निपतंलुप्तं तिचा तेसृष्टाः प्राणिनामेध्या विनक्ता ब्रह्मणा स्वयं। च
त्वद्वास्यं गतिं जग्मुः स्वलंतो लोकेन कर्मणा। न नं वेद स्वयं ब्रह्मा नापि ब्रह्मर्षयोऽव्ययाः। विष्णुं निद्रामयं योगं
प्रविष्टं तमसावृतं। तं तु ब्रह्मर्षयः सर्वे पितामह पुरोगमाः। न विदुः संक एष स्तुसंकविदासीन मासन जागर्वि
कश्चक शेतकश्चसुसश्चन स्तुते। काभ्या गवान्का द्युतिमान्सहस्रान्सहस्रतरश्चकः। विमृशंति स्मतं देवं दिव्या निरू
पपत्तिभिः। न चैनं शेकुरन्वेष्टुं कर्मतो जन्मतोऽपिवा। गाथानिसत्यप्रतिष्ठा निर्मतस्य चरितं विदुः। पुराणे
च पुराणं पुरूषयः संप्रचक्षते। श्रूयतां चास्य चरितं देवष्वपि पुरातनं। महापुराणात्प्रभृति पारं तस्य न वि
द्यते। यच्चास्य देवदेवस्य चरितं स्वप्नभाव्जो। तेन ताः श्रुतयो व्याप्ता वैदिकालौकिकाश्च याः। भवकालेन कल्प
षलोकानां त्रतवा मनः। दानवानाम नावाप्य जागर्ति मधुसूदनः। यदैनं वीक्षितुं देवा न शेकुः सुसमव्ययं॥
ततः स्वपिति धर्मान्ते जागर्ति जलदक्षये। सत्वयज्ञाश्च वेदाश्च जज्ञांगानि व सर्वशः। या हि जज्ञगतिः प्रोक्ता स
एव पुरुषोत्तमः। तस्मिन्स्वप्ते निवर्त्तन्ते मंत्रपूर्णाक्रतुक्रिया। शरत्प्रवर्त्तियज्ञा हि जागर्ति मधुसूदनः। तदिदं व
र्षिकं चक्रं वार्यत्यंबुदेश्वरः। वर्त्तने कर्मऊर्द्धाणां सर्वेविष्णोः पुरंदरः। श्याक्षेपागा कर्री माया निद्रेति जगतिस्थि

ता॥ साकस्माद्द्विपिणी घोरा कालरात्रिर्महीक्षितां॥ तस्या ह्यनुग्रमाहारा निशा दिवसनाशिनी॥ जीविताद्दहराघो
रा सर्वप्राणभृतां कवि॥ न तया कश्चिदाविष्टो जृंभमाणो मुहुर्मुहुः॥ शक्तः सम्प्रसहितुं वेगं मज्जतीव महार्ण
वे॥ अन्यजातिकवि मर्त्यानां ब्रह्मणा वा कथं जनै न निशा न भवति लोकस्य निद्रा सर्वस्य लोकिकी॥ स्वप्नांतच्छीय
ते घोषा प्राप्य शोकविदेहिनां॥ मृत्युकाले च भूतानां प्राणान्नाशयते नरः॥ देवेष्वपि दधारनं नान्या नारायणा
दृते॥ सर्वी सर्वहरस्येषा माया विष्णोः शरीरजा॥ सैषा नारायणमुखं दृष्ट्वा कमल लोचना॥ लोकानन्त्येनका
लेन ग्रसते नृतमाहिनी॥ एवमेषा हितार्थाय लोकानां कृष्णवर्त्मना॥ ध्रियते सर्वनीयाच पत्याइव पतिव्र
ता॥ स तया निद्रया छन्नस्तस्मिन्नारायणाश्रये॥ स्वपिति स्म तदा विष्णुर्मोहयन् जगदव्ययं॥ तस्य वर्ष सहस्रा
णि शयानस्य महात्मनः॥ जग्मुः कृतयुगं चैव त्रेता चैव युगोत्तमे॥ स तु दृष्ट्वा परपर्यंते दृष्ट्वा लोकाकान्मुक्तः
खितान्॥ प्रबुध्यत महातेजाः श्रूयमानो महर्षिभिः॥ ॥ऋषय ऊचुः॥ जही हि निद्रां सहजां भुक्तां स्रग्वामिव
स्रजं॥ इमे ते ब्रह्मणा सार्द्धं देवा दर्शनकांक्षिणः॥ इमे त्वां ब्रह्म विद्रूपो ब्रह्मसंस्थवादिनः॥ वर्द्धयंति हृषीके १०४
श ऋषयः संशितव्रताः॥ एतेषामात्मभूतानां भूतानामात्मसंभव॥ शृणु विष्णो शुभा वाचो भूयो मात्म निलं

नसां॥ इमे त्वां मुनयः सप्त सहिता मुनिमंडले॥ स्तुवंति देव दिव्यानि गेयानि गीर्भिरंजसा॥ उत्तिष्ठ शतपत्राक्ष
पद्मनाभ महाद्युते॥ कारणं किंचिदुत्पन्नं देवानां कार्यगौरवात्॥ ॥वैशंपायन उवाच॥ स संश्रित्य प्रजा
सर्द्वेति मिरोघं विसृज्य तान् ददृष्टे च हृषीकेशः श्रिया परमया ज्वलन्॥ स ददर्श सुरान् सर्वान् समेता
न् स पितामहान्॥ विवक्षुंश्च प्रहृष्टेन्मितान् जगदर्थं समागतान्॥ तानुवाच हरिर्देवो निद्राविवृतलोच
नः॥ तत्त्वदृष्ट्यार्थया वाचा धर्मसंहितयुक्तया॥ ॥विष्णुरुवाच॥ कुतो वो विग्रहो देवाः कुतो वा भयमाग
तं॥ कस्य वा केन वा कार्यं किं वा मत्त प्रवर्त्तते॥ न खल्वकुशलं लोके वर्त्तते दानवोत्थितं॥ नृणामायास
जननं शीघ्रमिच्छामि वेदितुं॥ एष ब्रह्मविदां मध्ये विहाय शयनोत्तमं॥ स्थितो वायनवतां मध्ये स्थितः किं
करवाणि वः॥ ॥इति श्रीहरिवंशे विष्णोर्योगशयनोत्थानं॥ वैशंपायन उवाच॥ तच्छ्रुत्वा विष्णुगदितं ब्र
ह्मा लोकपितामहः॥ उवाच परमं वाक्यं हितं सर्वं दिवौकसां॥ नास्ति किंचिद्भयं विष्णो सुराणामसुरात्त्व
कं यथा नवा न नवदः कश्चिद्धीरारणरणे॥ शक्रे जयति देवेशे त्वयि वा सुरसूदने॥ धर्मे प्रयतमानानां
मानवानां कृतात्मनां॥ सत्यधर्मे च निरतान् मानवान् विगतज्वरान्॥ नाकालधर्मिणां मृत्युः सक्तो तिप

तिवी क्षितेमानवानां च पतयः पार्थिवाश्च परस्परं। षड्भागमुपभुंजाना न न कुर्वंति मिथ्या॥ ते प्रजानां शुभ
कराः करदैर्विगर्हिताः। आकरे हि प्रयुक्तार्थाः कोशमाहरयंत्युत। स्फीतान् जनपदान् स्वान्स्वान् पाल
यंति क्षमापराः॥ अतीत्यात्र दंडाश्च त्रेता वर्णान् जुगुपुर्जनाः। नातिहिंसनीयान्नृतानां सविवाः साधुसत्कि
ताः। चतुरंगबलैर्युक्ताः षड्गुणाननुपभुंजते। संधिविग्रहयानानि आसनं द्वैधमाश्रिताः षड्गुणाः त्राकर्यंषि
स्वप्रभावो स्याद मंत्रजाः॥ ॥इति अमरः॥ धनुर्वेदपरा नित्यं सर्वे सर्वे वदे प्रतिष्ठिताः। यजंति च यथाका
लं यज्ञैर्विपुलदक्षिणैः। वेदानधीत्य दीक्षा निर्म्मद्दषीन् ब्रह्मचर्यया॥ श्राद्धैश्च मध्येः त्रातसर्प्पयंति
पितामहान्। नैषामविदितं किंचित्रिषु लोकेषु विद्यते। वैदिके लौकिके चैव धर्मे त्रास्त्रो कमेव चाति-
तरा परदृष्टार्थाः महर्षिसमतेजसः। त्रयः स्नतयुगं कर्तुमुत्सहंते नराधिपाः। तेषामेव प्रभावेन विसंवर्ष
त्ति वासवः। यथार्थं च ववुर्वाता विरजाश्चादिशोदश। निरुत्पाता वसुधा सुप्रचाराश्च खेग्रहाः॥ चंद्रमाश्च स
नक्षत्रः सौम्यं चरति योगतः। अनुलोमकरः सूर्यो ह्ययने द्वे चचार ह। हव्यैश्च विविधैस्तृप्ताः श्मन गंधी कृता १०५
त्राः॥ एवं सम्प्रवृत्ते तु विक्रमेषु मखादिषु। तर्प्यय ख्म महीलक्ष्मी नृणां कालनयं कृताः। तेषां वालित

कोटीनामन्याऽन्यमनुवर्त्तिनां। राज्ञां बलैर्बलवतां पीड्यते वसुधातलं। येयेनारपरिश्रांता पीड्यमाना नरा
धिपैः। पृथिवी समनुप्राप्ता नौरिवासन्नविप्लवा। युगांतसदृशं रूपं शैला चलितबंधनं। जलौघोडाकूले
खेदं दन्त्रीयंती मुक्तमर्यादाः। क्षत्रियाणां वपुनिश्च तेजसा च बलेन च। नृणां च राष्ट्रैर्हि क्षीणैः श्राम्यंती वव
सुंधरा। पुरे पुरे नगरपतिः कोटिसंख्यैर्बलैर्वृतः। राष्ट्रे राष्ट्रे च बहवो ग्रामाः शतसहस्रशः। भूमिपानां
सहस्रैश्च तेषां च बलिनां बलैः। ग्रामायुताद्यैः राष्ट्रैश्च भूमिर्निर्वेदमागता। सैयं निरामयं कृत्वा। निश्चेष्टा
कालमग्रतः। प्राप्ता तवालयं विष्णो नवांश्चास्या परा गतिः। कर्मभूमिर्मनुष्याणां भूमिरेषा व्यथां गताः
यथा न सीदेत्तत्कुर्याद्जगत्येषा हि शाश्वती। अस्या हि पीडिनेदोषा महानस्या च मधुसूदन॥ क्रियाल्पै
मचला गता॥ यदस्याः कृतवं तस्मत्वा पि नवता कृते। नारावतारणार्थं हि मे त्वया मस्त्वया सह। सत्यपथ
दिष्ठिता ह्येते राजानो राष्ट्रवर्द्धनाः। नराणां च त्रयो वर्णा ब्राह्मणाननुपयाजिनः। सर्वे सत्यमयं वा कुवर्णा
णोधर्मपरायणाः। सर्वे वेदपरा विप्राः सर्वे विप्रपरा नराः। एवं जगति वर्त्तंते मनुष्या धर्मकारणात्। यथाध
र्मवधो नस्यात् यथा नीतिः प्रवर्त्तते। सतां गतिर्वियं नान्या धर्मश्चास्याः सुसाधनं। राज्ञां चैव वधः कार्य्यो ध
सहजोजा समोत्पत्कांबता ले ५ जुर

नश्च लोका
नाद्भुता च
जगद्धेतु॥
स्पात्रे न व्यक्त
वेषु पार्थिवो
दाप्रपीडिता॥

रणपानारनिर्णये। तदागच्छ महानाग सदैव मंत्रकारणात्। वृजामो मेरुशिखरं पुरस्कृत्य वसुंधरां॥ ॥इति
हरिवंशे नारावतारणे॥ वैशंपायन उवाच॥ बाढमित्येव सहितेंडुर्हिंनानो दनिःस्वनः। प्रतस्थे दुर्हिनाका
राः लल्लवपुरिवाचलः। समुक्तामणिविद्यातेस चंद्रानोद वर्चसा। सनदेमंडलं रुक्मं संविवृद्धी घरा हरिः
सचास्यारसि विस्तीर्णेरामां चाङ्गतराजिमान्। श्रीवत्सराजतश्रीमान्हृदे स्तनहृद्यमुखां चितः। पीतवसा
नेवसने लोकानां गुरुरव्ययः। हरिसो न्रवदालक्ष्यः संसंध्या न्वइवाचलः। तं व्रजंतं सुपर्णेन पद्मयोनि
गतानुगं। अनुजग्मुः सुरगणाः संगताः सकचक्रषः। नातिदीर्घेण कालेन ते गचारत्नपावतां। ददृशुर्दे
वतास्तत्र स्वां सभां कामरूपिणी। मेराः त्रिशिखर विन्यस्तो सयुक्तां सूर्यवर्चसा। कांचनस्तं नरचितां कृ
वैडूर्यतोरणां। मणिनिर्माणविन्यासां विमानशतमालिनी। रत्नजालान्तरवतीं कामगां रत्नभूषितां
कृतेरत्नसमाकीर्णां सर्वर्तुकुसुमोत्कटां। देवमायाधरां दिव्यां निर्मितां विश्वकर्मणा॥ तां दृष्ट्वा हृष्टमन
सः यथास्थानं यथाविधि। यथानिवेशं ते हि सा विविशुस्ते सभांशुभां। तेन यद्वेडर्यथा केषु विमानेष्व
सनेषु च। नद्रासनेषु पीठेषु कुशेषु प्रस्तरेषु च। ततः प्रभंजनो वायुर्ब्रह्मणा साधुचोदितः। मात्राहइति १९

कला २

सर्वत्र प्रवक्तुमाथतं सनं॥ निःशब्दस्तिमिते तस्मिन्। समाजे त्रिदिवौकसां। वनापेश्वराणीवाक्यं खेदात्मकमपनाविणी
॥ ॥धरण्युवाच॥ अहमादौ पुराणस्य संक्षिप्ता पद्मयोनिना। मां वदतौ सर्वमृन्मयौ द्वौ महासुरौ। कर्णस्रोतोद्भवौ
तोहि विस्तारस्य महात्मनः। महार्णवे प्रस्वपतः काष्ठकुड्यसमाश्रितौ। तौ विवत्रा स्वयं वायुब्रह्मणा साधुवादि
तः। तौ दिवं छादयंतौ तु वहथतं महासुरौ। वायुप्राणौ तु तौ गत्वा ब्रह्मा परिमृज्य नन्दनः। एकं मेऽनुत्तरं मेनकठि
नेवद चापरं। नामनी तु नयोश्चक्रे सविनुः सलिलोद्भवः। मृदुस्त्वयं मधुर्नाम कठिनः कैटभो भवत्। तावदस्यारु
तनामानौ चरत्त्वबलगर्वितौ। सर्वमेकार्णवं घोरं याधुकामो मुनिर्नयौ। तावागतास मालोक्य ब्रह्मा लोकपिता
महः। एकार्णवं तु निचयं तत्रैवांतरधीयत। सपद्मे पद्मनाभस्य नाभिमध्यात् समुत्थितेरा चयामास वासतिं गुर्धांव्र
स्पचत्रमुखः। तावुभौ जलगर्भस्थौ नारायणपिता महः। वाहन्तवर्षगणानष्क्र त्रायानौ न च कंपन्तः। अथदीर्घ
स्पकालस्य तावुभौ मधुकैटभौ। आजग्मतुस्तमुद्देशं यत्र ब्रह्मा व्यवस्थितः। दृष्ट्वा तावक्राधारौ महाकायौ
डुरासदौ। ब्रह्मणा ताडितौ विष्णुः पद्मनालेन चैव तदा। उत्पपात प्रशयनात् पद्मनाभो महाद्युतिः। तयुद्धमन
वद्यारं तयामस्य च वै तदा। एकार्णवे तदा लोके त्रैलोक्ये जलतां गते। तदा सत्तुमुलं युद्धं वर्षसंख्या सहस्रतः।

नचता वसुंधरा युद्धे तदाश्रममवाप्नुतः। अथ दीर्घस्य कालस्य तौ दैत्यौ युद्धदुर्मदौ। ऊचतुः प्रीतमनसौ देवं नारायणं ह
रिं। प्रीतौ स्वस्तव युद्धेन श्लाघ्यस्त्वं मृत्युरावयोः। आवां जहि न यत्रोर्वी सलिलेन परिप्लुता। हतौ च तव पुत्रत्वं प्राप्नु
याव: सुरोत्तम। यो ह्यावां युद्धे निर्जेता तस्यावां विहितौ सुतौ। स तौ गृह्य मृधे दोर्भ्यां देवस्तौ समपीडयत्। ऊरुभ्यां तु
निधनं चैव तावुभौ मधुकैटभौ। तौ हतौ चाप्लुतौ तोये वपुर्भ्यामेकतां गतौ। मेदो मुमुचतुर्दैत्यौ मथ्यमानौ जलो
र्मिभिः। मेदसा तज्जलं व्याप्तं ताभ्यामंतर्दधे ततः। नारायणश्च भगवानसृजच्च पुनः प्रजाः। दैत्ययोर्मेदसा
छन्ना मेदिनीति परिश्रुता। प्रभावात्पद्मनाभस्य शाश्वती जगती कृता। वराहेण पुनर्मग्ना मार्कंडेयस्य पश्यतः।
विषाणेनाहमेकेन तोयमध्यात्समुद्धृता। हृताहं च मनोर्मध्ये तदा युष्माकमग्रतः। बलेः सकाशाद्दैत्यस्य वि
ष्णुना प्रभविष्णुना। सांप्रतं खिद्यमानाहमेनमेव गदाधरं। अनाथा जगतां नाथं शरण्यं शरणं गता। अग्निः सु
वर्णस्य गुरुर्गवां सूर्यो गुरुः स्मृतः। नक्षत्राणां गुरुः सोमो मम नारायणो गुरुः। यत्त्वहं धारयाम्येका जगत्स्था
वरजंगमं। मया धृतं धारयते सर्वमेतद्गदाधरः। जामदग्न्येन रामेण भारावतरणेप्सया। रोषात्त्रिःसप्तकृत्वोऽहं ९०
क्षत्रियैर्विप्रयोजिता। सास्मि वेद्यां समारोप्य तर्पिता नृप शोणितैः। रजस्वलेव युवतिः कश्यपस्य मुपस्थिता।

समाश्वास्य परिष्वाह किं भूमि चिंत्य मवाङ्मुखी। वीरपत्नी व्रतमिदं धारयंती विषीदसि। सा तं विज्ञापितवती कश्यपं लो
कभावनं। पतयो मे हता ब्रह्मन्भार्गवेण महात्मना। साहं विहीना विक्रांतैः क्षत्रियैः शास्त्रवृत्तिभिः। विधवा शू
न्यनगरा न धारयितुमुत्सहे। तन्मह्यं दीयतां नाथ भगवन्सदृशो नृपः। रक्षेद्यो मां सग्रामनगरां यो मां सागरमालि
नीं। स श्रुत्वा भगवान्वाक्यं बाढमित्यब्रवीत्प्रभुः। ततो मां मानवेंद्राय मनवे संप्रदत्तवान्। स मनुप्रभवं पुण्यं प्रे
क्ष्वेक्ष्वाकुकुलं महत्। विपुलेनाग्निकालेन पार्थिवात्पार्थिवं गता। एवं दत्तास्मि मनवे मानवेंद्राय धीमते।
भुक्तास्मि राजसहस्रैश्च महर्षिकुलसंभवैः। बहवः क्षत्रियाः शूरा मां जित्वा दिवमाश्रिताः। ते सर्वे कालवशं प्राप्य
मय्येव प्रलयं गताः। मत्कृते विग्रहा लोके वृत्ता वर्तंत एव च। क्षत्रियाणां बलवतां संग्रामेष्वनिवर्तिनां। एतद्यु
ष्मद्भवेन देवेन परिणम्यते जगद्धितार्थं कुरुत राज्ञां देवं रणक्षये। यद्यस्ति मयि कारुण्यं भारस्येतिल्प
कारणात्। एकश्चक्रधरः श्रीमान्नयं मे प्रयच्छतु। यमहं भारसंतप्ता संप्राप्ता शरणार्थिनी। नारायण यथा ब्रह्मा
विष्णुरेव ब्रवीतु मां॥ ॥इति हरिवंशे धरणीवाक्यं॥ वैशंपायन उवाच॥ तच्छ्रुत्वा पृथिवीवाक्यं सर्वे त्रिदिवौ
कसः। तदर्थं कृत्यं संचिंत्य पितामहमथाब्रुवन्। भगवन्क्रियतामस्या धरण्या भारसंनतिः। शरीरकर्ता लो

कानां वंदितो लोकस्य चेश्वरः। यत्कर्तव्यं मया देव इंद्रेणापि महात्मना। यत्कार्यं धनेशेन स्वयं नारायणेन वा। य
द्वा चंद्रसमो कार्य्यं भास्करेणानिलेन वा। आदित्यैर्वसुभिर्वापि रुद्रैर्वा लोकभावनैः। अश्विभ्यां देवदेवैर्वा-
न्यां साध्यैर्वा त्रिदिवालयैः। बृहस्पत्युशनोभ्यां वा कालेन कलिनापि वा। माहेश्वरेण वा ब्रह्मन्‌ विशाखेन गु
हेन वा। जल्हरा रक्षसा गंधर्वैश्चारणैश्च महोरगैः। पर्वतैः शैलमुख्यैर्वा सागरैर्वा सहोर्म्मिभिः। गंगामुख्याभिर्दि
व्याभिः सरिद्भिर्यत्सुरेश्वर। शिवमाज्ञापयस्व त्वं कथमंशः प्रयुज्यताम्‌। यदि तत्पार्थिवं कार्यं कार्य्यं पार्थिवविग्रहः
कथमंशावतरणं कुर्म्मः सर्वे पितामह। अंतरिक्षगता ये न पृथिव्यां ये च पार्थिवाः। सदस्यानां च विप्राणां पा-
र्थिवानां कुलेषु च। अजा निजाश्च वतन्त्रः सृजामः जगतीतले। सुराणामेककार्य्याणां श्रुत्वैतन्निश्चयं महत्‌
देवैः परिवृतः प्राह वाक्यं लोकपितामहः। रोचते मे सुरश्रेष्ठा युष्माकमपि निश्चयः। सृजध्वं स्वशरीरांशां
४४ सिजसात्म समान्भुवि। सर्वेत्राश्च सुरश्रेष्ठा तेजो निरवरोहत। नावयंतानुवंदेवील बात्रिकवनश्रियं पा
र्थिवेनारतेवंत्रो हर्वमेव विजानता। पृथिव्यां संभवमिति दंश्रयतां यन्मया कृतं। समुद्रेऽद्य पुरा हर्षं वेलामा
साद्य पश्चिमां। आसे सह तनूजेन कत्रपपेन महात्मना। कथाभिः पूर्ववृत्ताभिः लोकवेदानुगाभिभिः इतिवृत्तैः ४४

श्रवद्भिः पुराणैश्च नवैर्गुणैः। कुर्वतस्तु कथास्तास्ताः समुद्रः सह गंगया। समीपमाजगामास्य प्रयुक्तोऽसौ य
मारुतैः। सवीचीविषमां कुर्वन्‌ गतिवेगतरंगिणीं। यादोगणविचित्रेण संछन्नस्तोयवाससा। शंखमुक्ता
मलतनुः प्रवालमणिभूषणः। युक्तस्त्वं दुसमाहर्षिः। साचगंनीरनिःस्वनः। समां परिनवन्नेव स्वां वेलां सम
तिक्रमन्‌। स्क्रेदया मास चपले लावण्येरंबुविस्रवैः। तं च देवत्रां व्यवसिता समभ्याहि ममादिष्टं। उक्तः संरबुध्य
वाचा शांतोऽसीति मया तदा। शांतोऽसीत्युक्तमात्रस्तु तनुत्वां सागरो गतः। स हृतो भिर्तरंगाद्यैः स्थितो
राजश्रियाह्वलन्‌। न्यश्चैव मयात्राधः समुद्रः सह गंगया। स कारणं मतिं शृत्वा युष्माकं हितकामया। य
स्मात्वं राजवत्‌ल्पेन वपुषा समुपस्थितः। गच्छार्णव महीपालो राजा त्वं न विप्यासि तत्रापि सहजां लीलां-
धारयन्‌ स्वेन तेजसा। न विष्यसि नृणां नष्टा नरतानां कुलोद्वह। शांतोऽसीति मया कस्त्वं यद्वासितनुर्नी
गतः। सुतत्र्यर्थसंदेसा लोके शांतनुस्त्वं न विष्यसि। इयमप्यायता पांगी गंगा सर्वांगशोभना। रूपिणी त्वस
रिच्छ्रेष्ठा तत्र त्वां मुपयास्यति। एवमुक्तस्समां सब्बसाऽनिर्वीक्षार्णवोऽब्रवीत्‌। मां प्रणोद देवदेवानां किमर्थं
सप्तवानसि। अहं तव विधेयात्मा वक्तुं तत्स्वत्परायणः। त्राता पां त्राद तथैवावाक्यैरात्मजं मां किमात्मना। नग

वं स्त्वत्प्रसादेन वेला॰पर्वणि वर्द्धिता। यद्यहं चलिताब्रह्मन्‌ कोऽत्र दोषो ममात्मनः। हिमांशुनिः पवनेन
ङ्गिः स्पृष्ठायद्यसि पर्वणि। तत्रमे भगवन्‌ किंत्र वर्त्तते शापकारणं। उद्भूतेश्च महावातैः प्रवृत्तैश्च वलाहकैः
पर्वणा वेडयुक्तेन त्रिनिः कोन्दोऽस्मिकारणे। एवं यद्यपराधोहं कारणे स्वल्प वर्त्तितः। तं त्रमर्हसि मेव
ह्मन्‌ त्रापोऽयं विनिवर्त्तितुं। एवं मयि निरालंवे सापो छिथिलतां गते। कारुण्यपूर्णरुद्वेत्र प्रमाणं यद्यव
या वाचा महार्णव मथा श्रुवे। अकारणेत्वं देवानां त्वरोत्रापा निलेरितं। त्रांतिं व्रजनमेत वं प्रसन्नोऽस्मि
महोदधे। शापोऽस्मिन्‌ सरितां नाथ न विष्यं शृणु कारणं। वंगच्छतात्रते वंश स्वदेहं स्वेनतेजसा। आधत्स्व
सलिलेस्वरः। इयं च त्वां सरिच्छ्रेष्ठा विभ्रती मानुषीं तनुं। तत्कालरमणीयांगी गंगा परिवरिष्यति। अनया
सह जाह्नव्या मोदमानो समाजया। इमं सलिलयं त्वं क्वेदं विभ्रमरिष्यसि सागरा। वरस्या चैव कर्त्तव्यं त्वयेदंम
मसांत्रानं। प्राजापत्येन विधिना गंगया सह सागरा। वसवः प्रच्युतां स्वर्गान्‌ प्रविष्टाश्च रसातलं। तेषामुत्पाद १८

नारद पुं

नार्थाय मयात्वं विनियोजितः। अद्यतातज्जाह्नवी गर्भानपत्यार्थं दधा। त्वियं विना वसो कल्प गुणान्‌ पुरा
णां प्रीतिवर्द्धमान्‌। उत्पाद्य त्वं वसून्‌ शीघ्रं रुत्वा कुरु कुलं महत्‌। एवं हृष्यसितनुं त्यक्त्वा पुनः सागरसागरी
एवमेतन्मयाप्रष्टं हितार्थाय स्फुरात्तमाः। न विष्णुपत्रपता नारं पृथिव्याः पार्थिवात्मकं। तदेषत्रातनानृपः
पृथिव्यां रोपितो मया। वसवोयत्र गांगायामुत्पन्ना स्त्रिदिवौकसः। अद्यापि न विगांगय स्नत्रैव वस्करष्ठ-
मा सप्तयेव सवः पाप्माः सप्त्कापरिलभ्यते। स्पृष्टा स्त्रियां द्वितीयायां द्वितीयां त्रांतनास्तनुः। विचित्रवीर्य
द्युतिमान्‌ आसीद्राजा प्रतापवान्‌। वचित्रवीर्यौ द्वावेव पार्थिवौ नुविविश्रुतौ। धृतराष्ट्रश्च पांडुश्च विख्या
तौ पुरुषर्षभौ। तत्र पांडोः श्रियायुक्ते द्वेनार्य्ये यौवनस्थिते। कुंतेकुंती च माद्री च वस्या पापमे नुविधृता।
धृतराष्ट्रस्य नार्य्येका त्वल्पर्षिणी। गांधारी नुविविख्याता नित्यं नर्हे व्रते स्थिता। तत्र वंशाविनर्ष्पते विप-
क्षैः पञ्चएव चापु त्राणां हितजो राज्ञो भविता वियहा महात्मतपो विमर्हे दायाद्येनृपाणां भविता क्षयः।
गां त पतिमं चैव न विष्यति महद्भयं। सवलेषु नरेंद्रेषु त्रातयोः स्थितरेतरं। विविक्षपुराष्ट्रा घाति ति: शि
थिल्प मष्यति। द्वापरस्य युगस्यांते मया दृष्टं पुरं तनं। क्षयं यास्यंति त्रास्त्रेण पार्थिवाः सहवांधवैः यत्रावसि

दामनुज्ञान्प्रमुखान्निशिथि विचेतसः। धक्ष्यते त्र्यंकरस्यांत्राः पावकेनास्त्रतेजसा। अंतकप्रतिमनस्मिन्निवृत्तेत्र
रकर्म्माणि। समासमिदमाख्यातं तृतीयं द्वापरं युगं। महेश्वरं त्र्यप्रसृते ततो माहेश्वरं युगं। तिष्ये प्रवर्त्तनं श्वाद्यु
गंदारुणदर्शनं। अथ मर्म्मप्राय पुरुषं स्वल्पधर्म्मपरिग्रहे। उत्सन्नसत्यसंयोगे वर्द्धनानृतसंवये। माहेश्वरं कु
मारं च द्वावदेवाः समाश्रिताः। नेविष्यंति नराः सर्व्वे लोके नष्टविरायुषः। तदेषनिर्णयः प्रोक्तः पृथिव्यो पार्थि
वातकः। अंशावतरणं सर्व्वे कराः कुरुत मा चिरं। धर्म्मस्यांशेऽपि कुंत्यां वै माद्र्यां च विनियुज्यतां। विग्रहस्य
कलिर्मूलं गांधार्य्यां विनियुज्यतां। एतेप द्वौ नजिष्यंति राजानः कालनोदिताः। जातरागाः पृथिव्यर्थे सर्व्व
संग्रामलालसाः। गच्छ विषयं वसुमती स्वां योनिं लोकधारिणी। सृष्टोऽयं नेष्टिकाराज्ञामुपायो लोकनो वि
नः। अश्रवा पितामहवचः सा रुगाम यथागतं। पृथिवी सहकालेन वधाय पृथिवी क्षितां। देवानचोस्यद्
स्मा निग्रहार्थं सुरद्विषां। नरं चैव पुराणर्षिं शेषं च धरणीधरं। सनत्कुमारं साध्यांश्च देवांश्चाग्निपुरोगमा
नूवरुणं धनदं चैव सूर्य्यं चंद्रमसं तथा। गंधर्व्वाप्सरसश्चैव रुद्रादित्यास्तथाश्विनौ। ततोऽंशानवनौ देवाः
सर्व्वे एवावतारयन्। यथा ते कथितं सर्व्वमंशावतरणं मया। अयोनिजा योनिजाश्च ते देवाः पृथिवीतले। १०९

दैत्यदानवहंतारः संभूताः पुरुषेश्वराः। शरीरिकाश्चसंकाशा वज्रसंहननास्तथा। नागायुतबलाः केचि
पद्दावलावलान्विताः। गदापरिघशक्तीनां महापरिघवाहकाः। गिरिशृंगप्रहर्त्तारः सर्व्वे परिघयोधिनः।
वृष्णिवंशे समुत्पन्नाः त्रातशोऽथ सहस्रशः। कुरुवंशे च ते देवाः पांचालेषु च पार्थिवाः। यज्ञिवजनां सव
द्धानां ब्राह्मणानां चयानिषु। महेष्वास्त्रज्ञा महेष्वासा देवव्रतपरायणाः। सर्व्वे हि गुणसंपन्ना यद्भाण्प
पुण्यकर्म्मिणः। आचालयपुत्रांलांस्तु कुधानिमुर्म्महीतले। उत्पतपुरयाकाशे शोनयमुर्म्महोदधिं।।
एवमादिश्यपतान्ब्रह्मा नूतनेम्मनवस्त्रनुः नारायणे समावेश्यलोकानृत्रांतिमुपागमत्। नृपः शृणु
यथाविसुरवतीर्णा महीतलं। प्रजानां वै हितार्थाय प्रभुः प्राणधरेश्वरः। ययातिवंशजस्याथवसुदेव
स्यधीमतः। कुलेस्त्रप्ययशः कर्म्मा जज्ञे नारायणः प्रभुः।।।। इति हरिवंशे देवानामंशावतरणं।। वैशंपा
यनउवाच।। कृतकार्यं गते काले जगत्यां च यथालयं। अंतरा स्वप्रवतरणं हुत्रे सुराणां नारतकुले। नागे
ऽवतीर्णं धर्म्मस्य त्राकस्य पवनस्य च। अस्विनोर्द्देवनिषड्गा नागवेनास्करस्य चा पृथ्व्यमेवावनिगता ता गद
नपुरोधसः। वसना महम नाग प्रागेव धरणीगता। मृत्यो नागक्षितिगत कले नागते तथैव च। नागेसोमस्यश्र

क्रस्य वरुणस्य च गां गते। त्र्यंकरस्य गते नागे मित्रस्य वरुणस्य वा। गंधर्वोरगयक्षाणां नागांशेषु गतेष्वथ। नागे
ष्वेते पुनरागनावगतेषु धरणीतले। तिष्ठन्नारायणस्यांशे नारदः प्रत्यदृश्यत। ज्वलिताग्निप्रतीकाशो बाला
र्कसदृशेक्षणः। सव्यापसव्ये विपुलं जटामंडलमुद्वहन्। चंद्रांशुशुक्ले वसने वसानो रुक्मभूषणः। वी
णां गृहीत्वा महतीं कक्षासक्तां सखीमिव। कृष्णाजिनोत्तरासंगो हेमयज्ञोपवीतवान्। दंडी कमंडलुधरः
साक्षाच्छक्र इवापरः। नेता जगति युद्धानां विग्रहाणां गुहोपमः। महर्षिर्विग्रहरुचिर्विद्वान् गांधर्ववेदवि
त्। वैरकेलिकलो विप्रो ब्राह्म्यः कलिरिवापरः। गाता चतुर्णां वेदानामुद्गाता प्रथमर्त्विजः। स नारदोऽथ वि
प्रर्षिर्ब्रह्मलोकचरोऽव्ययः। स्थिता देवसनामध्ये मेरुके विष्णुमब्रवीत्। अंशावतरणे विष्णोर्यदिदं दृष्टं दृश्यैः
कृतं। दयायां पृथिवी त्वानां सर्व्वमेतदकारणं। यदिदं पार्थिवे स्वेत्वं कृतं त्वयि दिवीश्वर। न नारायणयुक्तोऽ
यं कार्यार्थः प्रतिभाति मे। नयुक्तं जानता देव त्वया तत्रार्थदर्शिना। देवदेव पृथिव्यर्थे प्रयुक्तं कार्यमीदृशं
वेदितव्यं स्मृतं वेदैः श्लाघ्य एव नवतां वरः। ज्येष्ठो योगवतां योगी गतिर्गतिमतामपि। देवतानामनुगतात्र
दृष्टो किं त्वं सर्वगतो विष्णुः। वसुंधरायाः साहाय्ये मत्तोऽस्त्वं नानुबुध्यसे। त्वया सनाथा देवांशा स्त्वन्मयास्त्वत् ११०

ग॥ नदहल्वरयाविष्णो प्रभुः हरासिनाभिमां॥ तवसन्नोदनार्थाय रेऽप्य न कार
चोदिताः। जगत्यां संतरिष्यंति कार्यात्कार्यांतरं तो दैत्याः संयामे तारकामये तेषां शृणु गतिं विष्णो ये गताः पृथिवीत
लं। पुरी पृथिव्यां मुदिता मथुरा नाम नामतः। निविष्टा यमुनातीरे स्फीता जनपदायुता। मधुर्न्नाम महानसी।
द्दानवो युधि दुर्जयः। त्रासनः सर्वभूतानां बले महति तिष्ठिवान्। स तत्र दानवः क्रीडन् वर्षस्वगाननेकशः
सदैवतगणान् घोरान्नहासयति दर्पितः। अयोध्यायामयोध्यायां रामेदा नारथो स्थिता राज्यं शास्ति धृ
र्म्मेण राक्षसानां नयावद्दे सदा नवा बलश्लाघी घोरं वनमपाश्रितः। प्रक्ष्या मामरामाय हृतं पक्रुषवादिन
विख्यासनन्नृतोऽसौ तत्काम रिपुश्वसः। न च सामंतमिच्छंति राजानो बलदर्पिता। राज्ञा राजव्रतस्थेन प्र
जानां शुभमिच्छता। उपतप्ता रिपवः सर्वे स्फीतं विषयमिच्छता। अनिपकाइ केशोन राज्ञा रंजनकाम्यया।
जतव्यानीडियापांदो तन्नये हि धूवाजयः। संप्रवर्तिं तु कामस्य विरोधेन महीपते। नयानामुपदेशेन न
स्त्रिलोकसमा गुरुः। व्यसनेषु जघन्यस्य धर्ममध्यस्य धीमतः। बलउपेक्षस्य नृपतेर्नोपिसामंतजं भयं। स
हजेघीध्यते सर्वः प्रहृष्टैरिंडियादिभिः। अमित्राणां प्रियकरैर्मोहैरधृतिरीश्वरः। य च या स्वीकृतमाहात्
म गणो रावणात्ततः। न तदौपायिकं मन्ये महताकर्म उत्क्रमितं। वनवासप्रहृन न यत्त्वया बत शालिना। प्रहृतं

द्समानीकं नैषद्दष्ट सतां विधिः। सतामक्रोधजो धर्म्मः शुभां नयति सद्गतिं। यच्चया निहतो माद्दाड्वेषिणा वाश्रमौक
सा। स एव रावणो धन्यो यस्त्वया ब्रतशालिना। स्त्री निमित्तं हतो युद्धे यो म्यां धर्म्मान पेक्षता। यदि तं समहतः संख्ये
ड्गुहिर जितेंद्रियः। युध्यस्वाद्य मया सार्द्धं मृधे यद्यपि वीर्य्यवान्। तस्य हत्तस्य तच्छ्रुत्वा नापितं वृत्तिवादिनः। धर्म्मा
दस्मन्त्रां त वपुः संस्मितं राघवो ब्रवीत्। श्रमदेतत्त्वया हूतं नापितं तस्य गौरवात्। य न्मां क्षिपसि दोषेण वेदाम्भा
नं च सुस्थितं। यद्यहं संयुध मूढो यदि वा रावणो हतः। यदि वा मे हता भार्य्या का तत्र परिदेवता। नावाप्नोत्येण दृष्य
ति साधवः सत्पथे स्थिताः। जागर्त्ति च यथा दैवं सदा मत्क्रिव तरघुवा। हतं हते नयत्कार्य्यं गच्छ वं हत मा चिरं। नात्म
श्लाघि षु नवे षु प्रहरंतीह मद्विधाः। अयं मम मानुजो भ्राता शत्रुघ्नः शत्रुतापनः। तस्य दैत्यस्य दुर्बुद्धेः मृधे प्रति
करिष्यति। एवमुक्तः स हत स यथा सौमित्रिणा सह। अनुज्ञातो नरेंद्रेण राघवेण महात्मना। स शीघ्रयनः
संप्राप्त सद्दानवपुरं महत्। चक्रे निवासं सौमित्रिबैनाते युद्धलालसाः। ततो हतस्य वचनात् दैत्यः क्रोधम
छितः। हष्टतस्स हनं त्वा युद्धाय्या निमुखः स्थितः। तद्युद्धमनवद्यारं सौमित्रेर्द्दानवस्य च। नयोरेवह तयोः
स्स्रयोरणमर्द्दिनो। तौ त्रासः साधुनि त्रितेरन्यो न्यमनिर्द्धाक्षः। नचतौ युद्धे वै मुस्यं अश्रमं वापजग्मतुः। अथ सौ ११९

मित्रिणा वाणैः पीडितो युधि दानवः। स शूलरहितश्चैव पर्य्यद्दीयत दानवः। स गृहीत्वा त कुशं चैव दैवे दैवे द्दत्तं वरं
रणे। कर्षणं सर्व्वसूत्तानां लवणो विननाद ह। शिरोधरायां जग्राह सोऽ कुशेन च कर्षच। प्रवेश्य यित्रमार
श्वो लवणो राघवानुजं। स रुक्मास्त्र रुद्युधस्य शत्रुघ्नः शत्रुतापनः। शिरः श्छेदखड्गेन लवणस्य महामृधे
सह वादानवं संख्ये सौमित्रि र्मित्रनंदनः। तद्वनं तस्य दैत्यस्य चिच्छेदा स्त्रेण बुद्धिमान्। स्थित्वा वनं तु सौ
मित्रि र्न्निवेशं सोऽन्यरो चयत्। नवायतस्य देशस्य पुर्य्याः परमधर्म्मवित्। तस्मिन्मधुवनस्थाने मधु
रानाम सा पुरी। शत्रुघ्नेन पुरा सृष्टा हत्वा तं दानवं रणे। सा पुरी परमोदारा साट्ट प्राकारतोरणा स्फीतरा
ष्ट्रसमाकीर्णा समृद्ध वलवाहना। उद्यानवनसंछन्ना सुसीमा सुप्रतिष्ठिता। प्रांशु प्राकार संछन्ना पणि
खा गल मेखला। वप्रादालवकेयूरा प्रासादवरकुंडला। सुसंहृतद्वार मुखी चत्वराङ्गीन दासिनी
श्वरा गवीर पुरुषा हस्त्यश्वरथसंकुला। अर्द्धचंद्रप्रतीकाशा यमुनातीरशोभिता। पुण्यापण वती दुर्द्धर्षा
रत्नसंचय गर्विता। क्षेत्राणि त्रास्य वंतस्याः काले देवश्च वर्षति। नरनारी प्रमुदिता पुरी सास्म प्रकाशते। वि
ष विषयश्च वज्रसेन स्ततानवत्। तस्यां पुर्य्यां महावीर्य्यो राजानाज कुलोद्वहः। उग्रसेन इति ख्यातः।

सेनपराक्रमः। तस्य पुत्रत्वमापन्ने स्मि यो ऽसौ विष्णो त्वया हतः। कालिनेमिर्महादैत्यः संग्रामे तारकामये। कंसो
नाम विशालाक्षो भोजवंशविवर्द्धनः। राजा पृथिव्यां विख्यातः सिंहविस्पष्टविक्रमः। राज्ञां भयंकरो घोरः
शंकनीयो महीक्षितां। भयदः सर्वभूतानां सत्पथाद्वाघतां गतः। दारुणानि निवद्धान दारुणो नांतरात्मना।
युक्तस्तेन वदर्पेण प्रजानां रोमहर्षणः। न राजधर्मान्निरतो नात्मपक्षसुखावहः। नात्मराज्यप्रियकरश्चं
डः करुचिः सदा। स कंसस्तत्र संभूतस्त्वया युद्धपराजितः। क्रव्यादो वाधते लोकान्नासुराणां तरामना। यो ऽश्व
सो हयविक्रांतो हयग्रीव इति स्मृतः। केशी नाम हयो जातः कंशस्यैव जघन्यजः। स दुष्टो हेषितपटुः केश
री निरविग्रहः। वृंदावने वसत्येको नराणां मांसानि भक्षयन्। अरिष्टो बलिपुत्रश्च ककुद्मी वृषरूपधृक्। ग
वामस्त्वमापन्नः कामरूपी महासुरः। रिष्टो नाम दितेः पुत्रो वरिष्ठो दानवेषु यः। कुंजरत्वमगाद्दैत्यः कंसस्य
वत्रवाहनः। लंवो नामेति विख्यातो यो ऽसौ दैत्येषु दर्पितः। प्रलंबो नाम दैत्यो ऽसौ वनं भांडीरमाश्रितः। खर
इत्युच्यते दैत्यो धेनुकः सो ऽसुरोत्तमः। घोरं तालवनं दैत्यश्चरत्युद्यमयन्प्रजाः। वराहश्च किशोरश्च दानवा-
द्धौ महावलौ। मल्लौ रंगगतौ तौ तु जातौ चाणूरमुष्टिकौ। यौ तौ मयश्च तारश्च दानवौ दानवांतक। प्राग्योति- ११२

षतो नाम यस्य नरकस्य पुरं वतौ। एते दैत्या विनिहता स्त्वया विष्णो निराकृताः। मानुषीतनुमास्थाय बाधंते नु विमा
नुषान्नान् त्वत्कथाद्वेषिणः सर्वे त्वन्मयान्नघ्नंति मानवान्। तव प्रसादात्तेपी वै दानवानां त्रयो नघ। त्वत्तस्ते
विभ्यति दिवि त्वत्तो विभ्यति सागरे। पृथिव्यां विभ्यति त्वत्तो नान्यतस्तु कदाचन। कुत्सितस्य तु मा दिन्यं ह
तस्य तु त्वारीरिणः। दुर्लभं स्वर्गगमनं चयिजायति केशव। तदागच्छ स्वयं विष्णो गच्छामः पृथिवीतलं। दा
नवानां विनाशाय विसृजात्मानमात्मना। मूर्त्तयो हि तवाव्यक्ता दृश्यादृश्याः सुरोत्तमैः। ता सुसृष्टा त्वया
देवाः संभविष्यंति भूतले। तवावतारणं विष्णो कंसः सन भविष्यति। मत्स्यते स च कार्यार्थो यस्यार्थे ऽहमि
हागतः। त्वं नारत कार्यगुरुः त्वं चक्षुः त्वं परायणः। तदा गच्छ हृषीकेश क्षितौ ताता दिदानवाः॥ ॥इ
तिश्रीहरिवंशे नारदवाक्यं॥ ॥वैशंपायन उवाच॥ नारदस्य वचः श्रुत्वा सस्मितं मधुसूदनः। प्रत्युवाच
शुभं वाक्यं देवानां प्रभुरीश्वरः। त्रैलोक्यस्य हितार्थाय यन्मां वदसि नारद। तस्य सम्यक्प्रवृत्तस्य श्रूयतामु
त्तरं वचः। विदिता देहिनो जाता मयैते भुवि दानवाः। यां च यस्तनुमादाय दैत्यः पुष्यति विग्रहं। जानामि कं
सं संभूतं उग्रसेनसुतं केवि। कशिनं चापि जानामि दैत्यं तुरगरूपिणं। नागं कुवलयापीडं मल्लौ चाणूर

मुष्टिको। अरिष्टं चापि जानामि दैत्यं वृषभरूपिणं॥ विदितो मे खरश्चैव प्रलंबश्च महासुरः। सा च मे विदिता वि
प्र पूतना दुहिता बलेः। कालीयं चैव जानामि यमुनाह्रदगोचरं। वैनतेयभयाद्यस्तु यमुनाह्रदमाविशत्
विदितो मे जरासंधः स्थितो मूर्ध्नि महीक्षितां। प्राग्ज्योतिषपुरे वापि नरकं साधु तर्कये। बाणं च शोणितपु
रे गुहप्रतिमतेजसं। सहस्रबाहुं संहस्राणां देवैरपि सुदुर्जयं। मय्यासक्तां च जानामि भारतीं महतीं धुरं॥
तद्य सर्वं विजानामि यथा यास्यंति ते नृपाः। क्षयं ते वि मया दृष्टा शक्रलोके च सत्क्रिया। तेषां पुरुषदेहा
नां अपरावृत्तदेहिनां। संप्रवेक्ष्याम्यहं योगमात्मनश्च परस्परं। संप्राप्य पार्थिवं लोकं मानुषत्वमुपागतः
कंसादींश्चापि तान्सर्वान्वधिष्यामि महासुरान्। तेन तेन विधानेन येन येन यः शांतिमेष्यति। अनुप्रवि
श्य योगेन तास्तादिगतया मम। अमीषां सुरेन्द्राणां हंतव्या रिपवो युधि। जगत्यर्थे कृतो योऽयमंशो
त्सर्गो दिवौकसैः। सुरदेवर्षिगंधर्वैरितश्चानुमते मम। विनिश्चयो हि प्रागेव नारदाय कृतो मया। निवा
सं तु मने ब्रह्मन् विदधातु पितामहः। यत्र देशे यथा जातो येन वेषेण वा वसन्। तानहं समरे हन्यां तन्मे ब्रू
हि पितामह॥ ॥ब्रह्मोवाच॥ नारायणेम सिद्धार्थमुपायं शृणु मे प्रभो। भुवि जस्ते जनयिता जननी च न

११२

विष्यति। यत्र च त्वं महाबाहो जातः कुलकरः कुले। यादवानां महद्वंशमखिलं धारयिष्यसि। तांश्चासुरान्स
मुत्साद्य वंशं कृत्वात्मनो महत्। स्थापयिष्यसि मर्यादां नृणां तन्मे निशामय। पुरा हि कश्यपो विष्णो वरुण
स्य महात्मनः। जहार यज्ञिया गावः पयोदास्तु महामखे। अदितिः सुरभिश्चैव द्वे भार्ये कश्यपस्य तु। प्रदीयमा
ना स्ता गावस्तु नैच्छतो वरुणस्य वै। ततो मां वरुणोऽभ्येत्य प्रणम्य शिरसा ततः। उवाच भगवान् गावो गुरुणा मे हृ
ता इति। कृतकार्यो हि गास्ताश्च नानुजानाति मे गुरुः। अन्ववर्त्तत भार्ये द्वे अदितिं सुरभिं तथा। मम ता ह्यक्षय
गावो दिव्याः कामदुघाः सोऽप्रभो। चरंति सागरान्सर्वान्रक्षिताः स्वेन तेजसा। कस्ता धर्षयितुं शक्तो मम गाः
कश्यपादृते। अक्षयं याः क्षरंत्यग्र्यं पयो देवामृतोपमं। प्रभुर्वा प्रच्छितो ब्रह्मन्गुरुर्वा यदि चेतरः। त्वया नि
यम्याः सर्वे ते त्वं हि नः परमा गतिः। यदि प्रभवतां दंडो लोके कार्यमजानतां। न विद्यते लोकगुरो न स्याल्लोक
स्य सेवतः। यथा वास्तु तथा वास्तु कर्त्ता भगवान्प्रभुः। मम गावः प्रदीयंतां ततो गंतास्मि सागरं। या आत्म
देवता गावो या गावः सत्त्वमव्ययं। लोकानां त्वत्प्रवृत्तानामेकं गोब्राह्मणं स्मृतं। त्रातव्याः प्रथमं गावस्त्राता स्ता
यंति तान्द्विजान्। गोब्राह्मणपरित्राणात्परित्रातं जगद्भवेत्। इत्यंबुपतिना प्रोक्तो वरुणेनाहमच्युत। ग

वांकारणात्वद्वाः कश्यपेशापमुक्तजं।येनांशेन हृता गावः कश्यपेन महात्मना।स तेनांशेन तत्र मही गत्वा गोपत्व
मेष्यति।या च सा सुरभिर्नाम अदितिश्च सुरारणिः।ते उभे तस्य जाये द्वे तेनैव सह यास्यतः।ताभ्यां सह स गोप
त्वे कश्यपो भुवि रंस्यते।तदस्य कश्यपस्यांशस्तेजसा कश्यपोपमः।वसुदेव इति ख्यातो गोषु तिष्ठति भूतले।
गिरिर्गोवर्द्धनो नाम मथुरायास्त्वदूरतः।तत्रासौ गोष्ठनिरतः कंसस्य करदायकः।तस्य भार्याद्वयं चैव अदि
तिः सुरभिस्तथा।देवकी रोहिणी चैव वसुदेवस्य धीमतः।तत्रावतर लोकानां भवाय मधुसूदन।जयाशी
र्वचनैस्त्वेते वर्द्धयंति दिवौकसः।आत्मानमात्मना हि त्वमवतार्य महीतले।देवकीं रोहिणीं चैव गर्भाभ्यां
परितोषय।तत्र त्वं शिशुरेवादौ गोपालकृतलक्षणः।वर्द्धयस्व महाबाहो पुरा त्रैविक्रमे यथा।छादयित्वा
महात्मानं मायया गोपरूपया।गोपकन्यासहस्राणि रमयंश्चर मेदिनीं।गाश्च ते रक्षतो विष्णो वनानि परिधा
वतः।वनमालापरिक्षिप्तं धन्या द्रक्ष्यंति ते वपुः।विष्णौ पद्मविशालाक्षे गोपालवसतिं गते।बाले त्वयि म
हाबाहो लोको बालत्वमेष्यति।त्वद्भक्ताः पुंडरीकाक्ष तव चित्तवशानुगाः।वने चारयतो गाश्च गोष्ठेषु परिधा
वतः।मज्जतो यमुनायां च रतिं प्राप्स्यंति ते त्वयि।जीवितं वसुदेवस्य भविष्यति सुजीवितं।यस्त्वया तात इत्युक्तः ११४

स पुत्र इति वक्ष्यति।अथवा कस्य पुत्रत्वं गच्छेथाः कश्यपादृते।का च धारयितुं शक्ता त्वां विष्णो अदितिं विना।यो
गेनात्मसमुत्थेन गच्छ त्वं विजयाय वै।वयमप्यालयान्स्वान्स्वान्गच्छामो मधुसूदन।।।।वैशंपायन उवाच
स देवानभ्यनुज्ञाय विविक्ते त्रिदिवालये।जगाम विष्णुः स्वं देशं क्षीरोदस्योत्तरां दिशं।तस्य वै पार्वती नाम गुहा
मेरोः सुदुर्गमा।त्रिभिस्तस्यैव विक्रांतैर्नित्यं पर्वसु पूजिता।पुराणं तत्र विन्यस्य देहं हरिरुदारधीः।आत्मानं यो
जयामास वसुदेवगृहे प्रभुः।।। ।।इति हरिवंशे पितामहवाक्यं।।वैशंपायन उवाच।।ज्ञात्वा विष्णुस्थितिं गतं
भामगाश्च त्रिदिवौकसां।विनाशांकी कंसस्य नारदो मथुरां ययौ।त्रिविष्टपात्पतितो मथुरोपवने स्थितः।प्रे
षयामास कंसस्य उग्रसेनसुतस्य वै।स नारदस्यागमनं श्रुत्वा चरितविक्रमः।निर्जगामासुरः कंसः सपुष्पो
पद्मलोचनः।स ददर्शातिथिं श्लाघ्यं देवर्षिं वीतकल्मषं।तेजसा ज्वलनाकारं वपुषा सूर्यवर्चसं।सोऽभिवाद्य
पूर्वं तस्मै पूजां चक्रे यथाविधि।आसनं चाग्निवर्णाभं विसृज्योपससार सः।निषसादासने तस्मिन्स शक्रस
खा मुनिः।उवाच चोग्रसेनस्य सुतं परमकोपनं।पूजितोऽहं त्वया वीर विधिदृष्टेन कर्मणा।गते त्वेवं मम वचः
श्रूयतां गृह्यतां च वै।अनुसृत्य दिवालोकान्नहं ब्रह्मपुरोगमान्।गतः सूर्यसखं तात विपुलं मेरुपर्वतं।स नंद

नवनं चैव दृष्टा वै चैत्ररथं वने। आप्लुतं मे कृती तीर्थास्ताः सरितश्च सह दैवतैः। दिव्या त्रिपथगा दृष्टा मे पुण्या त्रिपथगा नदी
स्मरणादेव सर्वेषामघपाप्मविनेदिनी। उपस्पृश्य पवती र्थेषु दिक्षु च यथाक्रमं। दृष्टं मे ब्रह्मसदनं ब्रह्मर्षिगण
सेवितं। देवगंधर्वनिर्घोषैरप्सरोनिस्वनादितं। सोऽहं कदाचिद्देवानां समाजे मेरुमूर्द्धनि संगच्छन्वीणां संसक्ता
न्यगच्छं ब्रह्मणः सभां। सोऽहं तत्र सिताक्षीपान्नानारत्नविभूषितान्। दिव्यासनगतान्देवान्पद्मपंसपितामहा
न्। तत्र मंत्रयतामेव दैवनानां मया श्रुतं। नवतः सानुगस्येह वधोपायः सुदारुणः। तत्रैषा देवकी या ते मथुरा
णां यं पितृष्वसा। यास्याः गर्भोऽष्टमः कंस स ते मृत्युर्भविष्यति। देवानां स तु सर्वस्वं त्रिदिवस्य गतिश्च सः। प
रं रहस्यं देवानां स ते मृत्युर्भविष्यति। परतोऽपि परस्मापो स्वयं न श्राहिवो कर्मा। ततस्ततन्मद्दूते दिव्यं च कथ
याम्यहं। श्लाघ्यश्च सहितं मृत्युर्न तद्दूर्बं च संस्मर। यत्नश्च क्रियतां कंस गर्भेस्य यदि शक्यते। एषा मे चक्रूता प्री-
तिरित्यर्थे चाहमागतः। गुप्यतां सर्वकामार्थः स्वस्ति तेऽस्तु व्रजाम्यहं। इत्युक्ता नारदे याते तस्य वाक्यं व्यचिं
तयत्। जहास सोऽथ सस्वतः कंसः प्रकाशदशनश्चिरं। साक्षितं चैव प्रोवाच भृत्यानामग्रतः स्थितः। हास्यः खलु सस
र्वेषु नारदो न विशारदः। नाहं नीय्यसि जिद्धंशको देवैरपि समासवैः। आहवस्थ त्रायानोवा प्रमत्तोमत्त एव वा। ११५

ऽहं दोर्भ्यां मुदाराभ्यां ग्रामनयं वदकंधरं। कोऽस्ति मां मानुषे लोके यः क्षोभयितुमुत्सहेत्। अद्यप्रभृति भूतानां मे पदेवानु
वर्तिनां। नृपक्षिपशुसंघानां करोमि कदनं महत्। आज्ञाप्यतां हयः केशी प्रलंबोऽथ धेनुकस्तथा। अरिष्टः पृथिवीं कृ
त्स्नां यथेष्टं कामरूपिणः। प्रहरध्वं च सर्वेषु याऽस्मा कंपक्षहपकाः। गर्भस्थानामपि गतिं विज्ञाय भो विदहिनां।
नारदेन हि गर्भस्थात्मयं नः समुदाहृतं। भ्रमंतो द्यिथा कामं मोदंतां विगतज्वराः। मां च वो नाथमाश्रित्य ना
सि दैवकृतं नयं। स तु कलिकलो विप्रो नेदृशी लक्ष्यनारदः। सुश्लिष्टानपि लोकोऽस्मिन्नेदयन्नलमेरितं
कंडूयमानः सततं लोकानटति चंचलः। घटमानो नरेंद्राणां तत्र वैराणि वर्वहि। एवं स विलपन्नेव वाग्वृत्तेण
तु कं बलं। विवेशाकंसो भवनं दह्यमानेन चेतसा॥ ॥इति हरिवंशे नारदगमने कंसवाक्यं॥ वैशंपायन
उवाच॥ सोऽज्ञापयत संरब्धः सचिवान्नात्मनो हितान्। सज्जास्तु वत सर्वे वै देवक्या गर्भकृंतने। प्रथमादव
हंतव्याः सप्तगर्भाः सर्व एव हि। मूलादेव तु हंतव्यः सोऽनर्थोऽयत्र संशयः। देवकी च गृहे गुप्ता प्रच्छन्नैरपरक्षिता
स्वैरं चरतु विश्रब्धा नात गर्भकाले चरत्नतां। मासान्वै पुष्पमासादीन्गणयंतु ममस्त्रियः। परिणामे तु गर्भ
स्य शेषं ज्ञास्यामहे वयं। वसुदेवश्च संपत्स्यः श्रीमनार्थे सततं मिषु। अप्रमत्तैर्मम हितैः रात्रावहनि चैव हि। स्त्री

नरूपरेवसाध्येत्। श्रूयतां पूर्वदेवं हि मद्धियै प्रतिहन्यते। मत्र गौमे सु
विहिते रेवध्ये सुयोजिते॥ पत्रे २+

निर्घर्षपरैश्चैव वक्तव्यं न च कारणं। एष मानुष्यको यत्नो न चानुकूले न दैव मप्यनुलोप्यते॥ ॥वैशंपायन उ
वाच॥ एवं संस्थन्न वान् कंसो देवकी गर्भ हंतने। नये न मंत्रयामास श्रुतार्थो नारदाननवे। एवं श्रुत्वा प्रयत्नं वै कं
सस्यारिष्ट संज्ञितं। अंतर्द्धान गतो विष्णुश्चिंतया मास पार्थिव। सप्तमान् देवकी गर्भान् नोज पुत्रो वधिष्यति
अष्टमे च यथा गर्भ कार्यमाधान मात्मनः। तस्य चिंतयतस्त्वेव पाताल मगमन्मनः। यत्र ते गर्भ शयनाः षड्ग
र्भा नाम दानवाः। विक्रांत वपुषो दीप्ता स्तेऽमृत प्राशनोपमाः। अमर प्रतिमा युद्धे पुत्रा वै कालनेमिनः। त्याय्यवं
श परित्यज्य हिरण्यकशिपुं पुरा। तपासेव क्रिरे दैत्याः पुरा लोक पिता मह। तप्यमाना स्तप स्तीव्रं जटा मंडलज
पणाः। तेषां प्रीतोऽ नवद्ब्रह्मा षड्गर्भाणां वरं ददौ॥ ॥ब्रह्मोवाच॥ नो नो दानव श्रार्दूला स्तपसा हं सुतो षितः। त्र
तयो यस्य वः कामः स्तस्य तं ते करा म्यहं। ते तु सर्वे समानार्थाः दैत्या ब्रह्माणमब्रुवन्। यदि नो भगवान् प्रीतो
दीयतां नो वरो वरः। अवध्याः स्याम भगवान् देवतैः समहोरगैः। शाप प्रहरणाश्चैव स्वासिनोऽस्तु महर्षिभिः
यक्ष गंधर्व पतिभिः सिद्ध चारण मानवैः। मा भूद्वधो नो भगवान् ददासि यदि नो वरं। तानुवाच ततो ब्रह्मा सु
प्रीतेना तरात्मना। भवद्भिर्यदिदं प्रोक्तं सर्वमेतद्भविष्यति। षड्गर्भाणां वरं दत्वा स्वयंभूस्त्रिदिवं गतः। ततो ११६

हिरण्यकशिपुः सरोषो वाक्यमब्रवीत्। मामपास्य वरोयस्मा द्वृतो वः पद्मसंभवात्। तस्मा द्वस्पाजितः स्नेहः
शत्रुन्हं तां स्त्यजाम्यहं। षड्गर्भा इति या यं वः नाम्नः पित्रा विवर्द्धितः। स एव वो गर्भ गतान् पिता सर्वान् वधिष्य
ति षड् वदेवकी गर्भे षड्गर्भा वै महासुराः। भविष्यथ ततः कंसो गर्भस्था न्वो वधिष्यति॥ ॥वैशंपायन उ
वाच॥ जगामाथ ततो विष्णुः पातालं यत्र तेऽसुराः। षड्गर्भाः संयताः संति जलगर्भ गृहे तथा। स ददर्श जल
सुप्तान् षड्गर्भान् दानवा त्तमान्। निद्रया काल रूपिण्या सर्वानंत र्हितान् सवै। स्वप्ने रूपेण तेषां वै विष्णु
र्देहान् यथा विन्यात। प्राणस्वरांश्चनिः कृष्य निद्रायै प्रददौ तदा। तां चोवाच ततो निद्रां विष्णुः सत्य पराक्रमः
गच्छ निद्रे मयाक्षिप्ता देवकी भवनं प्रति। इमान् प्राणस्वरान् गृह्य षड्गर्भान् दानवोत्तमान्। षड्वै प्राणस्व
रांश्चैव षड्गर्भा भनामदेहिनः। षड्गर्भान् देवकी गर्भे योजय स्व यथाक्रमं। जातिष्वेतेषु सर्वेषु नीतेषु च यमक्ष
यं। कंसस्य विफलं यत्ने देवक्याः सफलः श्रमः। प्रसादं ते करिष्यामि मत्प्रभावसमं क्षितौ। येन सर्वस्य लोक
स्य दिवि देवी भविष्यसि। सप्तमो देवकी गर्भो योऽसौ सौम्यो महाग्रजः। स मंस्थाप्य तिस्य प्ते सप्तमे मासि
रोहिणी। संकर्षणात्तु गर्भस्य सत्रु संकर्षणो युवा। भविष्यति अग्रजो भ्राता मम शीतांशु दर्शनः। पतिता देवकी

मो सत्तमोऽग्र्यं नयादिति॥ अष्टमे मयि गर्भस्थे कंसो यत्नं करिष्यति॥ यातु सा नंदगोपस्य दयितानं. संगोपतेः
यशोदा नाम नन्दस्य भार्या गोपकुलोद्वहा॥ तस्यास्त्वं नवमो गर्भः कुलेऽस्माकं भविष्यसि॥ नवम्यां चैव संजा-
ता कृष्णपक्षस्य वै तिथौ॥ अहं त्वभिजिते योगे निशाया यौवने स्थिते॥ अर्धरात्रे करिष्य ॥मि गर्भमोक्षं यथा-
सुखं॥ अष्टमस्य तु मासस्य जाता वावां ततः समं॥ प्राप्स्यावो गर्भव्यत्यासं प्राप्ते कंसस्य ॥सने॥ अहं यशो-
दायां स्यामि त्वं देवि भज देवकीं॥ आवयोर्गर्भव्यत्यासे कंसो गच्छतु मूढतां॥ ततस्त्वां गृह्य चरणे शिलायां
पातयिष्यति॥ निरस्यमाना गगने स्थानं प्राप्स्यसि शाश्वतं॥ मच्छवीसदृशी कृष्णा संकर्षणसमानना॥ बिभ्रती
विपुलौ बाहू मम बाहूपमौ भुवि॥ त्रिशिखं शूलमुद्यम्य खड्गं च कनकत्सरुं॥ पात्रीं च पूर्णां मधुनः पंकजं च सुनिर्म-
लं॥ नीलकौशेयसंवीता पीतेनोत्तरवाससा॥ शशिरश्मिप्रकाशेन हारेणोरसि राजिता॥ दिव्यकुंडलकर्णी-
भ्यां श्रवणाभ्यां विभूषिता॥ चंद्रसापत्न्यभूतेन मुखेन त्वं विराजसे॥ मुकुटेन विचित्रेण केशबंधेन शोभिता॥
…मानैर्भुजैः शोभयंती दिशो दश॥ ध्वजेन शिखिबर्हाणां उच्छ्रितेन समीपतः॥ अंगजेन … मंगद- ११७
…वना स्वता॥ कीर्णा नतगणैर्घोरैर्मन्नियोगानुवर्तिनी॥ कौमारं व्रतमास्थाय त्रिदिवं त्वं गमि…॥ तत्र त्वां॥

ग्रा ते द कंसो को मत्स्वपष्टेन कर्मणा॥ अभिषेकेन दिव्येन दैवतैः सहयोक्ष्यते॥ तत्रैव त्वां भगिन्यार्थे ग्रहीष्य-
ति सवासवं कुलाक तुगोत्रेण कौशिकी त्वं भविष्यसि॥ स ते विंध्ये नगश्रेष्ठे स्थानं दास्यसि श…॥ ततस्था-
नसहस्रैस्त्वं पृथिवीं शोभयिष्यसि॥ त्रैलोक्यचारिणी सा त्वं भविसत्योपयाचिता॥ चरिष्यसि म… नागवरदा काम-
रूपिणी॥ तत्र शुंभनिशुंभौ द्वौ दानवौ नगचारिणौ॥ तौ च कृत्वा मनसि मां सानुगौ नाशयिष्यति॥ कृत्वा नु याचा-
मूर्ते स्तुतिनि त्वमां सवाति प्रिया॥ तिष्ठोन वमांसप्रजो त्वां प्राप्स्यसे सपशुकीर्त्ता॥ …त्वां मत्प्रभावज्ञा प्रणमिष्यंति
मानवाश्च न तेषां दुर्लभं किंचित्पुत्रतो धनतोपि वा॥ कांतारेष्ववसन्नानां मग्नानां च महार्णवे॥ दस्युभिर्वा निरु-
द्धानां त्वं गतिः परमा नृणां॥ त्वां तु तोष्यंति ये… स्तवेनानेन ये शुभे॥ तस्याहं न प्रणश्यामि स च मे न प्रण-
श्यति॥ इति हरिवंशे निद्रासंबोधनो नाम॥ वैशंपायन उवाच॥ आर्यास्तवं प्रवक्ष्यामि यथोक्तं ऋषिभिः पु-
रा॥ नारायणीं नमस्यामि देवीं त्रिभुवनेश्वरीं॥ त्वं सिद्धिस्त्वं धृतिः कीर्तिः श्रीर्विद्या संततिर्मतिः॥ संध्या रात्रिः
प्रभा निद्रा कालरात्रिस्तथैव च॥ आर्या कात्यायनी देवी कौशिकी ब्रह्मचारिणी॥ जननी सिद्धसेनस्य उ-
ग्रचारा महातपा॥ जया च विजया चैव तुष्टिः पुष्टिः क्षमा दया॥ ज्येष्ठा यमस्य भगिनी नीलकौशेयवासनी॥
विरूपाक्षी विशालाक्षी भक्तानां परिरक्षणी॥ पर्वताग्रेषु घोरेषु नदीषु च गुहासु च॥ वासस्तव महादे-

६९. विपनेषु पर्वतेषु च। शबरैर्बर्बरैश्चैव पुलिंदैश्च सुपूजिता॥ मयूरपक्षध्वजनी लोकान्क्रमसि सर्वशः। कुकुटैश्छ
गलैर्मेषैः सिंहैर्व्याघ्रैः समाकुला॥ घंटानिनादबहुला विंध्यपर्वतवासिनी॥ त्रिशूलपट्टिशधरा सूर्यचंद्रपताकि
नी॥ नवमी कृष्णपक्षस्य शुक्लस्यैकादशी तथा॥ भगिनी बलभद्रस्य रजनी कलहप्रिया॥ आवासः सर्वभूतानां
११८ निष्ठा च परमा गतिः। नंदगोपसुता चैव देवानां विजयावहा॥ चीरवासाः सुवासाश्च रौद्री संध्या त्वमे
व च॥ प्रकीर्णकेशा मृत्युश्च तथा मांसोदनप्रिया। लक्ष्मीरलक्ष्मीरूपेण दानवानां वधाय च॥
सावित्री चासि देवीनां माता भूतगणस्य च॥ अंतर्वेदी च यज्ञानामृत्विजां चैव दक्षिणा॥
सिद्धिः सांयात्रिकाणां तु वेला त्वं सागरस्य च॥ यक्षाणां प्रथमा यक्षी नागानां सुरसेति च।
कन्यानां ब्रह्मचर्यं त्वं सौभाग्यं प्रमदासु च। ब्रह्मवादिन्यथो दीक्षा शोभा च परमा तथा॥ राम
ज्योतिषां त्वं प्रभा देवी नक्षत्राणां च रोहिणी। राजद्वारेषु तीर्थेषु नदीनां संगमेषु च। पूर्णा च पूर्णिमा चं
द्रे कृत्तिवासा भूतिस्मृता॥ सरस्वती च वाल्मीके स्मृतिर्द्वैपायने तथा। कर्षकाणां च सीता त्वं भूतानां ११८
धरणी तथा। ऋषीणां धर्मबुद्धिस्त्वं देवानां मानसी तथा॥ सुरादेवी च भूतेषु स्तूयसे त्व

वीचमत्स्येषु भूयसे त्वं स्वकर्मभिः॥ इंद्रस्य चारुदृष्टिस्त्वं सहस्रनयनेति च। तापसानां च देवि त्वं होत्राणामरणी चाग्नि
संध्या च सर्वभूतानां शमि संदेवतेषु च। स्वाहा तुष्टिर्धृतिर्मेधा वसूनां वसुमती। आशा चैव मनुष्याणां तु
ष्टिश्च कृतकर्मणां। दिशश्च विदिशश्चैव तथा ह्यग्निशिखा प्रभा। शकुनी पूतना च त्वं रेवती च सुदारुणा। निद्रा
च सर्वभूतानां मोहिनी क्षत्रिया तथा। विद्यानां ब्रह्मविद्या च ओंकारोऽथ वषट् तथा। नारीणां पार्वती च त्व
पौराणी ऋषयो विदुः। अरुंधत्येकनत्रीणां प्रजापतिवचो यथा। भेदो विवादशीलानां त्वमिंद्राणीति विश्रुता
त्वया व्याप्तमिदं सर्वं जगत्स्थावरजंगमं। संग्रामेषु च सर्वेषु अग्निप्रज्वलितेषु च। नदीतीरेषु चौरेषु कांतारेषु न
येषु च। प्रवासे राजबंधे च शत्रूणां च प्रमर्दने। प्राणात्ययेषु सर्वेषु त्वं रक्षा नात्र संशयः। त्वयि मे हृदयं देवि
त्वयि बुद्धिर्मनस्त्वयि। रक्ष मां सर्वपापेभ्यः प्रसादं कर्तुमर्हसि। इमं देव्याः स्तवं दिव्यमितिहाससप्रकल्पितं। यः
पठेत्प्रातरुत्थाय शुचिः संयतमानसः। त्रिभिर्मासैः कांक्षितं तु फलं वै संप्रयच्छति। षड्भिर्मासैर्वरिष्ठं तु वरमे
कं प्रयच्छति। अर्चिता नवभिर्मासैर्दिव्यं चक्षुः प्रयच्छति। संवत्सरेण सिद्धिं तु यथाकामं प्रयच्छति। सत्यं ब्रह्म च दिव्यं च
द्वैपायनवचो यथा। नृणां बंधं वधं घोरं पुत्रनाशं धनक्षयं। व्याधिमृत्युभयं चैव पूजिता शमयिष्यसि। मोहयित्वा तु

तं कंसः एकाचित्तेनो स्य स उगवा। अहमप्यात्मनो वृत्तिं विधास्ये गोपपुंगो पवत्। स्ववृत्त्यर्थे महच्चैव करिष्ये कंस गोप
ते। एवं उक्तो समादिश्य गतोऽसु तद्दोनमी स्वरः। स चापितं न मस्तत्य तथास्त्विति विनिश्चितं॥ ॥इति श्री खिलेषु
हरिवंशे स्वप्नगर्भविधाने॥ ॥वैशंपायन उवाच॥ कृते गर्भविधाने तु देवकी देवतोपमा। अग्राह सप्त तान् ग
र्भान् यथा स वस्तमुदाहृतान्। षड्गर्भा निःसृतान् कंसस्तान् जघान शिलातले। आपन्नं सप्तमं गर्भं सा निनाय
च रोहिणी। सार्धरात्रे स्थितं गर्भं पातयंती रजस्वला। निद्रया सहसाविष्टा पपात धरणीतले। सा स्वप्नमिव तं
दृष्ट्वा स्वगर्भं गर्भमागतं। अपश्यंती च तं गर्भं मुहूर्तं व्यथिताभवत्। तामाह निद्रा संदिग्धे नैशे तमसि रोहिणी
रोहिणीमिव सोमस्य वसुदेवस्य धीमतः। कर्षणेनास्य गर्भस्य स्वगर्भे वाहितस्य वा। संकर्षणो नाम शुभे तव पु
त्रो भविष्यति। सा तं पुत्रमवाप्यैव हृष्टा किंचिदवाङ्मुखी। विवेश रोहिणी वेश्म सुप्रभा रोहिणी यथा। तस्य ग
र्भस्य मार्गेण गर्भमाधत्त देवकी। यदर्थं सप्तमे गर्भाः कंसेन विनिपातिताः। तं तु गर्भं प्रयत्नेन ररक्षुस्तस्य रक्षि
णः। स तत्र गर्भवसतिं वसत्यात्मेच्छया हरिः। यशोदापि समाधत्त गर्भं तदहरेव तु। विष्णोः शरीरजां निद्रां वि
ष्णुनिर्देशकारिणीं। गर्भकाले त्वसंपूर्णे अष्टमे मासि ते स्त्रियौ। देवकी च यशोदा च सुषुवाते समं तदा। जाम ११९ १.१८

वरजंती कृष्णो जज्ञे वृष्णिकुले प्रभुः। तामेव रजनीं कन्यां यशोदापि व्यजायत। नंदगोपस्य भार्यैका वसुदेवस्य
चापरा। तुल्यकाले हि गर्भिण्यौ। यशोदा देवकी तथा। देवक्यजनयद्विष्णुं यशोदा तां तु दारिकां। मुहूर्तेऽभि
जिते प्राप्ते सार्धरात्रे विभूषिते। सागराः समकंपंत चेलुश्च धरणीधराः। जज्वलुश्चाग्नयः शांता जायमाने जनार्द
ने। शिवाश्च संप्रववुर्वाताः प्रशांतमभवद्रजः। ज्योतींषि प्रत्यकाशंत जायमाने जनार्दने। अभिजिन्नाम नक्षत्र
जयंती नाम शर्वरी। मुहूर्तो विजयो नाम यत्र जातो जनार्दनः। अव्यक्तः शाश्वतः सूक्ष्मो हरिर्नारायणः प्र
भुः। जायमानो भगवान् नयनैर्मोहयन् जगत्। अनाहता दुंदुभयो देवानां प्राणदन्दिवि। आकाशात् पुष्पव
र्षं च ववर्षु त्रिदिवेश्वराः। गीर्भिर्मंगलयुक्ताभिस्तुवंतो मधुसूदनं। महर्षयः सगंधर्वा उपतस्थुः सहाप्सराः॥
जायमाने हृषीकेशे प्रहृष्टमभवज्जगत्। इंद्रश्च त्रिदिवे सार्धं तुष्टाव मधुसूदनं। वसुदेवस्तु तं रात्रौ जातं पुत्र
मधोक्षजं। श्रीवत्सलांछनं दृष्ट्वा युतं दिव्यैश्च लक्षणैः। उवाच वसुदेवस्तं रूपं संहर वै प्रभो। भीतोऽहं देव कं
सस्य। तस्मादेवं वदाम्यहं। मम पुत्रा हतास्तेन तवाग्रजा भुजेक्षण। वसुदेववचः श्रुत्वा रूपं संहृतवान् प्रभुः
अनुज्ञाप्य पितृत्वेन नंदगोपगृहं नय। वसुदेवस्तु संगृह्य दारकं क्षिप्रमेव तु। यशोदायां गृहे रात्रौ विवेश

सुतवत्सला। यशोदया च विज्ञात स्तत्र निक्षिप्य दारकं। प्रगृह्य दारिकां चैव देवकीशयने न्यसत्। परिवर्ते कृते
तास्मिं गर्भाभ्यां भयविक्लवः। वसुदेवः कृतार्थो वै निर्जगाम निवेशनात्। उग्रसेनसुतायाथ कंसायानकदुं
दुभिः। निवेदयामास तदा तां कन्यां वरवर्णिनीं। तच्छ्रुत्वा त्वरितः कंसो रक्षिभिः सह वेगिभिः। आजगाम गृ
हद्वारं वसुदेवस्य वीर्यवान्। स तत्र त्वरितं द्वारि किं जातमिति चाब्रवीत्। दीयतां शीघ्रमित्येवं वाग्भिः समतर्ज
यत्। ततो हाहाकृताः सर्वा देवकीभवने स्त्रियः। उवाच देवकी दीना बाष्पविक्लवया। गिरा दारकामुपजाते
ति कंसं समभियाचती। श्रीमंतो मे हताः सप्त पुत्रगर्भाः स्वया विभो। दारकेयं हतैवेषा पश्य त्वं यदि मन्यसा दृष्ट्वा
कंसस्तु तां कन्यां स विकृष्य मुदा युतः। हतैवैषा यदा कन्या जातेत्युक्त्वा तथामतिः। स गर्भशयनक्लिष्टां गर्भाम्बुक्लि
न्नमूर्द्धजां। कंसस्य च परान्यस्तां पृथिव्यां पृथिवीसमां। स चैतां गृह्य पुरुषः समाविध्य विधूय च। उद्यच्छन्नेव सहसा
शिलायां समपोथयत्। सावधूता शिलापृष्ठे नाप्पिष्टा दिवमुत्पतत्। हित्वा गर्भतनुं सा तु सहसा मुक्तमूर्द्धजा।
जगाम कंशमादिश्य दिव्यास्रगनुलेपना। कन्यैव सा सदा नित्यं दिव्या देवैरभिष्टुता। नीलपीतांबरधरा गज १२
कुंभोपमस्तनी। रथविस्तीर्णजघना चंद्रवक्त्रा चतुर्भुजा। विद्युद्विस्पष्टवर्णाभा बालार्कसदृशेक्षणा। प

योधरस्तनवती संध्येव सपयोधरा। सा वै निशि तमोग्रस्ता सर्वं नृत्यगणाकुला। नृत्यतीहसती चैव विपरीतवसास्व
ती। विहाय सिगतारोद्रा यया यानाम उत्तमं। जहास च महाहासं कंसं च रुषिता ब्रवीत्। कंस कंस विनाशा
य यदहं घातिता त्वया। सहसा च समुत्क्षिप्य शिलायाम भिपातिता। तस्मात्तवांतकाले ऽहं कृष्यमाणस्य
शत्रुणा। पाटयित्वा करैर्देहमुष्णं पास्यामि शोणितं। एवमुक्त्वा वचो घोरं सा यथेष्टेन वर्त्मना। खं सा देवालयं
देवी सगणा विचचार ह सा। कन्यावर्धत तत्र ह वृष्णिसद्मनि पूजिता पुत्रवत्सति पाल्यंती। वासुदेवाज्ञया तदा। वि
द्धि च नामथोत्पन्ना मंशाद्देवी प्रजापतेः। एकानंशेति या सा तु कृत्त्पन्ना मानवा भुवि। योगकन्यां दुराधर्षीं र
क्षार्थं केशवस्य तु। तां वै सर्वे सुमनसः पूजयंति स्म यादवाः। देववद्दिव्यवपुषा कृष्णः संरक्षितो यया। तस्मिं
गतायां सकृतामेन मृत्युमात्मनः। विविक्ते देवकी चैव व्रीडितः समभाषत॥ ॥कंस उवाच॥ पंचषट्
कृता यत्नस्तव गर्भा मया हताः। अन्य एवान्यतो देवि मम मृत्युरुपस्थितः। नैराश्येन कृता यत्नाः स्वजनं प्रह
तं मया। दैवं पुरुषकारेण न चातिक्रांतवानहं। त्यज गर्भकृतां चिंतां संतापं शोकजं त्यज। हेतुभूतस्त्वहं ते
षां मतिकाले विपर्ययः। काल एव नृणां शत्रुः कालश्च परिणामकः। कालो नयति सर्वान्वै हेतुभूतस्तु मद्विध

नृत्स्यागमिष्यंति वै देवि यथा नागमुपद्रवाः। इदं त्वकष्टपर्यंतः कष्टो महति मन्यते। माकार्षीः पुत्रजां चिंतां शी-
तापशोकजं त्यज। एवं प्राणा नृणां येनिनंती त्रिकालस्य संस्थितिः। पतामि पादयोर्देहि पुत्रवत्सवदे विकि।
मृत्कृतस्यापतोरोषो जानाम्यपकृतं त्वयि। माशोकं कुर्यामुखाहीना नत्वारमनिवीरस्य च। उत्तिष्ठ तिष्ठ वत्सेति
कंसं मातेव जल्पती॥ ॥देवक्युवाच॥ ममाग्रतो हता गर्भा ये त्वया कालरूपिणा। कारणांतं नव पुत्र त्वं ता-
नो घ्न चकारणं। गर्भस्त्रं तम मे तन्मे सहनीयं त्वयालसं। पादयोः पततो मद्व्यां स्वं च कर्म जुगुप्सता। गर्भेऽपि नि-
यतो मृत्युर्बाल्येऽपि न निवर्त्तते। युवापि मृत्युर्विद्येयोगः स्थविरो मृत एव तु। कालपक्वमिदं सर्वे देहे तु न तत्स्व-
मेव हि। अज्ञातदर्शनं नाशि तजथा नाशि तथैव सः। गानोऽप्यज्ञातनं याति विधात्रा यत्र नीयते। तद्गच्छ पु-
त्रमानेन नन्मकृतं मत्सुकारकं। मृत्युना पहृते तस्मिन्सर्वे शेषादतः प्रवर्त्तते। विधिना पूर्वदृष्टेन प्रजासर्गेण तत्वतः
माता पित्रा स्वकार्येण जन्म तस्योपपद्यते। निशम्य देवकीवाक्यं स कंसः स्वनिवेशनं। प्रविवेश सुसंरब्धो
दह्यमानेन चेतसा। हतेप्रतिहते दीनो जगाम विमना नृपः॥ ॥इति खिले पुहरिवंशे कृष्णोत्पत्तिः॥ वैशंपा- १२१
यन उवाच॥ प्रागएव स कदेवस्य व्रज शुश्राव रोहिणी। प्रजातं पुत्रमेवाग्रे चंद्रार्कौ ततरानना। सनंदगोप

राम स्वरितः प्रोवाच श्लक्ष्णया गिरा। गच्छानया सह त्वं वै व्रजमेव यशोदया। तत्र तौ दारकौ गत्वा जातिकर्मादि निर्गुणः। यो-
जयित्वा व्रजे नाते संवर्द्धय यथासुखं। रौहिणेयं च मे पुत्रं परिरक्ष शिशुं व्रजे। अहं वाच्यो न पश्यामि पितृपक्षे पुपुत्रि-
णा। सोहमेकस्य पुत्रस्य न पश्यामि शिशोर्मुखं। क्रियते हि बलात्प्रज्ञा प्राज्ञस्यापि सतो मम। अस्माद्धि मे नयं
कंसान्निर्घृणाद्धि शिशोर्वध। तद्यथा रोहिणेयत्वं नंदगोप ममात्मजं। गोपाय सि शिशुं तात तत्त्वान्वेषी त-
था कुरु। विघ्ना हि वह वालाका बालानुद्रासयंति हि। स च पुत्रो मम ज्यायान् कनीयांश्चापि ते सुतः। उ नाव-
पिसमेनाम्ना निरीक्षस्व यथा तयोः। वर्द्धमानावुभावेतौ समानवयसौ यथा। शोभेते तौ गाव्रजे तस्मिन्नंदगोप
तथा कुरु। बाल्ये किलकलः सर्वो बाल्ये मुह्यति मानुषः। बाल्ये चंडतमः सर्व्वस्तत्र यत्नपरो भवानच वृंदा-
वनकार्य्यो गवां घोषः कदाचन। ते तस्मिन्नत्र वासे तु काशिनः पापदर्शिनः। शरीसृपभ्यः कीटेभ्यः शकुनि-
भ्यस्तथैव च। गोष्ठेषु गाभ्यो वत्सेभ्यो रक्ष्यौ ताहा विमौ शिशू। नंदगोपगता रात्रिः शीघ्रयानो व्रज त्वितः। इ-
मं चांग्याहरंतीव पक्षिणः सव्यदक्षिणाः। रहस्यं वसुदेवेन सोऽनुज्ञातो महात्मना। यानं जशोदया सार्द्धमा-
रुरोह मुदायुतः। कुमारं स्कंधवाह्यायां शिविकायां समाहितः। शं वेशयामास शिशुं शयनीये महामतिः

ऽगामच्चविविक्तेन शीतलानिलसर्प्पिणा। बहूदकेन मार्गेण यमुनीतीरगामिना। सदर्भ्भाग्रेण देशेन गोदर्भ्भ
न वनोपमाय मुनीतसंवर्द्धशीतमारुतसेवितं। विरुतास्यापदैरम्यं लतावल्लीमहाद्रुमं। गोनिस्त्रणविलग्ना
नि:। स्यंदतीनिरलंकृतं। समप्रचारं च गवां। समतीर्थजलाश्रयं। विषाणस्कंधघातैश्च वृषाणां घृष्टपादपं। ना
सामिषादानुसृतं श्येनैश्चामिषगृध्नुभि:। शृगालमृगसिंहैश्च वसामेदोऽस्थिनिषेवितं। शार्दूलशब्दानुगतं नाना
पक्षिसमाकुलं। स्वादुवृक्षफलैरम्यं पर्य्यस्ततृणासंस्मृतं। गोव्रजं गोकुलशिवं गोपनारीनिराहृतं। हंभारवैश्च
वत्सानां सर्व्वत: कृतनिस्वनं। सकटावर्त्तविपुलं कंटकीवाटसंकुलं। पर्य्यंतधावृतं वन्यैर्वृहद्भि: पतितैर्द्रुमै।
वत्सानां रोपितै: कीलै: द्दामभिश्च विभूषितं। करीषाकीर्णवसुधं कटच्छन्नकुटीमुखं। क्षेमप्रचारवत्कुल्ले हृष्ट
गोपजनायुतं। दामनीपाशबहुलं गर्गराडुरनि:स्वनं। तक्रनिस्रावबहुलं दधिमंडार्द्रमृत्तिकं। मंथानवल्ल
योद्गारैर्गोपीनां जनतस्वनं। काकपक्षधरैर्बालैर्गोपालै: क्रीडनाकुलं। सार्गलद्वारगोवाटं मध्येगोस्थान=
संकुलं। सर्प्पिषापच्यमानेन सुरभीकृतमारुतं। नीलपीताबरोनिश्वतरुणीभि: समंतत:। वन्यपुष्पावतंसा १२२
भिर्गोपकन्याभिरावृतं। शिरसाधृतकुंभाभि: निर्यद्भिर्यमुनां वरा:। यमुनातीरमार्गेण जलहारीनिरावृतां। स

तत्रप्रविश्यानहृष्टो गोव्रजं गोपनादितं। प्रत्युद्गतो गोपवृद्धै: स्त्रीभिर्वृद्धाभिरव्यग्रो निवेशं रोचयामास परिवर्त्तसुखा
वहां सायत्रा रोहिणी देवी वसुदेवसुखावहा। तत्र तं बालसूर्याभं कृष्णगर्भं न्यवेशयत्॥ ॥इति श्री विष्णुपु हरि
वंशे॥ वैशंपायन उवाच॥ तत्र तस्या सत: काल: सुमहानभ्यवर्त्तत। गोव्रजे नंदगोपस्य वल्लभं च प्रकुर्व्वत:। दा
रकौ कृतनामानौ ववृधाते सुखं च तौ। ज्येष्ठ: संकर्षणो नाम कनीयान्कृष्ण एव च। मेघकृष्णस्तु कृष्णोऽभून्देहान्तर
गतो हरि:। अवर्द्धत गवां मध्ये सागरच्छ इवांबुद:। शकटस्य च अध: सुप्तं कदाचित्कर्म गृहिणी। यशोदा तं समुत्सृज्य
गामयमुनां नदी। शिशुलीलां तत: कुर्व्वन् सहस्त चरणौ क्षिपन्। रुराद मधुरं कृष्ण: पादावूर्द्ध्वं प्रसारयत्। स तै
केन पादेन शकटं पर्य्यवर्त्तयत्। न्युब्जं पयोधराकांक्षी चकार च रुराद स:। एतस्मिन्नंतरे प्राप्ता यशोदा स्नावगा
वसा१ मिनी। स्नाता प्रस्रवदिग्धांगी बद्धवत्सेव सौरभी। सा ददर्श विपर्य्यस्तं शकटं वायुना विना। हा हेति कृत्वा त्वरिता दा
रकं जगृहे तदा। न सा बुबोध तं येन शकटं परिवर्त्तितं। स्वछिमदारकायेति प्रीताभीता च साऽभवत्। किं त्व
स्यतित पुत्र पिता परमकोपन:। वयध्या शकटे सुप्त: अकस्माद्विलोलितं। किं मे स्नानेन दु:स्नानं नद्याश्च
गमनेन किं। पर्य्यस्ते शकटे पुत्र यत्त्वां पश्यामि पाहतं। एतस्मिन्नंतरे गोनिराजगाम वनेचरा:। कशायेवाससी

विन्नन्नंदगोपाव्रजांतिके। स ददर्श विपर्यस्तं भिन्नभांडघटीघटं। अपास्य धूर्जिनमाद्यंतं शकटं चक्रमौलिनं। नी
तस्त्वरितमागम्य सह सा सांश्रुविलोचना। अपि मे स्वस्ति पुत्रायेत्यसकृद्वचनं वदन्। पिबंतं स्तनमालक्ष्य पुत्रं स्व
स्थोऽब्रवीत्पुनः। हे यशोदे विना केन पर्यस्तं शकटं मम। प्रत्युवाच यशोदा तं भीता तद्गद्गदभाषिणी। न विजानाम्यहं
न शकटं न विपातितम्। अहं नदीं गता सौम्य चैलप्रक्षालनार्थिनी। आगता च विपर्यस्तमपश्यं शकटं भुवि
तयोः कथयतोरेवं अब्रुवंस्तत्र बालकाः। अनेन शिशुना यानमेतत्पादेन पातितं। अस्माभिः संपतद्भिश्च दृष्ट
मेतद्यदृच्छया। आश्चर्यमिति तं सर्वे विस्मयोत्फुल्ललोचनाः। स्वस्थाने शकटस्याथ चक्रबंधमकारयत्॥ ॥इ
ति श्रीखिलपु हरिवंशे शकटबंधः॥ वैशंपायन उवाच॥ कस्यचित्त्वथ कालस्य शकुनी वेषधारिणी। धात्री कं
सस्य भोजस्य पूतनेति परिश्रुता॥ पूतना नाम शकुनी घोरा प्राणभयंकरी। आजगामार्धरात्रे वै पक्षौ क्रोधा
द्विधुन्वती। ततोऽर्धरात्रसमये पूतना प्रत्यदृश्यत। व्याघ्रगंभीरनिर्घोषा व्याहरंती पुनः पुनः। निलिल्ये शकटा
क्षे सा प्रस्रवोत्पीडवर्षिणी। ददौ स्तनं च कृष्णाय तस्मिन्सुप्ते जने निशि। तस्याः स्तनं पपौ कृष्णः प्राणैः सह ननाद
च। छिन्नस्तनी महासद्यः पपात शकुनी भुवि। तेन शब्देन वित्रस्तास्तत्र बुबुधिरे जनाः। स नंदगोपो गोपाश्च यशो १२३

दा च सुविक्लवा। ते तामपश्यन्पतितां विसंज्ञां विपयोधरां। पूतनां पतितां भूमौ वज्रेणेवावदारितां। इदं किं चि
ति संत्रस्ताः कस्येदं कर्म इत्यपि। नंदगोपं पुरस्कृत्य गोपास्ते पर्यधारयन्। नाध्यगच्छंत च तदा देहं तत्र कदाच
न। आश्चर्यमिति ब्रुवतोऽनुययुस्ते पुनर्गृहान्। गतेषु तेषु गोपेषु विस्मितेषु यथागृहं। यशोदां नंदगोपस्तु
पप्रच्छागतसंभ्रमः। कोऽयं विधिर्न जानामि विस्मयो मे महानयं। पुत्रस्य मे भयं भीरु भीरुत्वे समुपागते। यशो
दा चाब्रवीद्भीता नार्य जानामि किंचिदं दारके। सुप्तानेन सुप्ताहं निबोधिता। यशोदायामजानंत्यां नंद
गोपः सबांधवः। कंसाद्भयं चकाराग्र्यं विस्मयं च जगाम ह॥ ॥इति श्रीहरिवंशे पूतनावधः॥ वैशंपायन उवाच
काले गच्छति तौ सौम्यौ दारकौ कृतनामकौ। कृष्णसंकर्षणौ चोभौ रिंगिणौ समपद्यतां। तावन्योऽन्यगतौ बा
लौ बाल्यादेवैकतां गतौ। एकमूर्तिधरौ कांतौ बालचंद्रार्कवर्चसौ। एकनिर्माणनिर्मुक्तौ एकशय्यासना
शनौ। एकवेषधरावेवं पुष्यमाणौ शिशुव्रतौ। एककार्यांतरगतौ एकदेहौ द्विधाकृतौ। एककार्यौ महावी
र्यौ एकस्य शिशुतां गतौ। एकप्रमाणौ लोकानां देववृत्तौ समानुषौ। कृत्स्नस्य जगतो गोपौ संवृत्तौ गोपदार
कौ। अन्योन्यव्यतिषक्ताभिः क्रीडाभिरतिशोभितौ। अन्योऽन्यकिरणग्रस्तौ चंद्रसूर्याविवांबरे विसर्पतो।

जो१

वसर्द्धंत्रसर्प्पनोगनुजावुभौ। रिंगंतौ पंकदिग्धांगौ दृष्ट्वा कलमकाविव। क्वचिद्भस्मप्रदिग्धांगौ करीषप्रोक्षितौ
क्वचित्। तौ तत्र पर्यधावेतां कुमारौ विवपावकौ। क्वचिज्जानुनिकृष्टैः सर्प्पमाणौ विरेजतुः। क्रीडंतौ वत्सशा
लासु त्रासहृद्दिग्धांगमृद्... गोमूत्रमाने श्रियायुक्तौ वादानंदजनौ पितुः। जनं च विप्रकुर्वाणौ विहसंतौ क्वचि
त्क्वचित्। तौ तत्र कौतूहलिनौ मृद्धं वत्सकुलहृणौ। रिंगतश्च वदनौ दारकौ सुकुमारकौ। अतिप्रसक्तौ तौ
दृष्ट्वा सर्व्वव्रजविचारिणौ। नाशकद्वै वारयितुं नंदगोपः सुदुर्म्मदौ। ततो यशोदा संक्रुद्धा कृष्णं कमललोच
नं। आनीय शकटीमूले भर्त्सयन्ती पुनः पुनः। दाम्ना चौवोदरे वध्वा प्रत्यवंधयदुलूखले। यदि शक्तोऽसि गच्छेति मद्
का कर्म्म माकरोत्। व्यग्रायां त्वयशोदायां निर्ययौ मगृहाङ्गणात्। शिशुलीलां ततः कृष्णः कुर्वंस्तत्र विस्माप
यन्व्रजं। सोऽङ्गणान्निःसृतः कृष्णः कर्षमाणउलूखलं। यमलाभ्यां प्रवृद्धाभ्यामर्जुनाभ्यां निवारितः। नि
शक्त्या मशिशुर्मध्ये कर्षमाणउलूखलं। तत्तस्य कर्षता वद्धं तिर्य्यग्गतमुलूखलं। लग्नं ताभ्यां समूलाभ्यां
अर्जुनाभ्यां च कर्षचा। तावर्ज्जुनौ भज्यमानौ तेन वालेन नादसा। समूलविटपौ भग्नौ ह्रदमध्ये जहास वै। १२४
निदर्शनार्थं गोपानां दिव्यं स्ववलमास्थितः। तद्दाम तस्य वालस्य प्रभावादनवं दृढं। यमुनातीरमार्गस्था

गोप्यस्तं दृष्ट्वा शिशुं वद्धं दृष्ट्वा विस्मयस्मश्च यशोदा निकटं ययुः। ताः क्रमसंभ्रान्तवदना यशोदाम्प्रचुरं गताः। प्र
घाग गच्छ यशोदे त्वं संभ्रमे किं विलंवसे। जौ तावर्ज्जुनवृक्षौ तौ व्रजे नित्यं पयाचितौ। पुत्रस्योपरि तौ वृक्षौ पति
तौ नौ महीरुहौ। दृढेन दाम्ना तत्रैव वद्धा व उदूखलोदरे। उत्तिष्ठ सत्वरं याहि मूढे नवपुत्रः स वालकः। उत्तिष्ठ
गच्छ दुर्मेधे मूढे पंडितमानिनि। पुत्रमानय जीवंतं मुक्तं मृत्युमुखादिव। सा नीता सहसा त्रस्ता हाहाका
रं प्रकुर्वती। ते देशमागमद्यत्र पतितौ तावुभौ द्रुमौ। सा ददर्श तयोर्मध्ये द्रुमयोरात्मजं शिशुं। दाम्ना
निवद्धमुदरे कर्षमाणमुलूखलं। स गोपी गोपवृद्धश्च सयुवा च व्रजस्तदा। पर्य्यागच्छत ततं दृष्टुं गोपपुंग
व कौतुकं। जजल्पुश्च यथाकामं गोपा वनविचारिणः। केन मौ पातितौ वृक्षौ घोषस्यायतनोपमौ। विना वा
तं विना वर्षं विद्युत्प्रपतनं विना। विना हस्तिकृतं दोषं केन मौ पातितौ द्रुमौ। अहो वत न सानत्तौ विमलौ
वर्ज्जुनाविमौ। भूमौ निपतितौ वृक्षौ याश्यामा च नघोपमौ। नंदगोप प्रसन्नौ ते द्रुमावेवंगतावपि। यत्त
स्यां दारकौ मुक्तौ विमूलाभ्यां मविक्षतः। उत्पातिकमिदं घोषे वृत्तीयं वर्त्तते विदो हतेनायाविनाशश्च द्रु
मयोरत्र कल्पयत्। अस्मिन् स्थाने निवासोऽयं घोषस्यास्य न रोचते। अन्यत्र गच्छ देशं कथ्यंतो नभ

मनं। नंदगोपस्त्वमहसा मुक्तं कृष्णं उलूखलात्। निवेश्यांके च सुचिरं मृतं पुनरिहागतं। ततो यशोदां नंदोऽनं
अन्वनंदगोपो विवेशाह। स च गोपजनः सर्वो व्रजमेव जगाम ह। स च तेन वै नाम्ना तु कृष्णो वै दामबंधनात्। गो
ष्ठे दामोदर इति गोपीभिः परिगीयते। एतदाश्चर्यभूतं हि बालस्यासीद्विचेष्टितं। कृष्णस्य भरतश्रेष्ठ घोषे निवस
तस्तदा॥ ॥इति श्रीखिलेषु हरिवंशे यमलार्जुनभंगो नाम॥ वैशंपायन उवाच॥ एवं तौ बाल्यमुत्तीर्णौ
कृष्णसंकर्षणावुभौ। तस्मिन्नेव व्रजस्थाने सप्तवर्षौ बभूवतुः। नीलपीतांबरधरौ पीतश्वेतानुलेपनौ। बभू
वतुर्वत्सपालौ काकपक्षधरावुभौ। पर्णवाद्यं श्रुतिसुखं वादयंतौ वराननौ। शुशुभाते वनगतौ त्रिशीर्षाविव
पन्नगौ। मयूरांगजकर्णौ तौ पल्लवापीडधारिणौ। वनमालाकुलोरस्कौ। क्वचिद्धसंतावन्योन्यं क्री
डमानौ क्वचित्क्वचित्। पर्णशय्यासु संसुप्तौ क्वचिन्निद्रांतरैषिणौ। एवं वत्सान्पालयंतौ शोभमानौ म
हावनौ। चूर्णयंतौ रमंतौ स्म किशोराविव चंचलौ। अथ दामोदरः श्रीमान् संकर्षणमुवाच ह। आर्य्य
नास्मिन्वने शक्यं गोपालैः सह क्रीडितुं। अविगीतमिदं सर्वं भावाभ्यां मुक्तकाननं। प्रहीणतृणका
ष्ठं च गोपैर्मथितपादपं। घनीभूतानि यान्यासन् काननानि वनानि च। तान्याकाशावकाशानि दृश्यं

कृष्ण मेयाता विचारतो ५

१२५

न्ते यथासुखं। गोवाटेष्वपि ये वृक्षा परिछिन्ना गृहेषु च। सर्वे गोष्ठाग्निषु गताः क्षयमक्षयविक्रमः। संनिरुद्धानि यान्यास
न् काष्ठानि च तृणानि च। तानि दूरावकृष्टानि मार्गितव्यानि भूमिषु। आरण्यमिदमल्पोदमल्पकक्षं निराश्रयं। अ
न्वेषितव्यविश्रामं दारुणं विरलद्रुमं। अकर्मण्येषु वृक्षेषु स्थितविप्रस्थितद्विजं। संवादस्यास्य महतो जननो
त्सादित तु मां निरानंदं निरास्वादं निःप्रयोजनमारुतं। निर्विहंगामिदं शून्यं निर्मज्जनमिवाशनं। विक्रीय
माणैः काष्ठैश्च शाकैश्च वनसंभवैः। उत्सन्नसंचयतृणो घोषोऽयं नगरायते। शैलानां भूषणं घोषो घोष
णां भूषणं वनं। वनानां भूषणं गावस्ताश्चास्माकं परा गतिः। तस्मादन्यद्वनं यामः प्रत्यग्रयवसेंधनं। इष्टं त
नुपभुक्तानि गावो नो कुं तृणानि च। तस्माद्वनं नवतृणं गच्छंतु धनिनो व्रजाः। न द्वारबंधावरणा न गृहक्षे
त्राणस्तथा। प्रशस्ता वै व्रजा लोके यथा वै चक्रचारिणः। शकृन्मूत्रेषु तेष्वेव जातक्षारसानुगं। न तृणं भुंज
ते गावो नापि तत्पयसा हितं। स्थलीप्राया सुरम्यासु नवासु नवराजिषु। चरावः सहिता गोभिः क्षिप्रं संवाह्य
तां व्रजः। श्रूयते हि वनं रम्यं पर्याप्ततृणसंस्तरं। नाम्ना वृंदावनं चैव स्वादुवृक्षफलोदकं। अझिल्लीकंट
कवनं सर्वैर्वनगुणैर्युतं। कदंबपादपप्रायं यमुनातीरमाश्रितं। स्निग्धशीतानिलवनं सर्वर्तुनिलयं शुभं॥

गोपीनां सुखसंचारं चारु चित्रवनांतरं तत्र गोवर्द्धनो नाम नातिदूरे गिरिर्महान्। भ्राजते तटीघोषशिखरानं
दनस्येव मंदरः। मध्ये चास्य महाशाखो न्यग्रोधो योजनोच्छ्रितः। भांडीरो नाम शुशुभे नीलमेघ इवांबरे। मध्ये
न चास्य कालिंदी सीमंतमिव कुर्वती। प्रजाता नंदनस्येव नलिनी सरितांवरा। तत्र गोवर्द्धनं चैव भांडीरं च
वनस्पतिं। कालिंदीं च नदीं रम्यां द्रक्ष्यावश्चरतः सुखं। तत्रायं चाप्यतां घोषस्त्यज्यतां निर्गुणीकृतं। संत्रास्य
यावो नद्यंते किंचिदुत्पाद्य कारणं। एवं कथयतस्तस्य वासुदेवस्य धीमतः। प्रादुर्बभूवुः शतशो वृकामांस
वसाशनाः। घोराश्चिंतयतस्तस्य स्वतनूरुहजाः सदा। विनिष्पेतुर्भयकराः सर्वतः शतसो वृकाः। वृकान्वि
पतितान्दृष्ट्वा गोषु वत्सेषु योनृषु। गोपीषु च यथाकामं व्रजे त्रासोऽभवन्महान्। तेहकाः पंच वृंदाश्च दश
वृंदास्तथापरे। निश्चेरुस्तस्य गात्रेभ्यः श्रीवत्सकृतलक्षणाः। कृष्णस्य कृष्णवदना गोपानां भयवर्द्धनाः। भक्ष
यद्भिश्च तैर्वत्सान् त्रासयद्भिश्च गोव्रजं। निशि बालान्हरद्भिश्च वृकैरुत्साद्यते व्रजः। न वने शक्यते गंतुं
न च गाः परिरक्षितुं। न वनात्किंचिदाहर्तुं न वावतरितुं नदीं। त्रस्ताः प्रोद्विग्नमनसो गोपास्तस्मिन्वनेऽवसन्
एवं वृकैः कदीर्णश्च व्याघ्रतुल्यपराक्रमैः। व्रजो निष्पंदचेष्टः स एककस्थानचरः कृतः॥ ॥इति श्रीहरिवंशे वृक १२९

संदर्शनो नाम॥ वैशंपायन उवाच॥ एवं वृकांश्च तान्दृष्ट्वा वर्द्धमानान्दुरासदान्। सस्त्रीपुंसोऽथ घोषो वै समस्तोऽ
मंत्रयंस्तदा। स्थाने नेह न नः कार्यं व्रजामोऽन्यद्वनं महत्। यच्छिवं च सुखारंभं च गवां चैव सुखावहं। अद्यैव किंच
रणास्मजामो गोधनैः सह। यावद्वृकैर्वधं घोरं न नः सर्वो व्रजो व्रजेत्। एषां धूम्रारुणांगानां दंष्ट्रिणां मुखक
र्षिणां। वृकाणां कृष्णवक्त्राणां विनिशा निशि गर्जतां। मम पुत्रो मम भ्राता मम वत्सोऽथ गौर्मम। वृकैर्व्यापा
दिता एवं क्रंदंस्तस्मिन्गृहे गृहे। तासां रुदितशब्देन गवां हंभारवेण च। व्रजस्योत्थापनं चक्रुर्घोषवृद्धाः समा
गताः। तेषामथ मतं ज्ञाय गंतुं वृंदावनं वनं। व्रजस्य च निवेशाय गवां चैव हिताय च। वृंदावननिवेशाय
तान्दृष्ट्वा कृतनिश्चयान्। नंदगोपबृहद्वाक्यं बृहस्पतिरिवाददे। अद्यैव निश्चयप्राप्तिर्गंतव्यं यदि वा
वनं। शीघ्रमाज्ञाप्यतां घोषः सज्जीभवति माचिरं। ततो वाघोष्यत तदा घोषे तत्र प्राकृतैर्जनैः। शीघ्रं गावः प्रक
ल्पन्तां भांडं समभिरोप्यतां। वत्सयूथानि कल्प्यंतां युज्यंतां शकटानि च। वृंदावनमितः स्थानान्निवेशाय
च गम्यतां। तच्छ्रुत्वा नंदगोपस्य वचनं साधुभाषितं। उदतिष्ठद्व्रजः सर्वः शीघ्रं गमनलालसः। प्रयाहु
त्तिष्ठ गच्छामः किं शेषे याहि याज या उत्तिष्ठति व्रजे तस्मिन्नासीत्कोलाहलो महान्। उत्तिष्ठमानः शुशुभे

शकटीशकटस्कयाय्याघ्रघोषमहाघोषोघोषःसागरघोषवान्॥ नीलपीतारुणाभासां वस्त्रैरग्र्यस्तनाच्छितैः
शाकशाप्रायते पंक्तिर्गोपीनां मार्गगामिनी॥ दामनीदामभारैश्च कश्चित्कायापलंवितैः॥ गोपा मार्गगतानां
ति सावरोहाद्रुवद्रुमाः॥ स व्रजो व्रजनानाति शाकटौघेन नास्वना॥ तोयैः प्रवनविक्षिप्तैर्न्निपतद्भिरिवार्णवः
स पानतद्व्रजस्थानेमिरिसरणं समपद्यत॥ द्व्याघ्रयवनिर्हूतं कीर्णवायसमंडलं॥ ततः क्रमेण घोषः स प्राप्तो
वृंदावनं वनं॥ निवेशं विपुलं चक्रे गवां चैव हिताय च॥ शाकटावर्तपर्यंतं चंद्रार्द्धाकारसंस्थितं॥ मध्ये योजन
विस्तारं तावद्द्विगुणमायतं॥ कंटकीभिः प्रवृद्धाभिस्तथा कंटकितैर्द्रुमैः॥ निखातोच्छ्रितशाखाभिरभिगुप्तं स
मंततः॥ मंथैरारोप्यमाणैश्च मंत्रवद्धानुकर्षणैः॥ अद्भिः प्रक्षाल्यमानाभिर्गर्गरीभिरितस्ततः॥ कीलैरारो
प्यमानैश्च दामनीपाशपाशितैः॥ स्तंभनीभिर्द्रुतैश्चापि शाकटैः परिवर्त्तितैः॥ नियोगपाशैरासक्तैर्गर्गरैः स्थ
स्तंभमर्द्दकैः॥ छादनार्थं प्रकीर्णैश्च कटैस्तृणगृहैस्तथा॥ शाखाविटंकैर्वृक्षाणां क्रियमाणैरितस्ततः॥ शोध्य
मानैर्गवां स्थानैः स्थाप्यमानैरुदूखलैः॥ प्राङ्मुखैः सिच्यमानैश्च संदीप्यद्भिश्च पावकैः॥ सवत्सचर्मास्तरणैः १२७
पर्यंकैः परिवर्त्तितैः॥ तोयमुच्चारयन्तीभिः प्रेक्षंतीभिश्च तद्वनं॥ शाखाश्चकर्षमाणाभिर्गोपीभिश्च समंततः

युवभिः स्थविरैश्चैव गोपैर्व्यग्रकरैर्व्रजः॥ वित्रासद्भिः कठोरैश्च काष्ठैर्न्यपितस्तनपितद्व्रजस्थानमधिकं शुशुभेऽकान
नाहतं रम्यं च वननिवेशं स्वादुमूलफलोदकं॥ ताश्च कामदुघा गावः सर्वे पक्षिरुतस्वनं॥ वृंदावनमनुप्राप्ता नं
दगोपरुकाननं पूर्वमेवं तु कृष्णेन गवां वै हितकारिणा॥ शिवेन मनसा दृष्टं तद्वनं वनचारिणा॥ पश्चिमेऽपि त
कस्यैष धर्मे मासे निरामये॥ वर्षतीवामृतं देव तृणं तत्र व्यवर्द्धत॥ न तत्र वत्साः सीदंति न गावो नेतरे जनाः॥ य
त्र तिष्ठति लोकानां भवाय मधुसूदनः॥ ताश्च गावः स घोषश्च स च संकर्षणो युवा॥ कृष्णेन विहितं वासं तम
ध्यासन्निर्वृताः॥ ॥ इति श्रीहरिवंशे वृंदावनप्रवेशः॥ वैशंपायन उवाच॥ तौ तु वृंदावनप्राप्तौ वसुदेवसु
तावुभौ॥ चेरतुर्वत्सयूथानि चारयंतौ सुरूपिणौ॥ संप्राप्तधर्मसमये सवयास्तत्र वने सुखं॥ क्रीडतौ सहगो
पालैर्यमुनां चावगाहतां॥ ततः प्रावृडनुप्राप्ता मनसः कामदीपनी॥ प्रववर्षुर्महामेघाः शक्रचापांकि
ताद्दराः॥ बभूवादर्शनः सूर्यो भूमिश्चादर्शयन्तृणं॥ महता वेगवातेन नवितोयानुकर्षिणा॥ समार्द्रि
ततला भूमिर्यौवनस्थेव लक्ष्यते॥ नववर्षावसिक्तानि शक्रगोपाकुलानि च॥ नष्टदावाग्निमार्गाणि वना
नि प्रचकाशिरे॥ हृतव्यापारकालश्च मयूराणां कलापिनां॥ मदरक्ताः प्रवृत्ताश्च केकाः पटुरवास्तथा॥ नवप्रा

हृषिकाणां नानां षडुदाहारदायिनां। यौवनस्थं कदंबानां नवाम्भेन्द्रो गतैः वपुः। सलिलं कुटजैर्बद्धैः कदंबैर्वासि-
तं वनं। संतमा नास्करकरैरनितप्तादवाग्निनि। जलैर्बलाहकोत्सृष्टैः रुद्धसंतीह पर्वताः। महावातसमुद्धूतं
महामेघगणार्पितं। मही महाराजपुरस्कल्पमापद्यते ननः। क्वचिच्चकदंवेदासाद्यो शिलिंध्रा नराणां क्वचित्तासं-
ध्रीसनिनादितं फुल्लमीपक्कमं वनं। पंद्रणपयसासिक्तं मारुतेन च वीजितं। पार्थिवं गंधमाघ्राय लोकाः तुष्टि-
तमानसाः। हृष्टं सारंगनादेन दर्दुरव्याहृतेन च। नचैश्च शिखिविक्रुष्टैः खकीर्णा वसुंधरा। त्वमहारूपे महावर्त्ते
व षेषाम्महारयाः। हरन्त्यस्तीरजान्वृक्षान्विसर्पंत्यो निम्नगाः। सन्नता सारनिर्याताः क्लिन्नपत्रांतरच्छ-
दाः। नत्यजंति नगाग्राणि। शांताङ्गा पतत्रिणः। तोयगंभीरलंबेषु प्रसवस्कनेटस्नुचा उदरेषु नवाम्भा-
णां मज्जतीव दिवाकरः। महीरुहे रुत्पत्तिताः सलिलात्पीड संकुलाः। अन्येष्यमार्गविसुधा नातिशाद्वलशा-
लिनी। वज्रेण वा वलोर्द्धैर्निनं नस्पवनं नष्टक्रुन्नमात्पषनं नष्टरन्त्र। मेघः शीतापतप करा विनष्टमिव
रात्रिमिवा। नाद्यावा पृथिव्योः संसर्गाः। सततं वनतः ज्ञताः। अस्यमिव छिन्नधारौघाः समुद्रौघसमैर्घनैः। नीपार्जु-
नकदंबानां। पृथिव्यां चातिहृष्ट्याः। गंधकोलाहला वांति वाता मदनदीपनाः। संप्रवृत्ते महावर्षे लवमान-

...यप्रा। वाणारपेनरचितं तवेदं मध्यमं पद। ११८ पत्रकीखककक ३८

महार्णवे। न्यास्पगाधमपर्यंतं ससागरमिवांबरं। धारानिर्मलनाराचं विद्युत्कवचवर्मिणं। शक्रचापं युधध्वजं यु-
द्धसज्जमिवांबरं। शैलानां च वनानां च दुमाणां च वराननं। प्रतिच्छन्नानि नासंतो गिरवराणि नवैर्घनैः। गजा-
नीकैरिवाकीर्णं सलिलोद्गारिनिर्घनैः। वर्णसारूप्यतां याति गगनं सागरस्य वै। समुद्राहृतजननाः लोलां-
शाङ्कलकंपिनः। शीताः सष्टपङ्कहामाः कर्कशा वाति मारुताः। शनिशातसुप्तचंद्रासु मन्दकेता यासु तायते
मग्नसूर्यस्य नमसो न विज्ञाति दिशा दश। विततं पुष्करं कोशे रूपमाध्मातो समंततः। नवतृणीनं नरम्याणां।
विशपंजा तिलक्ष्म्याः। धर्मदोषपरित्यक्तं मेघसोना विनूषितं। पत्रपट्टंदावनं ऊल्ल वनं चैत्ररथं यथा। ए-
वं प्राहद्गुणान्सर्वान्श्रीमानकृष्णस्यपूर्वजः। कथयन्नेवबलवान्व्रजमेव जगाम ह। तौ रमयंतावन्योन्यं
कृष्णसंकर्षणौ उभौ। तत्काले ज्ञानिनिःसार्हे चेरतुस्तद्वनं महत्॥ ॥इति श्रीखिलेषु हरिवंशे प्राविड्वर्ण-
नं नाम॥ वैशंपायन उवाच॥ कदाचित्तु तदा कृष्णो विना संकर्षणं नवे। चचार तद्वनं वरं कामरूपी वरा-
ननः। काकपक्षधरः श्रीमान्पद्मः पद्मदलेक्षणः। श्रीवत्सेनोरसि युतः शशांकइव लक्षणाः। साङ्गहस्ते-
नाग्रपादेन पंकजांघ्रिनवर्धसा। सुकुमारानितांबाणां कांतविक्रांतगामिना। पीतः प्रीतिकरं नृणां। पद्म

किंजल्कसप्रभोसूक्ष्मेवसानोवसनेससांध्यइवतोयदः॥वक्रव्यापारयुक्ताभ्यांभयाभ्यांदंडरज्जुभिः।भुजाभ्यां
साधुवृत्ताभ्यां१ जिताभ्यांदिवौकसैः।सहस्रांपुंडरीकस्यगंधेनकमलस्यचा।रराजतस्यतद्बाल्येस्फुरद्विरोष्ठ
पुटंमुखं।शिखानिखस्यमुक्तानीरराजमुखपंकजे।हतंषट्पदपंक्तीनिर्यथास्यास्यद्भमंडलं।तम्याद्युनक
देवाद्यानीलकंदलमालिनी।रराजमालात्रिरसिनस्रचाणियथादिवि।सतयामालयावीरःश्रमेनसर्वे
युगपन्यां।मधकालांबुदस्यामाननस्यद्रविमूर्त्तिमान्॥१॥कानामलपत्रेणकंभ्सत्रावलंविना।रराजवर्हि
पुत्रेणमंदमारुतकंपिना।क्वचिद्वायन्नक्वचिद्क्रीडंश्चंचूर्णंचक्वचित्क्वचित्।पर्णपाद्यंश्रुतिमुखंवादयंश्च
क्वचित्क्वचित्वने।गापवेपुंसुमधुरंकामर्द्दइववादयन्॥प्रह्लादनार्थंचगवांक्वचिद्दनगतोयुवा।गोकुले
डंबुधरश्यामःवचारद्युतिमान्प्रभुः।रमेचतत्ररम्यासुचित्रासुवनराजिषुमयूरखदुःशासुदमनाद्दीपनी
षुच।मधनादप्रतिव्यूहैर्न्नोदितासुसमंततः।गाद्रुलाच्छन्नमार्गासुशिलीध्रानरणासुच।कंदलामलदंतीषु
श्रवतीपुनवंजलं।केसराणांनवैगंधैर्मंदनिश्वसितापमैः।श्वनीराणांनिस्यसंतीषुचापिश्वसमंततः॥ १२७
सेव्यमानोनवैर्गधैर्द्रुमसंघातनिस्सृतैः।तास्वरण्यस्थलीमुदंलेभेसौम्यासुवनराजिषु।सकदाचिद्दनेतस्मिन्गो

निःसहपरिवृतन्नाददर्शविपुलोदयंश्यास्विनंश्यास्विनोवरं।धरण्यांकालमेघानंनिविडंदलसंचयैः।गगनोद्दि
ष्ठिताकारंपवनानोगधारिणं।नीलचित्रांगवर्णाश्चश्रोभितंवहुभिःखगैः॥फलैःप्रवालैश्चघनैःसंछन्ना
पघनोपमं।नवनाकारविटपंलतापुष्पसुमंडितं।विशालमूलंविततंपवनोनोदधारिणं।आधिप
त्यमिवान्येषांतस्यदेशस्यशास्विनां।कुर्वाणंशुभकर्माणंवातवर्षमनातपं।न्यग्रोधपर्वताग्रानंना
डीरंनामनामतः।दृष्ट्वातत्रमतिंचक्रेनिवासायततःप्रभुः॥सतत्रवयसातुल्यैर्वत्सपालैःसहानघः।रेमे
मेवासंरञ्जनःपुरास्वर्गागतोयथा।तंक्रीडमानंगोपालाःकृष्णंभांडीरवासिनं।रमयंतिस्मवहवाव
न्यैःक्रीडनैस्तथा।अन्येस्मपरगायंतिगोपामुदितमानसाः॥गोपालाःकृष्णमेवान्येगायंतिस्मरतिप्रि
या।तेषांसगायतामेववादयामासवीर्यवान्॥पर्णवाद्यांतरेवेणुंतुंबीवीणांचतत्रह।कदाचिद्वारस्ये
न्यवगाःसगान्यपनेपाणः।जगामजमुनातीरंलताजंतपादपं।तरंगापांगकुटिलांवारिस्पर्शसुखा
निलां।तांचपश्यात्यजलवतींददर्शयमुनांनदीं।सुतीर्थस्वादुसलिलांह्रदिनींवेगगामिनीं।तोयकालो
ष्ठितैर्बैगरत्नाभितपादपां।हंसकारंडवैर्धुष्टांसारसैःमुनिनादितां।अन्योन्यमिथुनैश्चैवसेवितां

मिथुनेचरैः। जलजैः प्राणिभिः कीर्णां जलजैर्भूषितां गुणैः। जलजैः कुसुमैश्चित्रां जलजैर्हारितोदकां। प्रक्षि-
तश्वेतचरणां पुलिनश्रोणिमंडलां। आवर्त्तनाभिगंभीरां पंकरागानुरंजितां। तटाच्छेदोदरांकांतां तरंगत्रि-
वलीधरां। फेनप्रहासशुभ्रानां प्रसन्नां हंसहासिनीं। रुचिरोत्पलदंताढ्यां तनन्वं जलजेक्षणां। कूर्दद्दीर्घललां
तां कांतश्रेवालमूर्द्धजां। चक्रवाकस्तनतटीं तीरपार्श्वोपतानना। दीर्घश्रोतपुतः भुजां आनागश्रवणायु
मां सारसारावनूपुरां। कापुष्पमयं वासो वसानां हंसलक्षणां। ऊषनकाचुलिसांगी करमंलक्षणभूषितां
हिंषी दृश्यमाणाः समंततः। चचार रुचिरं शैलो यक्षनामुपशोभयन्। वांचरन्सनदीश्रेष्ठां ददर्शाङ्कदम-
श्चत्वं। दीर्घयोजनविस्तारं त्रिदशै रपिदुःसदं। गंभीरमक्षोभ्य जलं निःकंपमिव सागरं। तोयजैः श्वापदैस्त्यक्तं
विषरागिनवस्पाग्नेर्भूमेन परिवेष्टितं। अनोमपंतत्पन्नोदि त्रिपेयं चजलार्थिभिः। उपनागैः परित्यक्तं स

द्भिस्त्रिषवणार्थिभिः। अकाद्यादप्यसंचार्य्यं खगैराकाशगोचरैः। नृणोघपिपतत्यस्य ज्वलंतमिवतेजसा। समंत
द्योजनेमात्रं तीरदपिदुरासदं। विषानलेनघोरेण ज्वालाप्रज्वलितोदकं। व्रजस्याग्रतस्तस्य क्रोशमात्रे निरामय
तं दृष्ट्वा चिंतयामास ज्वालावे विपुलं हृदं। अगाधं चातिघोरं च कस्यायं सुमहद्ध्रदं। अस्मिन्नमकालियानाम
नीलांजनचयोपमः। उरगाधिपतिः साक्षाद्भूदेवसतिदारुणः। उक्तश्वसागरावासं यो मया विदितः पुरा
भयात्पतगराजस्य सुपर्णस्योरगाशिनः। तेनेयं दूषिता सर्वा यमुना सागरंगमा। भयात्तस्योरगपतेन्नी
यंदेशानिपन्नेता। तदिदं दारुणाकारमरण्यं दृष्ट्वाद्भुतं। मावरादद्भुमं घोरं कीर्णं नानालताद्रुमैः
रक्षितं सर्पराजस्य सचवैराक्षकारिभिः। वनं निर्विषयाकारं विषाग्निमिवदुःस्पर्शं। तेरागकारिभिर्नि
त्यं सर्वतः परिरक्षितं। शैवालसलिलेश्वापिदृष्टैश्च क्लृप्तलताकुलं। कथंवमा मार्गो व्रजेते हृदस्यास्यत
टाद्भुतौ। तदस्य सर्पराजस्य कर्त्तव्यो निग्रहो मया। यथायं सरिदं नादान वेक्षिप्रजलाश्रया। आत्मानमा
त्मनो वाक्यं प्रोवाच प्रणतार्त्तिहा। इदं वनं नदी चेयं अन्योऽन्यमितिमे मतिः। नविसर्प्पति दत्र्यपं। सर्वानी
रमहीतलो। व्रजोपनागं पश्चयथा नागे वेदमितं मया। सर्वत्र सुखसंचारा सर्वतीर्थसुखाश्रया। एतदर्थं क्षा

MEMORIAL

सोमे व्रजेऽस्मिन्गोपजन्म च॥ अमीषामुत्पथस्थानां निग्रहार्थं दुरात्मनां। एनं कदंबमारुह्य तदेष मिस्कली
लया॥ विनिपत्य ह्रदे घोरे मर्दयिष्यामि कालियं॥ ॥इति श्रीहरिवंशे यमुनाह्रददर्शनं॥ वैशंपायन उवा
च॥ सोपसृत्य नदीतीरं। बद्ध्वा परिकरं दृढं। आरुरोह चपलः कृष्णः कदंबं शिखरं मुदा। कृष्णः कदंबशिखरा
त्प्लवमानोऽबुदाकृतिः। ह्रदमध्येऽकरोच्छब्दं निपतन्नंबुजेक्षणः। स तेनातिपतता ह्रदो नितायमु
नाह्रदः। संप्रासिच्यत वेगेन भिद्यमान इवांबुदः। तेन शब्देन संक्षुब्धं तत्सर्पभवनं महत्। उदतिष्ठज्जला
त्सर्पो रोषपर्याकुलेक्षणः। स चोरगपतिः क्रुद्धो मेघराशिसमप्रभः। रक्तांतनयनः कालियः समदृश्यत। पं
चास्यः पावकाख्यः श्वसञ्ज्वलज्जिह्वाललितानना। पृथुभिः पंचभिर्घोरैः शिरोभिः परिवारितः। प्रदीप्ता ह्रदं सर्वं
नागेनानलवर्चसा। स्फुरन्निव चरोपेण ज्वलन्निव च वर्चसा। क्रोधन तज्जलं तस्य सर्वं शृतमिवाभवत्। प्र-
तिश्रोतास्तु नीतेव जगाम यमुना नदी। तस्य क्रोधाभिहर्षान्याव कंपाऽनलं मारुतः। दृष्ट्वा कृष्णं ह्रदगतं
क्रीडंतं शिशुलीलया। सा धूमाः पन्नगेंद्रस्य मुखान्निश्चेरुरर्चिषा। स जतातैर्नरा पार्श्वे सर्वं। पतीरज्ञाद्रु १३
मा:। सुगोन भस्मसान्नीता युगांतप्रतिमन्नैन तस्य पुत्राश्च दाराश्च भृत्याश्चान्ये महोरगाः। मवंतः पावकं घो

रं वक्रेभ्यो मुखसंभवं। सधूमाः पन्नगेंद्रस्य निश्चेरुरमितौजसः। प्रवत्रितश्च ततः सर्पैः स कृष्णो नागबंधनं॥ निर्यत्नश्चर
णाकारः स्तब्धो गिरिरिवाचलः। अदष्टो नूद दशनैस्ते शीघ्रं विषोत्पीडजलाविलैः। तं कृष्णं सर्पपतयो न च चारव
वीर्यवान्। एतस्मिन्नंतरे भीताः गोपालाः सर्वे प्रवत। क्रंदमाना व्रजं जग्मुर्बाष्पगद्गदया गिरा। एष मोहं गतः कृष्ण
मग्नो वै कालियह्रदे। नह्यते सर्पराजेन तद्धावाक्षत मा चिरं। नंदगोपाय वक्षिप्रं वल्लवाय निवेद्यतां। एष त
ह्लते पुत्रः सर्पेणाति महाह्रदे। नंदगोपस्ततः श्रुत्वा वज्रपातोपमं वचः। आर्तः स्खलितविक्रांतस्तं जगा
म ह्रदोत्तमं। सबालयुवतीवृद्धः सवसंकर्षणो युवा। आक्रीडं पन्नगेंद्रस्य जनस्तं समुपागत। नंदगोपमु
खा गोपाः सर्वे साश्रुलोचनाः। हाहाकारं प्रकुर्वंति सर्वे सरिद्ह्रदस्य वै। व्रीडिता विस्मिताश्चैव शोकार्ता
श्च पुनः पुनः। केचिच्च पुत्र हा हेति। हा धिगित्यपरे पुनः। अपरे हा हतस्मीति रुरुदुर्नेत्रजाः स्रवताः। स्त्रिय
श्चैव यशोदां हा हतासीति विचुक्रुशुः। या पश्यामि प्रियं पुत्रं सर्पराजवशं गतं। स्पंदितं सर्पनागेन कृष्ण
माणं यथा मृगं। अश्मसारमयं दिव्यं हृदयं तेऽनिलस्पते। पुत्रं कथमिमं दृष्ट्वा यशोदे नावदीर्यसाह्रु
रक्तं च न पश्यामो नंदगोपं ह्रदांतिके। पश्य पुत्रमुखे दृष्टिं निश्चेतनमवस्थितं। यशोदामनुगच्छंतः सर्वे

वासमिमं ह्रदं। प्रविशामो नयास्यामः सघोषा मा दरं विना। दिवसः को विना सूर्यं विना चंद्रेण का निशा। वि
ना हृषेण का गावो विना कृष्णेन गोव्रजाः। विना कृष्णेन यास्यामो विवत्सा इव धेनवः। तासां विलापितं श्रु
त्वा तेषां च व्रजवासिनां। एकेनात्र शरीरेण एकदेहो द्विधा कृतः। संकर्षणोऽथ संक्रुद्धो वचनं प्राह कृष्ण मम्ययोऽत्र
ष्ण कृष्ण महाबाहो गोपानां नंदवर्द्धन। दम्यतामेष वै क्षिप्रं सर्पराजो विषायुधः। इमे नो बांधवास्तात त्वां मत्वा
मानुषं विना। परिदेवंति करुणं सर्वे मानुषबुद्धयः। तच्छ्रुत्वा रौहिणेयस्य वाक्यं संज्ञासमीरितं। विकम्पाक्षि
स्फोटयद्बाहू निर्वा तन्नागबंधनं। तथैवस्य पद्भ्यां मथ्य कम्प्य नागरा शिलोच्छितं। शिरः सुकृष्णोऽज्ञयाह स्व
हस्तेनावनम्य च। तस्यारुरोह सहसा मध्यमं तन्महच्छिरः। सोऽस्य मूर्द्धिस्थितः कृष्णो ननर्त रुचिरांगदः। मृ
द्यमानः स कृष्णेन श्रांतमूर्द्धा भुजंगमः। आस्यैः सरुधिरोद्गारैः कातरो वाक्यमब्रवीत्। अविज्ञानान्मया
कृष्ण रोषोऽयं संप्रदर्शितः। दमितोऽहं हतविषो वशगस्ते वरानन। तदाज्ञापय किं कार्यं सदारापत्यबां
धवः। कस्य वा वश्यतां यामि यो जीवितं मे प्रदीयतां। पंचमूर्द्धि न तं दृष्ट्वा सर्पं सर्पारिकेतनः। अक्रुद्ध एव भ
गवान्। प्रत्युवाच गतस्वरं। तवास्मिन्न यमुनातोये नैव स्थानं ददाम्यहं। गच्छ सार्णवजलं सर्प सभार्यः स १३२

हृद्बांधवः। यश्चेह मन्नयोह्नेण त स्थले वा यदि वा जले। तवनत्कसन्जावा क्षिप्रं वध्यः स मे भवेत्। शिवं चास्य
जलस्यास्तु त्वं च गच्छ महार्णवं। स्थाने विहनवेद्दोषस्नवांतकरणो महान्। मत्पदानि च ते सर्प दृष्ट्वा मूर्द्ध
सु सागरे। गरुडः पन्नगरिपुस्त्वयि न प्रहरिष्यते। एष मूर्द्धा व च वास्य कृष्णस्य रणपुंगवः। पश्यतामेव गो
पानां जगामादर्शनं ह्रदात्। निर्जिते तु गते सर्पे कृष्णमुत्तीर्य धिष्ठितं। विस्मिताः तुष्टुवुर्गोपाश्चक्रुश्चैव
प्रदक्षिणं। ऊचुः सर्वे च सप्रीता नंदगोपं वनेचराः। धन्योऽस्म्यनुगृहीतोऽस्मि यस्य ते पुत्र ईदृशः। अद्य
प्रभृति गोपानां गवां गोष्ठस्य चानघ। आपत्सु त्राणं कृष्णः प्रभुश्चायतलोचनः। जाता निर्विषजला सर्वा य
मुना मुनिसेविता। तीरवास्यां सुखं गावो विचरिष्यंति वः सदा। व्यक्तमेव वने जाता वयं यं कृष्णमीदृशं
महद्भूतं न जानीमश्छन्नमग्निमिव व्रजे। एवं ते विस्मिताः सर्वे स्तुवंतः कृष्णमव्ययं। जग्मुर्गोपगणा घो
षं देवा इव चैत्ररथं यथा॥ ॥ इति श्रीहरिवंशे कालीयमर्दनं नाम॥ वैशंपायन उवाच॥ दमितसर्पराजेऽत्र ह
त्वा न यमुनाह्रदे। तमेव चरतुर्हर्षं संहितौ रामकेशवौ। आजग्मतुस्तौ सहितौ गोधनैः सहगामिना। गो
रिगोवर्द्धनं रम्यं वसुदेवसुतावुभौ। गोवर्द्धनस्योत्तरतो यमुनातीरमाश्रितं। ददृशाते ऽथ तौ वीरौ रम्यं ता

तालवनं महत्। तौ तालपर्णाव्रततेरम्ये तालवने रतौ। चेरतुः परमप्रीतौ वृषपालाविवाहृतौ। स तु देशः सम

स्निग्धः। कृष्णमृदान्वितः। दर्भप्रायस्थलीनिम्नो लोष्टपाषाणवर्जितः। तालैस्तैर्विपुलस्कंधैरुच्छ्रितै

श्यामपर्वभिः। फलाग्रशाखिभिर्नीति नागहस्तैरिवोच्छ्रितैः। तत्र दामोदरो वाक्यमुवाच वदतां वरः। अहो

तालफलैः पक्वैर्वासितेयं वनस्थली। स्वादून्यार्य्यसुगंधीनि त्रपामानि रिमवंति वा। पक्कतालानि सहितौ

पातयावो लघुक्रमौ। यद्येषामीदृशो गंधो माधुर्य्यघ्राणतर्पणः। रसेनामृतकल्पेन भवितव्यं च मे म

तिः। दामोदरवचः श्रुत्वा रौहिणेयो हसन्निव। पातयन्पक्कतालानि चालयामास तांस्तरून्। नतु तालव

नं नृणामसेव्यं दुरतिक्रमं। निर्म्माणभूतमिरिणं पुरुषादालयोपमं। दारुणो धेनुको नाम दैत्यो गर्द्दभ

रूपधृक्। खरयूथेन महता वृतो बलवतां वरः। स तत्तालवनं घोरं गर्द्दभः परिरक्षति। नृपक्षिश्वापदगणा

स्त्रासाद्यानः सकृन्मतिः। तालशब्दं स तं श्रुत्वा संविधुष्टं फलपातने। नामर्षयत संक्रुद्धस्तालस्वनमिव

द्विपः। शब्दानुसारी संक्रुद्धो दर्प्पाविद्धसटाननः। स्तब्धाक्षो हेषितपटुः खुरैर्न्निर्दारयन्महीं। आविद्धपु

च्छो हृषितो व्यात्ताननोऽन्तकः। आपतन्नेव ददृशे रौहिणेयमुपस्थितं। तालानान्नमधोदृष्ट्वा सधत्रा १३३

कारमयं रौहिणेयं खरोऽदुष्टः स दशनायुधः। पद्भ्यामुभाभ्यां च पुनः पश्चिमाभ्यां पराङ्मुखः। जघानो

रसि दैत्यः स रौहिणेयं निरायुधं। ताभ्यामेव स जग्राह पद्भ्यां तं दैत्यगर्द्दभं। आवर्त्तितमुखस्कंधं प्रैरयत्ताल

मूर्द्धनि। स भग्नोरुकटिग्रीवो भग्नपृष्ठो दुराकृतिः। खरस्तालफलैः सार्द्धं पपात धरणीतले। तं दृष्ट्वा सुगत

श्रीकं पतितं वीक्ष्य गर्द्दभं। ज्ञातीनस्य तथा परांस्तस्य तृणराजानि सोऽक्षिपत्। सा गर्द्दभैर्द्देहैश्च तालैः पक्वैश्च पा

पतितैर्वभासे छिन्नजलदा द्यौरिवाव्यक्तशारदी। तस्मिन्गर्द्दभदैत्ये तु सानुगे विनिपातिते। रम्यं ताल

वनं तद्धि भूयो रम्यतरं बभौ। विप्रमुक्तभयास्तत्र विविक्ताकारदर्शनं। चरंति स्म सुखं गावस्तत्तालवनमुत्त

मं। ततः प्रहृष्टाः सर्वे गोपा वनविचारिणः। वीतशोकभयाबाधाश्च चूर्ण्यंते स्म ते वनं। ततः सुखं प्रकीर्णासु

गोषु नागेंद्रविक्रमौ। द्रुमपर्णासने श्रुत्वा यथार्हं तौ निषीदतुः॥ ॥इति श्रीखिलेषु हरिवंशे धेनुकवधः॥ वै

शंपायन उवाच॥ अथ तौ जातहर्षौ तु वसुदेवसुतावुभौ। तत्तालवनमुत्सृज्य भूयो भांडीरमागतौ। चा

रयंतौ विवृद्धानि गोधनानि शुभानि तौ। स्फीतसस्यप्ररूढानि वीक्षमाणौ वनानि च। क्ष्वेलयंतौ प्रगायं

तौ प्रचिन्वंतौ च पादपान्। नामभिर्व्याहरंतौ च सवत्सा गाः परंतपौ। निर्योगपाशैरासक्तैः स्कंधाभ्यां शुभ

लक्ष्मणौ। वनमालाकृतोरस्कौ। बालशृंगाविवर्षभौ। सुवर्णांजनवर्णाभ्यां। अन्योऽन्यसदृशांकौ। महेंद्रायुध
संसक्तौ। शुक्लकृष्णौ। विवांबुदौ। कुर्वाणाथ कुसुमानां च कर्णपूरं मनोरमं। वनमार्गप्रसूनैर्णा वन्यवेषधरौ
नृपौ। गोवत्सानुचरौ वने सांरंतु चरौ वत्सौ। चेरतुर्लोकसिद्धाभिः क्रीडाभिरपराजितौ। तावेवं मानुषी
दीक्षां वहंतौ सुरसंजितौ। तज्जातिगुणयुक्ताभिः क्रीडाभिश्चेरतुर्वनं। नौत भांडीरमुचिते काले क्रीडार्थ
न्नक्लितौ। प्राप्तौ परमशाखाढ्यं न्यग्रोधं शाखितां वरं। तत्र स्पंदोलिकाभिश्च युद्धमार्गश्च दंशितौ। अत्र मनिः
क्षेपणीयैश्च तौ व्यायामं प्रकुर्वतौ। युद्धमार्गं च विविधैर्गोपालैः सहितौ पुनः। मुदितौ सिंहविक्रांतौ
यथाकामं विचेरतुः। तयोरमतयोरेवं तालिप्रस्फारस्फुरा महाः। प्रलंबोऽभ्यागमत्तत्र छिद्रान्वेषी तयोस्तदा
गोपालवपुमाच्छाद्य वन्यवेषविभूषितः। लोभयानः सतो वीरो हास्यैः क्रीडनकैस्तथा। सोऽवगाहत
निःशंकस्तेषां मध्यममानुषः। मानुषं वपुराच्छाद्य प्रलंबो दानवोत्तमः। प्रक्रीडिताश्च ते सर्वे सहते नाम
रारिणा। गोपालवपुषं गोपा मन्यमानाः स्वबांधवाः। स तु छिद्रांतरं प्रेक्ष्य प्रलंबो गोपतां गतः। दृष्टिप्र १३४
णं रथ लक्ष्मोरौहिणेयं च दारुणं। अविषह्यं ततो गत्वा लब्धमद्भुतविक्रमं। रौहिणेयवधे यत्नमकरो
श्रुवुः स्वरमीरितम्। तत्र तत्र च विप्रेंद्रान्नियतान्संशितव्रतान्। जपहोमपरान्मुख्यान्ददृशुः कश्यपा
त्मजाः। तस्यां सनाथायामास्ते सम ब्रह्मा लोकपिता महः। सुरासुरगुरुः श्रीमान्विदधद्देवमायया। उपा
संते च तत्रैवं प्रजानां पतयः प्रभुं। दक्षः प्रचेताः पुलहो मारीचिश्च द्विजोत्तमः। भृगुरत्रिर्वसिष्ठश्च गौतमो
नारदस्तथा। मनुर्धीरं तरिक्षं च वायुस्तेजो जलं मही। शब्दः स्पर्शश्च रूपं च रसो गंधस्तथैव च। प्रकृतिश्च वि
कारश्च यच्चान्यत्कारणं महत्। सांगोपांगाश्च वेदाः सरहस्यपदक्रमाः। क्रियाश्च क्रतवश्चैव संकल्पः
प्राण एव च। एते चान्ये च बहवः स्वयंभुवमुपस्थिताः। अर्थो धर्मश्च कामश्च हर्षो द्वेषश्च नित्यदा। शुक्रो बृ
हस्पतिश्चैव संवर्तो बुध एव च। शनैश्चरश्च राहुश्च ग्रहाः सर्वे तथैव च। मरुतो विश्वकर्मा च नक्षत्राणि च न
रतो[illegible]वाकरश्च [illegible]मश्च ब्रह्माणं समुपासते। सा विचीदुर्गतरणी नाली सप्तविधस्तथा। सद्योणिश्रुतिश्च।

स्त्राणि गाथाश्च निमया सह। नाम्नाणि सर्वेशः स्त्राणि देव वंति विशांपते। क्षणा लवा मुहूर्त्ताश्च दिवा रात्रि
श्च भारत। अर्द्धमासाश्च मासाश्च ऋतवः षट् तथैव च। संवत्सराश्च त्रेयुगं मा त्रेता। क्रिया त्रविधिः॥ कालच
कं च यद्दिव्यं नित्यं गं ध्रुवमव्ययं। एते चान्ये च बहवः स्वयं मूर्त्तिमुपस्थिताः॥ तं प्रविष्टाः स्म नो दिव्यां ब्रह्मणः
सर्वकामदां। कश्यपस्त्रिदशश्रेष्ठाः सार्द्धं पुत्रेर्द्धर्मविशारदैः। सर्वतेजोमयं दिव्यं ब्रह्मर्षिगणसेवितं। ब्राम्ह्या
श्रिया दीप्यमानं विमलं चिंत्यं विगतक्लमं। ब्रह्माणं वीक्ष्य ते सर्वे आसीनं परमासने। जग्मुर्मूर्द्ध्ना भुवि पादौ ब्र
ह्मणस्त दिवौकसः॥ शिरोभिः प्रणता हृष्टं परमेष्ठिनमव्ययं। शिरोभिः स्पृश्य चरणौ तस्य ते परमेष्ठिनः॥ विमु
क्ताः सर्वपापेभ्यः शांता विगतकल्मषाः॥ स दृष्ट्वा तान्सुरान् सर्वान् कश्यपेन सहागतान्। अत्राह ब्रह्मा
महातेजा देवानां प्रभुरीश्वरः॥ ॥इति श्रीहरिवंशे देवानां ब्रह्मलोकगमनं॥ ब्रह्मोवाच॥ यदर्थमिह
संप्राप्ता भवंतः सर्व एव हि प्रजानां प्रभुरव्ययेतदर्थं महाबलाः॥ भविष्यति च वः सोऽर्थः काहतो यः
पुरा त्तमाः। बलेर्हानवमुख्यस्य योऽविजेता भविष्यति। न केवलं सुरारीणामेको जेता स विश्वकृत्। त्रे ५७५
लोक्यस्यापि जेता सौ देवानामपि चोत्तमः। योध्यता सर्वलोकानां विश्वयोनिः सनातनः॥ पूर्वदेवं सद
प्राक् देमगर्भनिदर्शिनं। आत्मा वेयेन विभुवा ततोऽयेजो महात्मना। बलेस्त्वसुरमुख्यस्य त्रेश्च स्पग

गतस्तथा। प्रभवस्मा हि सर्वेषामस्माकमपि सर्वज्ञः। अचिंत्यः सहि विश्वात्मा योगयुक्तः परंतपः। तं देवाश्च
महात्मानं न विदुः कोऽप्यसौ विति। वेदात्मानं च विश्वं च स देवः पुरुषोत्तमः। तस्यैव तु प्रसादेन प्रवेक्ष्यथ प
रमां गतिं। यत्र योगं समास्थाय न तत्रश्वरति शुश्रुवां। क्षीरोदस्योत्तरे कूले। उदीच्यां दिशि देवताः॥ अमृतं नाम
परमं स्थानमाकुर्म्मनीषिणः। भवंतस्तत्र वै गत्वा तपसा संशितव्रताः॥ अमृतं स्थानमासाद्य तपश्चरत दुष्क
रं। ततः श्रोष्यथ संघुष्टं स्निग्धगंभीरनिःस्वनं। जलांते तोयसंपृक्तं स्पुतां यदस्यसमस्वनां॥ दिव्यां स्पष्टाक्षरपदां
दिव्यां मनयदां शिवां। वाणी परमसंस्कारां वरदां ब्रह्मवादिनीं। दिव्यां सरस्वतीं सत्यां सर्वकिल्विषनाशि
नीं। सर्वदेवाधिदेवस्य भावितात्मनः। तस्य व्रतसमाप्तौ तु योगव्रत विसर्जिते। अमोघस्य तु देवस्य
विश्वरूपं महात्मनः। स्वागतं वः सुरश्रेष्ठा मत्सकाशं व्यवस्थिताः। कस्य कं वा वरं देवा ददामि वरदः स्थितः। तं
कश्यपोऽदितिश्चैव गृह्णीयातां वरं ततः। प्रणम्य शिरसा पादौ तस्मै योगात्मने नमः। भगवानेव नः पुत्रो भ
वती ति न संशयः। उक्तश्च परया भक्त्या तथास्त्विति स वक्ष्यति। देवा भ्रुवं ते सर्वे भ्रातानस्त्वं भवंति च। तथा
स्त्विति च सः श्रीमान् वक्ष्यते सर्वलोककृत्। तस्मादेवं गृहीत्वा तु वरं दैवत्रासत्तमाः। कृतत्वरां पुनः सर्वे गच्छ

ध्वंसं स्वमालयं॥ ॥वैशंपायन उवाच॥ तथा स्थिति सुराः सर्वे कश्यपो दितिरेव च। ब्रह्मणो वंद्य कारणे गताः शौम्यं
दिसं प्रति। ते विरत्नो वसंधामाः क्षीरोदस्योत्तरं तटं। यथोद्दिष्टं भगवता ब्रह्मणा ब्रह्मवादिना। ते ऽतीत्य सागरान्स
र्वान्पर्वतांश्च सकाननान्। नदीश्च विविधा दिव्याः पृथिव्यां सुरसत्तमाः। अपश्यंस्ते सुघोरां वै सर्वसत्वविवर्जि
तां। अभास्करां अमर्यादां तमसा संवृतां दिशां। अमृतं स्थानमासाद्य कश्यपेन सुराः सह। दीक्षिताः कामदं दि
व्यं व्रतं वर्षसहस्रिकं॥ प्रसादार्थं सुरेशाय तस्मै योगाय धीमते। नारायणाय देवाय सहस्राक्षाय भूतये। ब्र
ह्मचर्येण मौनेन स्थानवीरासनेन च। क्रमेण च सुराः सर्वे तप उग्रं समास्थिता॥ कश्यपस्तत्र भगवान्प्रसादा
र्थं महात्मनः। उदीरयत्त वेदोक्तं यमाहुः परमं स्तवं॥ ॥इति श्रीहरिवंशे वामने॥ कश्यप उवाच॥ नमोस्तु दे
व देवेश एकशृंग वराह हे पार्थिव वृषाकपे सुरवृष सुरनिर्मित॥ अनिर्मित तनुं कपिल विष्वक्सेन ध्रुव धर्म
राज वैकुंठ सत्ता वर्त अनादिमध्यनिधन। धनंजय शुचिश्रव पृश्निज हदलिज अजेय अमृतेशाये सनातन वि
धानः त्रिधाम। त्रिककुद दुंदुभे महानाभ। लोकनाभ पद्मनाभ विचित्र वरिष्ठ वक्ररूप असय्य हय ४७५
कालहंस हलहव्यभुज। खंडपरशो शुक्र मुंजकेश हंस महाहंस। महस्वालः सहस्रवेत्र मरुद हरहषीके

त्र्या। अश्वस्म परमयज्ञ। उराषाढ विश्वमूर्ते सुराध्यज्ञानीज निस्सम विराज तपः सत्यधाम सर्वलोकपति
ष्ठाभि पिपासुत प्रभु अग्रज अग्र्य धर्मज गभस्तिनाभ धर्मनेमे। सत्वधाम सत्याक्षर गभस्तिनेमे विपाप्मन्॥
चक्ररथ त्वमेव समुद्रवास अजैकपाद। सहस्रशीर्ष सहस्रदृक् सहस्रपाद। अधोमुख महामुख म
हापुरुष पुरुषोत्तम। सहस्रबाहो सहस्रमूर्ते। सहस्रास्य सहस्राक्ष। सहस्रभुज सहस्रभव। सहस्रसं
माहुर्वेदाः। विश्वदेव विश्ववेधस विश्वंभर विश्वसंभव। सर्वेषामेव देवानां। सोमग आदो गति॥ विश्वः
त्वमप्यायनः। विश्वं त्वामाहुः। पुष्पहास। परम परमस्त्वमसि त्वमेव। वौषट्। ओंकार वषट्कार। त्वामेक
माहुरग्र्यं तत्र नागपाशिने। शतधार सहस्रधार। स्वयंभूत भुवन। स्वधा त्वमेव। ब्रह्मादिस्त्वमेव। त्वमेव
द्यौरसि पृथिव्यासि प्राणोसि मातरिश्वासि धर्मोसि। होता हंता नेता मंत्रा होम्य होता परमस्त्वं। होम्यस्त्व
मेव। अग्र्योसि विश्वधामासि। परं परमेण धाम्ना। त्वमेव दिग्भ्यः सुभ्रांड दन्योसि। सूर्योसि स्तोसि॥
दीक्षासि दक्षिणासि। विश्वमसि। स्थविष्ठ स्थविर विश्व उराषाढ। हिरण्यगर्भ हिरण्यनाभ नारायण
तरायणामयन। आदित्यवर्ण आदित्यतेजः। आदित्यदेव आदिदेव। पद्मनाभ पद्मनेत्राय पद्माक्ष

अगर्भो हिरण्यगर्भकेत्वा अष्टुत्वा। विश्वेदेव। विश्वतोमुख। विश्ववाहो। विश्वसंभव। विश्वमनुक्रमेव। नत्रिक्रम
त्रि। वक्रम। सुविक्रमक्रमाक्रम। विष्णुः प्रभाकर। शंभुः स्वयंभूः। भव भूतादिर्महात्मा। विश्वभूत विश्व
भूत। विश्वकर्म्मा च। विश्वगोप्तासि। विश्वरूप। पवित्रमसि। होत्रमसि। वेदोऽसि हविर्विशारद। हविः
कर्म्म। अमृतेधन। अमृतत्वमसि। दिवस्पते। ऋतधामभृताचिंः। अग्रयो हता। सुरासुरगुरो। महादेव
ऊर्द्ध्वकर्म्मन्। अमृतेधन। दिवस्पृक्। विश्वपते। धृताव्यसिद्ध्न। अनंतकर्म्मन्। प्राग्वंशः स्ववंश। विश्वपश्
मे वा विभर्षि वरार्थिनोनस्वायस्वेति॥ ॥इति श्रीहरिवंशे वामने कश्यपस्तव॥ वैशंपायन उवाच॥
नारायणस्तु भगवानश्रुत्वैवं परमं स्तवं। ब्रह्मज्ञेन द्विजेंद्रेण कश्यपेन समीरितं। स्निग्धगंभीरनिर्घोषं
जीमूतस्वननिःस्वनं। मनसा प्रीतियुक्तेन विबुधानां महात्मनां। उवाच वचनं सम्यक् हृष्टपुष्टपदा
क्षरं। आकाशात्तु स्वरूपस्तु देवादर्शनेनोपलस्यते। श्रीमान् प्रीतमना देवः प्रोवाच प्रभुरीश्वरः॥ ॥वि
ष्णुरुवाच॥ प्रीतोऽस्मि वः सुरश्रेष्ठाः सर्वे मत्तो ति निश्च... देव... सुरोत्तमाः॥ ॥क ४७६
श्यप उवाच॥ यदेव भगवान् प्रीतः सर्वेषाममरोत्तमाः। त... स्मः सर्वे हि नः परमा गतिः। य=

दि प्रसन्नो भगवान् दातव्यो वा वरो यदि। वासवस्यानुजो... नंदवर्द्धनः। अदित्या वै प्रमथी
मा भगवानस्तु वैसुतः॥ ॥वैशंपायन उवाच॥ अदितिर्देवमाता च एनमेवार्थमुत्तमं। पुत्रार्थे वरदं प्रा
ह भगवंतं वरार्थिनी। निश्रेयसार्थं सर्वेषां देवानां हितमहात्मनो। याचते पुत्रकामा वै भगवान् पुत्रो भ
व त्विति॥ ॥देवा ऊचुः॥ भ्राता भ्राता च भर्त्ता च त्राणं वै भव स्वनः। आदित्याः पुत्रतां याते त्वयि देवाः स
वासवाः। देवत्वं हि वदिष्यंति कश्यपस्यात्मजो भव॥ ॥वैशंपायन उवाच॥ ततस्तानब्रवीद्विष्णुर्देवान्कश्य
पमेव च। एवं भवतु भद्रं वो यथेष्टं कामम च वः। सर्वेषामेव युष्माकं ये भविष्यंति शत्रवः। मुहूर्त्तमपि ते सर्वे
न स्थास्यंति ममाग्रतः। हत्वासुरगणान् सर्वान् येचान्ये देवसत्रवः। करिष्ये देवताः सर्वा यज्ञभागाग्रभोजनाः
हव्यादींश्च सुरान्सर्वान् कव्यादांश्च पितॄनपि। करिष्ये विभो धर्म्मेषाः पारमेष्ठेन कर्म्मणा। यथागतेन मार्गे
ण निवर्त्तध्वं सुरोत्तमाः। देवमात्रुस्तथा दित्या कश्यपस्य पिता त्मनः। यथा मनीषितं कर्त्ता। लब्धसंस्मा
लरः ॥वैशंपायन उवाच॥ एवमुक्ते तु वचने विष्णुना प्रभविष्णुना। देवाः प्रहृष्टमनसः पूजयंति स्म श
श्वरं। विश्वेदेवा महात्मानः कश्यपो दितिरेव च। साध्या मरुद्गणाश्चैव शक्रश्चैव महाबलः। नमस्कृत्य

सुरेशाय।तस्मैदेवायवरंदत्त्वाप्रयाता।प्रादिशंपुण्यंविपुलंकश्यपाश्रमं।गत्वातमाश्रमंतत्रब्रह्मर्षिगणसेवि
तं।चेरुःस्वाध्यायनिरता।आदित्यागर्भमीप्सवः।अदितिर्देवमाताचगर्भंदधेतितेजसं।मत्वात्मानंम
हात्मानंदिव्यंवर्षसहस्रिकं।पूर्णेवर्षसहस्रेपुप्रसूता।गर्भमुत्तमं।सुराणांशरणंदेवमसुराणांविनाश
नं।गर्भस्थेनतुदेवेनपरित्राताःसदासुराः।आददानेनतेजांसित्रैलोक्यस्यमहात्मना।तस्मिन्जातेतुदे
वेशेत्रैलोक्यस्यसुखावहे।जयदेदैत्यसंघानांसुराणांनंदिवर्द्धने॥ ॥इतिहरिवंशेवामनप्रसूतिः
वैशंपायनउवाच॥प्रजानांपतयःसर्वेसप्तसप्तचैवमहर्षयः।तस्यदेवस्यजातायनमस्कारंप्रचक्रिरे।ना
रदोद्भवःकश्यपोगौतमश्चविश्वामित्रोजमदग्निर्वसिष्ठः।यश्चादितोनास्करेसंप्रनष्टेसोप्यत्रात्रिर्भग ५११
वानाजगाम।मारीचिरंगिराश्चैवपुलस्त्यःपुलहःक्रतुः।दक्षःप्रजापतिश्चैवनमस्कारंप्रचक्रिरे।
ऊर्वोवसिष्ठपुत्रश्चस्तवःकाश्यपएवच।कपीवान्कपिवांश्चैवदत्तोविश्ववनस्तथा।वसिष्ठपुत्राःसप्त
सप्तासिष्ठाइतिविश्रुताः॥हिरण्यगर्भस्यसुताऊर्जोजाताःसुतेजसः।गार्ग्यःप्रभुःस्तथैवान्यःजन्यश्चवाम
नएवच।देवाबाहुर्यदुध्रश्चपर्जन्यश्चैवसोमकः।हिरण्यरोमावेदशिराःसत्यनेत्रस्तथैवच।विश्वातिवि

त्रवश्चवनाःसुधामाविरजास्तथा।अतिनामामहर्षिश्चनमस्कारमकुर्वत।उद्योतमानावपुषामहर्षीस्तरणप्र
षिताः।उपान्त्यत्त्वदेवेशंविलुप्तसंवराः।ततोगंधर्वदत्तेषुप्रणदत्सुविहायसि।वक्रानिःसहगंधर्वैःप्राग
यतचतंबुरुः।महाश्रुतिश्चत्रिशिराःकृष्णायुर्नंसुपस्तथा।गोमायुःसूर्यवर्चाश्चसोमवर्चाश्चसप्तमः।युगप
स्तृणपकाक्षिर्नंदिश्चचित्ररथस्तथा।त्रयोदशःशालिशिराःपर्जन्यश्चचतुर्दशः।कलिःपंचदशश्चात्रनार
दश्चैवषोडशः।हाहाहूहुश्चगंधर्वौहंसश्चैवमहाद्युतिः।सर्वेतेदेवगंधर्वाउपागायंतिकेशवं।तथैवाप्सरसो
हृष्टाःसर्वालंकारभूषिताः।वपुष्मत्यःसुजघनाःसर्वांगशुभदर्शनाः।ननृतुश्चमहानागाःप्रगुणाथतलोच
ना।सुमध्याचारुमध्याचप्रियमुख्यावरानना।अनूकायतथामासीमिश्रकेशीअलंबुषा।मरीचिःशुचि
काचैवविद्युत्पर्णातिलोत्तमा।अद्रिकालक्ष्मणाचैवरंभातद्वन्मनोरमा।असिताचसुबाहुश्चसुप्रियाक्ष
मगातथा।उर्वशीचित्रलेखाचसुग्रीवाचसुलोचना।पुंडरीकासुगंधाचसुरथाचप्रमाथिनी।नंदाशारद्व
तीचैवतथान्याःसत्रसंघशः।मेनकासहजन्याचपर्णिकापुंजिकस्थला।एताश्चाप्सरसश्चान्याःप्रनृत्यंति
महत्सवः।धाताऽर्यमाचमित्रश्चवरुणोंऽशोभगस्तथा।इंद्रःपूषाविवस्वांश्चत्वष्टाचसवितातथा।कथितोवि

स्तुरिर्विचक्रा श्यपेयेगणास्तथा॥ इत्येते द्वादशादित्या ज्वलंतो वह्निवर्चसः। वव्रंदुस्तस्य सुरेंद्रस्य नमस्कारं महात्मनः
मृगव्याधश्च सर्पश्च निर्ऋतिश्च महात्मनः। अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः। हरो रथेश्वरश्चैव कपाली
च विशांपते स्थाणुर्भवश्च भगवान् रुद्रास्तत्रावतस्थिरे। अश्विनौ च वसवश्चाष्टौ मरुतश्च महाबलाः॥ विश्वेदेवाश्च
साध्याश्च तस्य प्रांजलयः स्थिताः। शेषाद्याश्च महानागा वासुकिप्रमुखास्तथा। कच्छपश्चापहस्तोऽथ तक्षकश्च महा
बलः। अधृष्टास्तेजसा युक्ता महाक्रोधा महाबलाः॥ एते नागा महात्मानस्तस्य प्रांजलयः स्थिताः। तार्क्ष्यश्चारिष्ट
नेमिश्च गरुडश्च महाबलः। अरुणश्चारुणिश्चैव वैनतेया उपस्थिताः॥ पितामहश्च भगवान् स्वयमागम्य लोक
लोकं प्राह देवगुरुः श्रीमान् सह सर्वैर्महात्मभिः॥ ॥ब्रह्मोवाच॥ यस्मात्प्रसूयते लोकः प्रभविष्णुः सनातनः।
यस्माल्लोके त्ववरः श्रीमान् विष्णुरेव भव त्वयं। एवमुक्त्वा तु भगवान् सार्द्धं देवर्षिभिः प्रभुः। नमस्कृत्य सुरेशाय ज ५७८
गाम त्रिदिवं पुनः। सत्त्रयातः सुरेशानः कश्यपः श्यपात्मजः प्रभुः। नमश्चक्रे हरिं नमेश्च नारक्षा शोभमाना स्तुतिः श्री
वत्सेनोरसि श्रीमान् रराम राजिबिराजितः। उत्फुल्ललोचनाः सर्वाः पश्यंत्यप्सरसस्तदा। दिवि सूर्यसहस्रस्य यत्र
वेद्युगपत्तु स्थिता। यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः। सुरर्षिप्रतिमः श्रीमान् जलेंबो न्हेंत भावनः। श्र

विरोमा महोरस्कः सर्वतेजोमयः प्रभुः। योगतिः पुन्यशीलानामगतिः पापकर्मणां। योगयुक्ता महात्मानो यं
विदुर्योगमुत्तमं। यस्याष्टगुणमैश्वर्यं यमाहुर्देवसत्तमं। यं प्राप्य शाश्वतं विप्रा नियता मोक्षकांक्षिणः। ज
न्मनो मरणाद्येव मुच्यंते भवभीरवः। यदेतत्तं प्रकृत्याख्यः सर्वाश्रमनिवासिनः। सेवंते यं जिताहारा ह्युश्चिरे
व्रतमास्थिताः। योऽनंत इति नागेषु सेव्यते सर्वभोगिभिः। सहस्रमूर्द्धा रूढः शेषादिभिरनुत्तमैः। यो यज्ञ इ
ति विप्रेंद्रैरिज्यते स्वर्गलिप्सुभिः। नानास्थानगतिः श्रीमानेकः कविरनुत्तमः। येदे वगांतिवेत्तारं यज्ञभाग
प्रदायिनं। हषाकं चंड सूर्याह्लं देवमाकाशविग्रहं। सनुवाच सुरान् सर्वान् वाचा वै परया विभुः। आनन्द
निमहातेजा गतो योगेन बालतां। किंकरोमि सुरश्रेष्ठाः कं वरं च ददामि वः। यत्कांक्षितं वः सर्वेषां तद्ब्रूत
मुदायुताः। तस्य तद्वचनं श्रुत्वा वामनस्य महात्मनः। सर्वे ते हृष्टमनसो देवाः कश्यपनंदनं। ऊचुः प्राजल
यो विष्णुं सुराः शक्रपुरोगमाः। ब्रह्मणो वरदानेन हतं नो निखिलं जगत्। तपसा महता चैव विक्रमेण दम
नेच। बलिना दैत्यमुख्येन सर्वज्ञेन महात्मना। अवध्यः किल सोऽस्माकं सर्वेषां देवसत्तमाः। भगवान्प्र
भवते तस्य नान्यः कश्चन सुव्रत। तत्त्वपद्यामहे सर्वे भवंतं शरणार्थिनः। शरण्यं वरदं देवं सर्वदैवतनं। वनेऽ

षीणां च हितार्थाय लोकानां वसुरेश्वर। प्रियार्थं च तथादित्याः कश्यपस्य तथैव च। कर्तव्यं पितृणा मुवितं
सुराणां हव्यमुत्तमं प्रवर्त्ततां महावाहो यथा पूर्वं सुरोत्तम। आनृत्यार्थं सुरेशस्य वासवस्य महात्मनः। प्र
त्यानय महेंद्रस्य त्रैलोक्यमिदमव्ययं। क्रतुना वाजिमेधेन यजते सहि दानवः। यत्प्रत्यानयने युक्तं लोका
नां तद्धि चिंतय॥ ॥इति श्री खिलेषु हरिवंशे यज्ञविध्वंसनारंभः॥ वैशंपायन उवाच॥ एवमुक्तस्तदादि
वैर्विष्णुर्वामनरूपधृक्। प्रहर्षयन्नुवाचाथ सर्वान्देवानिदं वचः॥ ॥विष्णुरुवाच॥ तस्य यज्ञस्य काश्य
मो महर्षिर्वेदपारगः। बृहस्पतिर्महातेजा नयत्वंगिरसः सुतः। तस्याहं समनुप्राप्तो यज्ञवाटं सुरोत्तमाः॥
विचरिष्ये यथा युक्तं त्रैलोक्यरक्षणाय वै॥ ॥वैशंपायन उवाच॥ ततो बृहस्पतिः श्रीमान्ननयद्वामनं प्र
भुं यज्ञवाटं महातेजा दानवेंद्रस्य धीमतः। मौंजी यज्ञोपवीती च छत्री दंडी तथाजिनी। वामनो धर्मरक्ष
णो भगवान्बालरूपधृक्। लोकेश्वरेश्वरः श्रीमान्सुरैर्ब्रह्मपुरोगमैः। अर्च्यमानो भगवानहद्वाप्य ४७९
थ हृद्वदानवाधिपतेस्तस्य वलेर्वैरोचनस्य च। यज्ञवाटं मचिंत्यात्मा जगाम सुरसत्तमः। पालितेपि
हि दैत्यैर्यैः सांग्रामिकपरिच्छदैः। हवे दानवसंबाधे महसे च विविधैर्महत्सु विप्रैश्च वेदमंत्राद्यैः सर्वतः परिव

रितं दैत्यदानवराजेंद्रमुपतस्थे बलिं बली। तेन वा यज्ञवाटं तु ब्रह्मर्षिगणसंकुलं। आत्मानं चैव भगवान्व
र्णयामास तं क्रतुं। वर्णयित्वा यथा न्यायं यज्ञं यज्ञः सनातनः। विराणमर श्रेष्ठः प्रयोगैर्विविधैस्तथा। शुक्राद्दी
नृत्विग्यश्चापि यज्ञकर्मविचक्षणः। सर्वानेव विनिर्जित्य हृच्चकार स निरुत्तरान्। आराधितवलेस्तस्य कृ
विज्ञामनितस्तथा। यज्ञमात्मानमेवासौ हेतुभिः कारणैर्विभुः। वेदिकैः प्रकाशैश्च पुनरप्यथ नारता प्र
त्यक्षमृषिसंघानां वर्णयामास चित्रगुः। ततो निरुत्तरान्दृष्ट्वा सोपाध्यायानृषीन्क्रतून्। अदृष्टेनापि दृष्ट्वा
सान्त्वा मनेन महौजसा। अक्षते चापि मेने स विरोचनिसुतो बलिः। मत्वाश्चार्यं ततश्चेदमब्रवीद्विस्मि
तो वचः। कुतस्त्वं कोऽसि कस्यासि किं चेहासि प्रयोजनं। नैवं विधि परिज्ञानो दृष्टपूर्वो मया द्विजः। बाल्ये
मतिमतां श्रेष्ठो ज्ञानविज्ञानकोविदः। स्पष्टवाग्रूपसंपन्नो मेनाज्ञः प्रियदर्शनः। नेदृशाः संति देवानामृ
षीणामपि सूनवः। नागानां न यक्षाणां नासुराणां न रक्षसां। न पितॄणां न सिद्धानां गंधर्वाणां तथैव च।
योऽसि सोऽसि नमस्तेऽस्तु ब्रूहि किं करवाणि ते। उक्त एवमचिंत्यात्मा बलिना वामनस्तदा। प्रोवाचो
पायतत्त्वज्ञः स्मितपूर्वमिदं वचः॥ ॥विष्णुरुवाच॥ अहो यज्ञोऽसुरेशस्य वक्तुं न शक्तः संस्तुतः। पिताम

हरेश्च पुरा यजतः परमेष्ठिनः। सुरेशस्य चक्राकस्य यमस्य वरुणस्य च। विशेषितस्त्वया यज्ञो दानवेन्द्र महा
बल। यजता वाजिमेधेन क्रतूनां प्रवरेण तु। सर्वपापविनाशाय स्वर्गमार्गप्रदर्शिना॥ सर्वकाममयो ध
षसंमतो ब्रह्मवादिनां। क्रतूनां प्रवरः श्रीमानश्वमेध इति श्रुतः। सुवर्णशृंगो हि महानुभावो वेदीखु
रो वायुजवो महास्यः। सत्यलक्षणः कांचनवर्णगौरः शुचिस्त्वयानिः परमोऽतिमेध्यः। आस्थाय वै वाजिनम
श्वमेधमिष्ट्वा नरा दुष्कृतमुत्तरंति। आत्मस्वयं वेदविदो द्विजेन्द्रा वैश्वानरं वाजिनमश्वमेधे। यथाश्रमा
प्रवरो गृहाश्रमो यथा नराणां प्रवरा द्विजातयः। यथा सुराणां प्रवरो नवानि ह तथा क्रतूनां प्रवरोऽश्वमे
धः॥ ॥वैशंपायन उवाच॥ एतच्छ्रुत्वा तु दैत्येन्द्रो वामनेन समीरितं। मुदा परमया युक्तः प्राह दैत्यपतिर्बलिः
॥ ॥बलिरुवाच॥ कस्यासि ब्राह्मणश्रेष्ठ किमिच्छसि ददामि ते। वरं वरय नन्दं ते यथेष्टं कामया ब्रूहि॥ ५८०
वामन उवाच॥ न राज्यं न च वस्त्राणि न रत्नानि न च स्त्रियः। कामये यदि तुष्टोऽसि धर्मे च यदि वर्तसे मतिः। गुर्वे
र्थं मे प्रयच्छ त्वं पदानि त्रीणि दानव। त्वमग्निशरणार्थायः एष मे वरो वरः॥ ॥बलिरुवाच॥ त्रिभिः किं तव
विप्रेन्द्र पदैर्दैत्य वदतां वर। शतं शतसहस्राणां पदानां मार्गतां न बाल॥ ॥शुक्र उवाच॥ मा ददस्व महाबाहो

न त्वं वेत्सि महासुर। एष मायाप्रतिच्छन्नो भगवान्प्रवरो हरिः। वामनं रूपमास्थाय त्रैलोक्यप्रियहितेच्छया॥
त्वां वंचयितुमायातो वटुरूपधरो विभुः॥ ॥वैशंपायन उवाच॥ एवमुक्तस्तु शुक्रेण विरसं चिंत्य वै ब
लिः। प्रहर्षेण समायुक्तः किमतः पात्रमिष्यते। गृहहस्तेन संक्रांतो नं गारं कनकोज्वलं॥ ॥बलिरुवाच॥
विप्रेन्द्र प्राङ्मुखस्तिष्ठ स्थितोऽस्मि कमले क्षणं प्रतीच्छ देहि किं त्वमिं कामात्रानोः पदत्रयं दत्तं वः पात
यजले नैव मिथ्या भवेद्गुरुः॥ ॥शुक्र उवाच॥ नानदेयं कृतो दैत्य विज्ञानोऽयं मयाकृतं। कोऽयं विष्णुर
देः प्रीतिर्वे वितस्त्वं न वै वित्तः। कथं नारायणो विष्णुर्यज्ञे स्वयमुपाश्रितः। दास्यामि देवदेवाय यद्य
दिं छत्यं विभुः। को वान्यः पात्रभूतोऽस्य विष्णोः परतरं न वेद्म्य। एवमुक्त्वा बलिः शीघ्रं पातयामास वै ज
लं॥ ॥वामन उवाच॥ पदानि त्रीणि दैत्येन्द्र पर्याप्तानि मम मानद। यन्मयाहं मुक्तं हि तत्तथा नत
दन्यथा॥ ॥वैशंपायन उवाच॥ इत्येतद्वचनं श्रुत्वा वामनस्य महौजसः। लब्धाजिनो हरीयेमलब्धा
वैरोचनिस्तदा। एवमस्त्विति दैत्येशो वाक्यमुक्त्वा रिपुसूदनः। ततो वारिसमाहार्ये गंभीरे सपरामृष्य
ने वामनो ह्यसुरेन्द्रस्य विक्रीडत्स्कंदनं महत्। क्षिप्रं प्रकारयामास दैत्येन्द्रलयकरं करं। प्राङ्मुखश्चापि

दत्त्वैशास्मस्मैसुमनसाजलं।दातृकामःकरेयावत्तावत्तंप्रत्यषेधयत्।तस्यतद्रूपमालोक्यअचिंत्यस्या
मितौजसः।अनंतरंसर्वदेवहरेर्जिहीर्षोःश्रियमासुरीं।इंगितज्ञोऽयतःछित्त्वाप्रह्लादस्त्वब्रवीद्वचः
प्रह्लादउवाच॥ ॥माददस्वजलंह्येतवटोर्वामनरूपिणः।सत्यंसौर्येणतेसर्वंनिहतःप्रपितामहः
विष्णुरेषमहाप्राज्ञस्त्वांवंचयितुमागतः॥ ॥बलिरुवाच॥हंतस्मैप्रदास्यामिदेवायमप्रतिग्रहं
नेनविप्रगिरिश्चमन्येतेदृशोनवतिहिद्विजः।रूपेणातेनदैत्येंद्रसत्यमेतद्ब्रवीमिते।ननरंतमहंमन्ये
तमेवपुनरागतं।अनुग्रहकरंदेवमीदृशंतुकृतःप्रभो।ब्रह्मणोऽपिगरीयांसंपात्रंलप्स्याम
हेवयं।अवश्यंचासुरश्रेष्ठदातव्यंदीक्षितेनवै।इत्युक्त्वासुरसंघानांमध्येवैरोचनिस्तदा।देवाय
प्रददौतस्मैपदानित्रीणिविष्णवे॥ ॥प्रह्लादउवाच॥दानवेश्वरमादास्त्वंविप्रायास्मैप्रतिग्र
हं।एवमुक्तिस्तदातेनप्रह्लादेनामितौजसा।प्रह्लादमब्रवीद्वाक्यमिदंनिर्नेत्रमन्निव॥ ॥बलिरु ४८१
वाच॥देहीतियाचतेयोहिप्रत्याख्यातिचयोऽसुर।उभयोरप्यलक्ष्म्यावेनागच्छेविशतेनरः।प्र
तिज्ञायतुयोविप्रेनददातिप्रतिग्रहं।सयातिनरकंपापीमित्रगोत्रसमन्वितः।अलक्ष्मीनष्ट

भीतोऽहंददाम्यस्मैवसुंधरां।प्रतिगृहीताचाप्यन्यःकश्चित्समोद्विजोऽथवैनाधिकोविद्यतेयस्मा
त्ददामिवसुंधरां।हृदयस्यचमेतुष्टिःपराभवतिदानवा।दृष्ट्वावामनरूपेणयाचितंमुनिपुंगवं।एव
तस्मात्प्रसादास्यामिनस्थास्यामिनिवारितः।इत्युक्त्वाप्रब्रवीदेनंवामनंबटुरूपिणं।स्वल्पःस्वल्पम
तेकिंतेपदैस्त्रिभिरनुत्तमे।लक्ष्मींददामितेविप्रपृथिवींसागरैर्वृतां॥ ॥वामनउवाच॥नष्टध्वीको
ट्येलक्ष्मींसंतुष्टोस्मिपदैस्त्रिभिः।एषएवकृतार्थोमेवरोदानवसत्तम॥ ॥वैशंपायनउवाच॥
तथास्त्वितिबलिःप्राच्यस्यदर्शयामासदानवः।पदानित्रीणिदेवायविष्णवेऽमितोतेजसा।तोयेत्र
पतितेहस्तेवामनोऽरूद्वामनः।सर्वदेवमयंरूपंदर्शयामासवैविभुः।भूःपादौद्यौःशिरश्चास्यचं
द्रादित्यौचचक्षुषी।पादांगुल्यःपिशाचाश्चहस्तांगुल्यश्चगुह्यकाः।विश्वेदेवाश्चजानुस्थाजंघेसा
ध्याःसुरोत्तमाः।यक्षानखेषुसंभूताःलेखाश्चाप्सरसस्तथा।विद्युतोविपुलादृष्टिःकेशाःसूर्यांशवःस्म
श्रूणि।तारकारोमकूपानिरोमाणिचमहर्षयः।बाहवोविदिशस्तस्यदिशःश्रोत्रेतथैवच।अश्विनौ।

श्रवणौ चास्य नासा वायुर्महाबलः ॥ प्रसादश्चंद्रमाश्चैव मनो धर्मस्तथैव च ॥ सत्यमस्या नद्वाणी जिह्वा देवी
सरस्वती ॥ ग्रीवादितिर्महादेवी तालुः सूर्यश्च दीप्तिमान् ॥ द्वारं स्वर्गस्य नाभिर्वै मित्रस्त्वष्टा च वै भ्रुवौ ॥
मुखं वैश्वानरश्चास्य वृषणौ तु प्रजापतिः ॥ हृदयं भगवान् ब्रह्मा पुंस्त्वं वै कश्यपो मुनिः ॥ पृष्ठोऽस्य वस
वो देवा मरुतः सर्वसंधिषु ॥ सर्वच्छंदांसि दशना ज्योतींषि विमलाः प्रभाः ॥ उरो रुद्रो महादेवो धैर्यं चा
स्य महार्णवः ॥ उदरं चास्य गंधर्वा भुजंगाश्च महाबलाः ॥ लक्ष्मीर्मेधा धृतिः कांतिः सर्वा विद्याश्च दैक
टिः ॥ ललाटमस्य परमं यत्स्थानं परमात्मनः ॥ सर्वज्योतींषि यानीह तपः शक्रः स्कंद देवराट् ॥ तस्य देवा-
तिर्देवस्य तेजो याङ्क महात्मनः ॥ स्तनौ कक्षौ च वेदाश्च उष्ठौ चास्य महात्मनः ॥ रुद्रहयाः पश्चु वंक्षश्च ह्नि
नो वेष्टितानि वा तस्य देवमयं रूपं दृष्ट्वा विष्णोर्महात्मनः ॥ उपसर्पत संकुद्धाः पतंगा इव पावकं ॥ ॥
इति हरिवंशे वामने विश्वरूपप्रकाशनं ॥ वैशंपायन उवाच ॥ शृणु नामानि सर्वेषां रूपाण्यपि ५८२
जनानि चा आयुधानि मुख्यानि दानवानां महात्मनां ॥ विप्रचित्तिः शिबिः शंकुरयःशंकुस्तथैव च

अयःशिरा अश्वशिरा हयग्रीवश्च वीर्यवान् ॥ वेगवान् केतुमांश्चोग्रः सोऽग्रव्यग्रो महासुरः ॥ पुष्करः पु
ष्कलश्चैव शाखोऽश्वपतिरेव च ॥ प्रह्लादोऽश्वशिराः कुंभः संह्रादो गगनप्रियः ॥ अनुह्रादो हरिह
रो वराहः संहरो रुजः ॥ वृषपर्वा विरूपाक्षो मुनीन्द्रश्चंद्रलोचनः ॥ निप्रभः सुप्रभः श्रीमांस्तथैव च नि
रूदरः ॥ एकचक्रो महाचक्रो द्विचक्रः कैलाससन्निभः ॥ हरकीर्तिर्महाजिह्वः शंकुकर्णो महाध
निः ॥ दीर्घजिह्वोऽर्कवदनो मृदुचापो मृदुप्रियः ॥ वायुर्गरिष्ठो नमुचिः शंबरो विजयो महान् ॥ चंद्रहं
ता क्रोधहंता क्रोधवर्धन एव च ॥ कालकः कालकोपश्च हंता क्रोधो विमोहनः ॥ यविष्ठश्च हवि
ष्टश्च प्रलंबो नरकः पृथुः ॥ चंद्रतापन वातापी केतुमान् बलदर्पितः ॥ असिलोमा नलोमा च ब
ष्कलः प्रमदो मदः ॥ सृगालवदनः करालः कौशिरेव च ॥ एकाक्षश्चैव राहुश्च उत्कुंडः स्मरस्त
था ॥ एते चान्ये च बहवः क्रममाणं त्रिविक्रमं ॥ उपतस्थुर्महात्मानं विष्णुं दैत्यगणास्तथा ॥ उष्ट्रश
ल्यकवक्त्राश्च रुरुवक्त्राश्च दानवाः ॥ नकुलश्येनवक्त्राश्च पारावतमुखास्तथा ॥ खरोष्ट्रवदनाश्चैव व
राहवक्त्रास्तथा ॥ तिमिमकरवक्त्राश्च शिशुमारमुखास्तथा ॥ महाशनि व्यग्रकरास्तथैव च हनुद्रशा

गदामुसुण्डिहस्ताश्च वज्रहस्तास्तथापरे। असिकंपनहस्ताश्च दानवा युद्धदुर्मदा॥ नानाप्रहरणा घोराना
नावेषा महाबला:॥ कूर्मकुक्कुटवक्त्राश्च हस्तिवक्त्रा॰स्तथापरे। चक्रवाकमुखाश्चैव गोधवक्त्रास्तथा
परे। तथा मृगानना: शूरा: गोजाविमहिषानना:॥ उलूकाश्वमुखाश्चैव व्याघ्रवक्त्रास्तथापरे। गजेन्द्रचर्म
वसनास्तथा कृष्णाजिनांवरा:॥ वीरसंवृतगात्राश्च तथा वल्कलवाससः॥ उष्णीषिणो मुकुटिनस्तथा
कुंडलिनो ऽसुरा:॥ किरीटिनो लंवशिखा: कंवुग्रीवा: सुवर्चस:॥ नानावेषधरा दैत्या नानामाल्यानु
लेपना:॥ स्वान्यायुधानि दीप्तानि प्रगृह्यासुरसत्तमा:॥ क्रममाणं हृषीकेशमुपतिष्ठंति दानवा:॥ प्रम
थ्य सर्वान्दैत्येयान्पादहस्ततलैः प्रभुः। रूपं कृत्वा महाकायं जहारासुरमेदिनी॥ तस्य विक्रमतो भूमिं
चंद्रादित्यौ स्तनांतरे। नभः प्रक्रममाणस्य शक्थिदेशे व्यवस्थितौ। परं प्रक्रममाणस्य जानुदेशे व्यव
स्थितौ॥ विष्णोरतुलवीर्यस्य वदंत्येवं द्विजातय:॥ जित्वा लोकत्रयं कृत्स्नं हत्वा चासुरपुंगवान्द ५८२
दौ शक्राय वसुधां हरिर्लोकनमस्कृत:॥ सुतलं नाम पातालमधस्ताद्वसुधातले। वलेर्दत्तं भगवता
विष्णुना प्रभविष्णुना॥ तद्दत्वा ऽसुरश्रेष्ठस्य कारमत्तिमुत्तमा। रसातलतलावासमकरोदसुराधिप:

तत्रस्थस्य महात्मा तेजाध्यानं परममास्थित:। उवाच वचनं धीमान्विष्णुं लोकनमस्कृतं॥ किं मया देवकर्तव्यं
ब्रूहि सर्वं विशेषत:॥ ॥विष्णुरुवाच॥ ददामि ते महाभाग परितुष्टोस्मि ते सुर:। वरं वरय भद्रं ते यद्यदिष्टं का
ममात्कहि। मा यश्च कस्य वचनं प्रतिहासी कथंचन। अहमाज्ञापयामि त्वां श्रेयस्थैव भवाप्स्यसि। अथ
दैत्याधिपं प्राह विष्णुर्देवाधिपानुजः। वाया परमया देवो वरेण्यः प्रभुरीश्वर:। यत्त्वया शलिलं दत्तं गृही
तं पाणिना मया। तस्मात्ते दैत्यदेवेभ्यो नास्ति जातु भयं क्वचित्। सुतलं नाम पातालं तत्र त्वं सानुगो व
स। सर्वे दैत्यगणैस्सार्द्धं मत्प्रसादान्महासुर। न चैते देवदेवस्य शक्रस्यामिततेजस:। शासनं प्रतिहं
तव्यं स्मर ता शासनं मम। देवताश्चापि ते सर्वा: स्वं पादे वमहासुर। प्राप्स्यसे च महाभाग दिव्यांश्चाप्यन्य
श्चैभिता च्छुद्द वासु च वसुधां विविधांश्च परिच्छदा त्। दैत्याधिपत्यं च पुनर्मत्प्रसादादवाप्स्यसि भो
गांश्च विविधान्सम्यक् यथा श्रेवसद्रह्मिणा न्यदा चैनो मया प्रोक्ता मर्यादां लंघयिष्यसि। वंधिष्यंति
तदा हि त्वां नागा नागैर्महौजस:। नमस्काया शक्तो नित्यं महेंद्राद्या दिवौकस:। मम ज्येष्ठ सुरश्रेष्ठ शासनं
प्रतिगृह्यतां॥ ॥वलिरुवाच॥ देवदेव महाभाग शंखचक्रगदाधर। सुरासुरगुरुश्रेष्ठ सर्वलोकमहेश्वर:

तत्रासितासे पाताले नागेन्द्र हि सुरोत्तमः॥ कथं तत्र मयास्थेयं विबुधानां महेश्वर॥ मम किंचिद्दशग्रीव सा
शनार्थं प्रनविष्यति। तद्वदस्व सुरश्रेष्ठ हृषीकेशेन ममालय॥ ॥श्रीत्रिविक्रम उवाच॥ अग्रोतिर्यं श्राद्ध
मधीतमव्रतं श्रद्दक्षिणं यज्ञमहत्विजाकृतम्॥ अश्रद्धया दत्तमसंस्कृतं द्दविर्नागाः षडेते तव दैत्यस
त्तम पुण्यं महर्षिणां यद्य मद्भक्त हर्षिणा तथा॥ एतच्छुत्वा तु वचनं बलिर्विष्णोर्महात्मनः॥ एवमस्त्विति
तं प्रोक्त्वा पातालमसुरोत्तमः॥ प्रविवेश महानागो देवाज्ञां प्रतिपालयन्॥ ततश्चापि विष्णुस्त्रिदशैः स्तु
तः॥ भगवान् पितृराज्यानां प्रविनागं चकार ह॥ ददौ चैन्द्रीं दिशं शक्रो बोधशक्राय यामिति तेजसे। याम्यां यमाय दे
वाय पितृराज्ये महात्मने॥ पश्चिमां दिशं देवो वरुणाय ददौ प्रभुः॥ उत्तरां चक्र वैराय यक्षाधिपतये
दिशं॥ अधश्चो नागराजाय सोमायोर्द्ध दिशं ददौ॥ एवं विभज्य त्रैलोक्यं विष्णुर्बलवतां वरः॥ वामनः
सर्वलोकेषु प्रतिष्ठाथ सवासवाः जगाम त्रिदिवं देशः पूज्यमानो महर्षिभिः॥ तस्मिन्प्रजाते द्रुहे चैव वाम ४८५
ने भीमतेजसि॥ सर्वे मुमुदिरे देवाः पुरस्कृत्य शतक्रतुं॥ ॥वैशंपायन उवाच॥ गते तु त्रिदिवं लो
के वद्धे वैरोचने बलौ॥ नागे समस्त्रिराशि निश्चकं बलाश्च तराडिभिः॥ नागबंधनबद्धस्य वार्द्ध बलि वैरोचने

ततः यदृच्छयासौ देवर्षिन्नारदः प्रत्यपद्यत॥ स तं लब्धागतं दृष्ट्वा कृपयाभिपरिप्लुतः॥ उवाच दानवश्रेष्ठं मो
क्षोपायं ददामि ते॥ सर्वं देवाधिदेवस्य वासुदेवस्य धीमतः॥ अनादिनिधनस्यास्य ब्रह्मयस्या व्ययस्य
चातमधीष्वाद्य दैत्येन्द्र विश्रुद्धेनान्तरात्मना॥ तन्मतः स्तन्मना नत्वा द्रुतं मोक्षमवाप्स्यसि॥ ततो विरोच
नसुतः प्रयतः प्राञ्जलिः शुचिः॥ मोक्षार्थं विंशकमध्ययो नारदान्समधीतवान्॥ तमधीतं सर्वं दिव्यं नारदे
न समीरितं॥ पृथिवी चाहृता येन तं जजाप महासुरः॥ नमो स्तु नागपतये ब्रह्मण्यायाच महात्मने॥ जलेश
याय देवाय पद्मनाभाय विष्णवे॥ समस्तं सर्वमेव पुरस्कृत्य त्रीलोकाक्रान्तवानसि॥ भगवन्कालकल्पस्त
नष्टवेदार्कपवने हीणयज्ञतपः क्रिये॥ पुनस्त्रिजयसे लोकास्तेन सत्येन मोक्षय॥ एको विद्या महाय
स्त्वं योगी योगमुपागमः॥ पुनस्ते लोकान्कल्पे तेन सत्वेन मोक्षय॥ जलशय्यामुपाशीनो योगनिद्रा
मुपागतः॥ लोकांस्त्रिजयसम्यः तेन सत्वेन मोक्षय॥ वाराहं रूपमास्थाय देवयज्ञपुरस्कृतम्॥ धरा
जले धृता येन तेन सत्येन मोक्षय॥ उद्धृत्य दंष्ट्रया यज्ञास्त्री त्पिंडान्कृतवानसि॥ चं पितृणां पमपि हरते
न सत्येन मोक्षय॥ प्रवृद्धकुक्षुः सुरासर्वे हिरण्याक्षनयाहिताः॥ परित्राता स्त्वया देव तेन सत्येन मोक्षय॥

अजोततेरसानामजातोदेवस्यवैसुतः।श्रुताश्चतेनवेदार्थास्तेनसत्वेनमोस्तुयः।देवयज्ञाग्निहोत्राणिपि
यज्ञंहवींषिचास्यतवदेवस्यतेनसत्येनमोस्तुयः।ऋषिर्दीर्घतमानामजात्यंधोगुरुशापतः।वत्सासा।
द्यवक्षुष्मांस्तेनसत्येनमोस्तुयः।ग्राहग्रस्तंगजेंद्रंचदीनंमृत्युवशंगतं।नक्रमोक्षितवांस्त्वंहितेनसत्ये
नमोस्तुयः।अदृश्यश्चाप्ययश्चवैब्रह्मण्योनक्रवत्सलः।उच्छ्रितानांनिहंतासितेनसत्येनमोस्तुयः।शंख
चक्रगदाहस्तःशार्ङ्गंगरुडमेवच।प्रसादाद्यामिसिरसातेवंधान्मोक्षयत्वमाम्।शंखचक्रगदाहस्तेशा
र्ङ्गंचगरुडादयः।हरेःप्रसादत्यामासुबलेमोक्षायबंधनात्।ततःप्रसन्नोभगवानादिदेशखगोत्तमम्
गरुडंनागहंतारंबलिमोक्षायबंधनात्।ततोविहस्यगरुडःपक्षावुत्कल्पविक्रमः।जगामवसुधामू
लंयत्रास्तेसंयुतोबलिः।आगमंतस्यविज्ञायनागामुक्त्वामहासुरम्।ययुःपुरीभोगवतीवैनतेयभ
याद्धिताः।मुक्तःसलप्रसादेनविलयानामध्येलयान्।हृष्टाश्रियमुवाचेदंगरुत्मानथदानवम्।। ।।ग ४८५
रुडउवाच।।दानवेंद्रमहावाहोविष्णुस्त्वामब्रवीत्प्रभुः।मुक्तोनिवसपातालेसपुत्रजनवांधवः।इति
स्वयानागरुत्मंगव्रतिमतिदानव।शमयंयदिसिंद्धास्त्वंमद्धातेशतधाव्रजेत्।पक्षीन्द्रवचनंश्रुत्वातदा

नवेन्द्रोब्रवीदिदम्।। ।।बलिरुवाच।।स्थितोस्मिसमयेतस्यअनंतस्यमहात्मनः।जीव्योपायंत्वभगवान्
ममकिंचित्करोतुमः।इहस्थोहंसुखवासीनोपातालेचखगेश्वर।वलेस्तुवचनंश्रुत्वागरुत्मानिदम
ब्रवीत्।। ।।गरुडउवाच।।सर्वमेवलभस्वेनजीव्योपायोमहात्मनः।प्रवर्तयंतियेयज्ञाविधिहीनाद्व
विजाः।प्रायश्चित्तमजानंतोयज्ञभागंततस्तनः।नतेषांयज्ञभागंवैप्रतिगृह्णंतिदेवता।।अनेनाप्यायि
तवलेसुखमत्रनिवत्स्यसि।संदेशमेतद्भगवानदत्तवान्कश्यपात्मजा।दानवेंद्रमहावाहोविष्णु
स्त्रैलोक्यभावनः।। ।।वैशंपायनउवाच।।इमंस्तवमनंतस्यसर्वपापप्रमोचनं।यःपठेद्वनरोभक्त्या
तस्यनश्यतिकिल्विषं।गोहत्यायाःप्रमुच्येतब्रह्मघ्नोब्रह्महत्यया।अपुत्रोलभतेपुत्रंकन्याचैवेप्सि
तंपतिं।लग्नगर्भाप्रमुच्येतगुर्विणीजनयेत्सुतं।येचमोक्षैषिणोयोगिनःसांख्यकापिलाः।स्तवेना
नेनगच्छंतिश्वेतद्वीपमकल्मषाः।सर्वकामप्रदोह्येषस्तवोऽनंतस्यकीर्त्यते।यःपठेत्प्रातरुत्थायशु
चिःप्रयतमानसः।सर्वकामंसमवाप्नोतिमानवानात्रसंशयः।एषवैवामनोनामप्रादुर्भावोमहात्म-
नः

शृणु ते नियते भक्त्या नरः पर्व सुपर्वसु। परान्विजयते राजा यथा विष्णुर्महाबलः। यशो विपुलमाप्नोति वि
पुलं प्राकृते वसु। श्रियो भवति भूतानां सर्वेषां नात्र संशयः। पुत्रांश्च लभते धन्यान्सर्वगुणसमन्वितान्
प्रीयते पत्नतश्चास्य देवदेवो जनार्दनः॥ सर्वकाममयुतश्चैव कृष्णद्वैपायनो ऽब्रवीत्॥ ॥इति श्री खिलेषु
हरिवंशे वामने प्रादुर्भावः समाप्तः॥ जनमेजय उवाच॥ भगवन्केन विधिना श्रोतव्यं भारतं बुधैः। फलं
किं के च देवाश्च पूज्या वै पारणे विह। देयं समाप्ते भगवन्किं च पर्वणि पर्वणि। वाचकः कीदृशश्चात्र
एष व्यास ब्रवीतु मे॥ ॥वैशंपायन उवाच॥ शृणु राजन्विधिमिमं फलं यच्चापि भारतात्। श्रुत्वा भवति रा
जेंद्र यत्त्वं मामनुपृच्छसि। दिवि देवा महीपाल क्रीडार्थमवनीं गताः। कृत्वा कार्यमिदं चैव पुनश्च दि
वमागताः॥ हंत यत्ते प्रवक्ष्यामि तच्छृणुष्व समाहितः। ऋषीणां चैव देवानां संभवं वसुधातले। अत्र
रुद्रास्तथा साध्या विश्वेदेवाश्च शाश्वताः॥ आदित्याश्चाश्विनौ देवौ लोकपाला महर्षयः। गुह्यकाश्च सुगं ४८३
धर्वा नागा विद्याधरास्तथा॥ सिद्धा धर्मः स्वयंभूश्च मुनिः कात्यायनो वरः॥ गिरयः सागरा नद्यस्तथैवाप्स

रसां गणाः॥ ग्रहाः संवत्सराश्चैव अयनान्यृतवस्तथा॥ स्थावरं जंगमं चैव जगत्सर्वं सुरासुरं। भारते भरतश्रेष्ठ
कृत्स्नमिह दृश्यते। तेषां सर्वं स्वर्गप्रतिष्ठानं नाम कर्मानुकीर्तनात्। कृत्वा ऽपि पातकं घोरं सद्यो मुच्येत मा
नवः॥ इतिहासमिमं श्रुत्वा यथावदनुपूर्वशः। संयतात्मा शुचिर्भूत्वा पारं गत्वा च भारते। तेषां श्राद्धानि दे
यानि श्रुत्वा भारत भारतं। ब्राह्मणेभ्यो यथाशक्त्या भक्त्या च भरतर्षभ। महादानानि देयानि रत्नानि विवि
धानि च। गावः कांस्योपदोहाश्च कन्याश्चैव स्वलंकृताः॥ सर्वकामगुणोपेता यानानि विविधानि च। भव
नानि विचित्राणि भूमिर्वासांसि कांचनं। वाहनानि च देयानि हया मत्ताश्च वारणाः। शयनं शिबिकाश्चै
व स्यंदनाश्च स्वलंकृताः। यद्यद्गृहे धनं किंचिद्यद्यदस्ति महद्वसु। तत्तद्देयं द्विजातिभ्य आत्मा दाराश्च सूनवः।
श्रद्धया परया दत्तं क्रमशः पार्थ पारगः। शक्तितः सुमना हृष्टः शुश्रूषुरविमत्सरः। सत्यार्जवरतो दांतः शुचिः
शौचिसमन्वितः। श्रद्दधानो जितक्रोधो यथा सिध्यति तच्छृणु। शुचिः शीलान्विताचारः शुक्लवासा जितेंद्रि
यः। संस्कृतः सर्वशास्त्रज्ञः श्रद्दधानोऽनुसूयकः। रूपवान्सुभगो दांतः सत्यवादी जितेंद्रियः। दानमानगृही
तश्च कार्यो भवति वाचकः। अविलंबमनायस्तमद्रुतं धीरमूर्जितं। असंसक्ताक्षरपदं स्वरभावसमन्वितं। वाच

येद्वाचकाः स्वच्छः स्वासीनः सुसमाहितः॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमं। देवीं सरस्वतीं चैव ततो जयमुदीरयेत्
येद्वाचकाः स्वच्छः स्वासीनः सुसमाहितः॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमं। देवीं सरस्वतीं चैव ततो जयमुदीरयेत्॥ नियमस्थः शुचिः श्रोता शृण्वन्नसत्फलमश्नुते। पारणं प्रथमं प्राप्य द्वि
र्द्विजश्रातु वाचकाद्राजन्न श्रुत्वा भारत भारतं। नियमस्थः शुचिः श्रोता शृण्वन्सत्फलमश्नुते। पारणं प्रथमं प्राप्य द्वि
र्द्विजश्रातु वाचकाद्राजन्न श्रुत्वा भारत भारतं। अग्निष्टोमस्य यागस्य फलं वै लभते नरः। अप्सरोगणसंकीर्णं विमानं लभते महत्॥ प्रहृ
ष्टान्नकामैश्च तर्पयेत्। अग्निष्टोमस्य यागस्य फलं वै लभते नरः। अप्सरोगणसंकीर्णं विमानं लभते महत्। प्रहृ
ष्टः स तु देवैश्च दिवं याति समाहितः॥ द्वितीयं पारणं प्राप्य अतिरात्रफलं लभेत्। सर्वरत्नमयं दिव्यं विमानमधि
रोहति। दिव्यमाल्यांबरधरो दिव्यगंधानुलेपनः। दिव्यगंधधरो नित्यं देवलोके महीयते। तृतीयं पारणं प्राप्य द्वाद
शाहफलं लभेत्। वसत्यमरसंकाशो वर्षाण्ययुतशो दिवि। चतुर्थे वाजिमेधस्य पंचमे द्विगुणं फलं। उदितादि
त्यसंकाशं ज्वलनानलोपमं। विमानं विबुधैः सार्द्धमारुह्य दिवं गच्छति। वर्षायुतानि भवने शक्रस्य दिव्यमो
दते। कैलासशिखराकारं वैडूर्यमणिवेदिकं। परिक्षिप्तं तु वहुधा मणिविद्रुमभूषितं। विमानं समधिष्ठा
य कामगं साप्सरोगणं। सर्वान्लोकान्विचरते द्वितीय इव भास्करः। अष्टमे राजसूयस्य पारणे लभते फलं
चंद्रोदयनिभं रम्यं विमानमधिरोहति। चंद्ररश्मिप्रतीकाशैर्हयैर्युक्तं मनोजवैः। सेव्यमानो वरस्त्रीणां चंद्रा
कांततरैर्मुखैः। मेखलानां निनादेन नूपुराणां च निःस्वनैः। अंके परमनारीणां सुखसुप्तो विबुध्यते। नवमे क्र ४८९

तुराजस्य वाजिमेधस्य भारत। कांचनस्तंभनिर्व्यूहं वैडूर्यकृतवेदिकं। जांबूनदमयैर्दिव्यैर्गवाक्षैः सर्वतो वृतं। से
वितं चाप्सरःसंघैर्गंधर्वैर्दिविचारिभिः। विमानं समधिष्ठाय श्रिया परमया ज्वलन्। दिव्यमाल्यांबरधरो दिव्यचं
दनभूषितः। मोदते देववत्सार्द्धं दिवि देव इवापरः। दशमं पारणं प्राप्य द्विजातीनभिनंद्य च। किंकिणीजालनि
र्घोषं पताकाध्वजशोभितं। वज्रवेदिकसंकाशं वैडूर्यमणितोरणं। हेमजालपरिक्षिप्तं प्रवालवलभीमुखं। गं
धर्वैर्गीतकुशलैरप्सरोभिश्च शोभितं। विमानं सुकृतावासं सुखेनैवोपपद्यते। मुकुटेनार्कवर्णेन जांबूनद
विभूषिणा। दिव्यचंदनदिग्धांगो दिव्यचंदनभूषितः। दिव्यान्लोकान्विचरति दिव्यैर्भोगैः समन्वितः॥ विबु
धानां प्रसादेन श्रिया परमया युतः। दिव्यवर्षगणानेव स्वर्गलोके महीयते। ततो गंधर्वसहितः सहस्राण्येकं
विंशति। पुरंदरपुरे रम्ये शक्रेण सह मोदते। दिव्ययानविमानेषु लोकेषु विबुधेषु च। दिव्यनारीगणाकीर्णो नि
वसत्यमरो यथा। ततः सूर्यस्य भवने चंद्रस्य भवने तथा। शिवस्य भवने राजन्विष्णोर्याति सलोकतां। एवमेतन्म
हाराजन्नात्र कार्या विचारणा। श्रद्दधानेन वै नाव्यमेवमाह गुरुर्मम। आलेखकस्य तु दातव्यं मनसा यद्यदिच्छसि।
हस्त्यश्वरथयानानि वाहनं च विशेषतः। कटकं कुंडले चैव ब्रह्मसूत्रं यथा परं। वस्त्रं चैव विचित्रं च गांधश्चैव वि

गोपतः। देववत्स जानंत विष्णुलोकमवाप्नुयात्। अतः परं प्रवक्ष्यामि यानि देयानि भारत। वाच्यमाने सुविप्रेन्द्रो
राजन्पर्व्वणि पर्व्वणि। जातिं देशं च सत्वं च माहात्म्यं नरतर्पण। धर्म्मेष्टकांश्च विज्ञाय श्रोत्रियाणां नराधिप। स्व
स्तिवाच्य द्विजानादौ ततः कार्यं प्रवर्त्तते। समाप्ते पर्व्वणि नृप स्वशक्त्या तर्पयेद्द्विजान्। आदौ तु वाचकं चै
व वस्त्रगंधसमन्वितं। विधिवद्भोजयेद्राजन्मधुपायसमुत्तमं। ततो मूलफलप्रायं पायसं मधुसर्पिषा।
आस्तिके भोजयेद्राजन्दद्याच्चैव गुडोदनं। अपूपैश्चैव पूपैश्च मोदकैश्च समन्वितं। सभापर्व्वणि राजेंद्र ह
विष्यं भोजयेद्द्विजान्। आरण्यके मूलफलैस्तर्पयेत्तु द्विजोत्तमान्। आरण्यं पर्वमासाद्य जलकुंभान्प्रदाप
येत्। तर्पणानि च मुख्यानि वन्यमूलफलानि च। सर्वकामगुणोपेतं विप्रेभ्योऽन्नं प्रदापयेत्। विराटपर्वणि
तथा वासांसि विविधानि च। उद्योगे भरतश्रेष्ठ सर्वकामगुणान्वितं। भोजनं भोजयेद्विप्रान्गंधमाल्यैरलंकृ ५८८
तान्। भीष्मपर्व्वणि राजेंद्र दत्वा यानमनुत्तमं। ततः सर्वगुणोपेतमन्नं दद्यात्सुसंस्कृतं। द्रोणपर्व्वणि विप्रेभ्यो
भोजनं परमार्चितं। आराध्य देया राजेंद्र चापान्स्तीवरासिणा। कर्णपर्व्वण्यपि तथा भोजनं सर्वकामिकं। वि
प्रेभ्यः कवचं सम्यक् दद्यात्संयतमानसः। शल्यपर्व्वणि राजेंद्र मोदकैः सगुडोदनैः। अपूपैस्तर्पणैश्चैव मन्नं

दद्यात्सुसंस्कृतं। शांतिपर्व्वणि राजेंद्र हविष्यं भोजयेद्द्विजान्। अश्वमेधिकमासाद्य भोजनं सार्वकामिकं। त
थाश्रमनिवासे तु हविष्यं भोजयेद्द्विजान्। मौशले सार्वगुणिकं गंधमाल्यानुलेपनं। महाप्रास्थानिके तद्व-
त्सर्वकामगुणान्वितं। स्वर्गपर्व्वण्यपि तथा हविष्यं भोजयेद्द्विजान्। हरिवंशे तथा पर्व्वे पायसं तत्र भोजये-
त्। पारणे पारणे राजन्यथावद्भरतर्षभ। समाप्य सर्वाः प्रयतः संहिताः शास्त्रकोविदः। शुभे देशे निवेश्याथ
क्षौमवस्त्राभिसंवृताः। शुक्लांबरधरः श्रीमान्शुचिर्भूत्वा स्वलंकृतः। अर्चयेत्तु यथान्यायं गंधमाल्यैः पृथ-
क् पृथक्। संहिता पुस्तकं राजन्प्रयतः शिष्टसंमितान्। भक्ष्यैर्माल्यैश्च गंधैश्च स्वलंकृत द्विजोत्तमान्। तर्प्पयेद्-
द्विविधैः कामैर्दानैश्चोच्चावचैस्तथा। अतिरात्रस्य यज्ञस्य फलं प्राप्नोति मानवः। प्राक्रयाचक्रतु फलं त-
था पर्व्वणि पर्व्वणि। वाचको भरतश्रेष्ठ भोजयित्वा स्वलंकृतं। वाचके परितुष्टे तु शुभा प्रीतिरनुत्तमा। ब्रा
ह्मणे पुत्र तुष्टे तु प्रसन्नाः सर्वदेवताः॥ ततो हि वरणं कार्यं द्विजानां भरतर्षभ। सर्वकामैर्यथान्यायं साधु
भिश्च यथाक्रमं। इत्येष विधिरुद्दिष्टो मया ते द्विपदां वर। श्रद्दधाने न वै भाव्यं यन्मां त्वं परिपृच्छसि। भारतश्र
वणे राजन्पारणे च द्विजोत्तम। सदा यत्नवता भाव्यं श्रेयस्तु परिपृच्छसि। भारतं शृणुयान्नित्यं भारतं प

रिकीर्त्तयेद्य॥ भारतेन वनेयस्य तस्य हस्तगतो जयः॥ भारतं परमं पुन्यं भारते विविधाः कथा॥ भारतं सेव्यते दे
वै भारतं परमं पदं॥ भारतं सर्व्वशास्त्राणामुत्तमं भरतर्षभ॥ भारतात्प्राप्यते मोक्षस्तत्वमेतद्ब्रवीमिते॥ महा
भारतमाख्यानं क्षितिं गां च सरस्वतीं॥ ब्राह्मणान् केशवं चैवं कीर्त्तयान्नावसीदति॥ वेदे रामायणे पुन्ये भार
ते भरतर्षभ॥ आदौ चांते च मध्ये च हरिः सर्व्वत्र गीयते॥ यत्र विष्णुकथा दिव्याः श्रुतयश्च सनातनाः॥ तच्छ्रो
तव्यं मनुष्येण परं पदमिहेच्छता॥ एतत्पवित्रं परममेतद्धर्म्मनिदर्शनम्॥ एतत्सर्व्वगुणोपेतं श्रोतव्यं भूत
मिच्छता॥ ॥इति श्री हरिवंशे पर्व्वानुकीर्त्तनं नाम॥ जनमेजय उवाच॥ अक्षयाद्याहमहं ब्रह्मन् श्रोतु
मिच्छामि तत्वतः॥ त्रयाणां पुरसंज्ञानां षचराणां समासतः॥ ॥वैशंपायन उवाच॥ शृणु विस्तरतः सर्व्वं
यन्मां पृच्छसि नैधनं दैत्यानां वाङ्कवलिनां॥ सर्व्वप्राणिविरोधिनां शंकरेण वधं राजन् शूलास्त्रविनिर
गि[illegible]तो॥ अतलं पुरासुरेंद्राणां सर्व्वभूतवधैषिणां॥ त्रिपुरं पुरुषव्याघ्र वक्कधा त्रसमीरितं॥ विचार्य मतिन
मे[illegible]मथ बद्धं व मिवाश्रितं॥ प्राकारेण तु हैमेन कांचनेन विराजता॥ मणिभिश्च प्रकाशाद्भिः सर्व्वरत्नैश्च
तारकाक्षो बलासेननसा मध्ये श्रिया परमया हृत्लत्या गांधर्व्वाणामिवादग्रं कर्म्मणा साधितं पुरा॥ वाजिनः

पद्मसंयुक्ता वह्नितिवल्लदर्पिताः॥ पुरं प्रभाकरं श्रेष्ठं मनोभिःकाममवारिणा॥ ध्वजवंतो ह्येषमाणाश्च विक्रमैः प्राणसं
हतो॥ [illegible]क्रयंत इवाकाशं खुरैः सर्व्वदलप्रभैः॥ वायुवेगसमैः धर्गैः कालयंत इवावरां॥ सद्वंतः समहद्भशंत
वरा[illegible]र्व्वदिनात्ममिः॥ ऋषिनिर्ह्मौलनप्रख्यैः सर्पैः सादग्धकिल्विषैः॥ गीतवादित्रवक्कुलं गांधर्व्वनगरो
पमं॥ चित्रायुधसमाकीर्णं व्रतमकनप्रभं॥ शुशुभे दैत्यनगरं वक्कस्सर्यमिवांवरं॥ वराहालकसंपन्नं तस
कांचनसुप्रभं॥ क्ष्वेडितास्फोटवक्कुलं सिंहनादसुनादितं॥ वभौ वल्गुजनाकीर्णं वनं चैत्ररथं यथा॥ समु
च्छ्रितपताकाढ्यं श्रुचिमिश्र विराजितं॥ राजत्रिपुरं राजन्महाविद्युद्विदांवरं॥ स्वर्यनानश्चदैत्येंद्रः चंद्रनाम
श्च भारत॥ तथान्ये च महावीर्य्या दानवा बलदर्पिताः॥ सुमुहुश्चव मेजश्च मोहिताः परमेष्ठिता॥ पंथानं देव
गमनं विहृथानेव भारत तेरेवसमरा॥ शैश्च प्रगृहीतशरासनाः॥ दीनचैनेरश्यहेलदेवयाने महापथे॥ पितृ
वत्किवलोपेते हते भरतसत्तमा ब्रह्माणमभ्युधवत्त सर्व्वे सुरगणास्तथा॥ विवर्णवदनादाना छिनेवग
तिकर्म्माणि॥ अथ ध्रुवंश्च ग्रतश्छित्वा स्वरेणार्त्तनिनादिना॥ हन्यामहे मीगोच्छेदनमाग दानेभ्यश्चैव मधो
पायेव दस्व वहंताः वरायज्ञावावाङ्कवलिनो वधमसमरे परान्॥ श्रावयित्वाथ वरदो ब्रह्मा प्रोवाच देवताः

प्रतिगृह्य च तद्वाक्यं मनो निर्वाणमिरे वचः । धूमैरापेदिरे सर्वे सह रुद्रैः स्वमारताः । विंध्यपादे च मेरौ च मध्ये च हिम-
वीतले । तपसोग्रेण योगज्ञाः सर्वे ते मुनयो नृप । काश्यपेयाहरं प्राप्ता जपता ब्रह्मसंहिताः । तेषां परमन-
रीणां भगवन्नग्र भोजने । विन्यस्य वदनेनिचये तावेलाहं च मणी । परधमना निचमाणि मृद्वनि च शुभानि
चास्वयं मृतानां गुल्मानां मृगाणां कुरुसत्तम । निगृहीतानि मुक्तानि देहेभ्यो वनचारिणां । अत्वरिष्ठ
मथोत्पत्य विविश्रुर्मायया हृताः ॥ दरालयं सुराः सर्वे व्याघ्रचर्मनिवासिनः । प्रतिपद्याथ ते दीना भग-
वन्तं जगत्पतिं । मुख्यकेनानिधमनेन प्रानापन्न हरं ततः । हविर्हृतं मिवाज्ञाना ब्रूम्स्मकन्नेषु वह्निषु वर-
दानं यथा स्मासु नमवन्न मुखे वयि । यथा देसं तथा काले क्रियतां ब्रह्मणो वचः । यत्कृतं कं देव देवेन स्वच-
णां समीपतः ॥ एवं देव वचो निश्रुत्य भावेनार्थस्य वैचलातः । समनग्यन्मघन्महादेवो देवैः सह सवासवैः ५७०
आदित्याख्यमास्थाय सन्नद्धाः समलंकृताः ॥ सर्वे कांचनवर्णाभाः वभूहीसा इवाग्नयः । रुद्रेण मंडि-
ताः रुद्राः द्वदलेद्ववतेजसा मन्नद्धाः कृशलाः सर्वा प्राशवः पर्वता इवा विश्वे विश्वेन व पुषा वा वलि-
न रूपिणः ॥ समनद्यन्महात्मानो दानवानां स्थान विधिन्नवः । पम्निः सद्धना ध्वन्द्वाः समन्तात्परिवारितः

त्रिपुरं योधयन्नल्पः प्रग्रहसमरं धनुः ॥ अथ दैत्या भिन्नदेहाः पुरादालगदाश्ववान्यपतन्भुवि देहैस्तैर्विशी-
र्णाः इव पर्वताः । अतिविधाः प्रविद्धाश्चरणमध्यगता नृप । न्यपतद्दैत्यसंघाता वज्रेणेव हता नगाः । अ-
सिनिश्चहतादैवैः शक्तिरवन्नपरश्वधैः । वाणैश्च भिन्नमर्माणो दैत्येन्द्रा युद्धगोचराः । प्रपेतुः सहिताङ्ग-
र्गाः छिन्ना पत्रा इवाचलाः ॥ तत्र संज्ञं विमञ्चतत ते नदीतेन तेजसा ॥ एवं तेन्यान्यसंबाधे सीयन्नाः न्ययक-
र्मणा । नापलभ्यत च क्षुन्नामपि दिव्येन चक्षुषा । अस्तं प्राप्ते दिनकरे मुरं ह्रासे निशामुखे छिन्न-
भिन्नहतमुखा निपेतुर्वसुधातले । अथ दैत्यालयं प्राप्ता निशायां निशितैः शरैः । विनेदुर्विपुले-
र्नादैर्मेघा इव महारवाः ॥ जयं प्राप्यासुराः सर्वे ते न्योन्यमभिजल्पिरे । त्रासिता स्त्रिदशाः सर्वे सं-
ग्रामे जयकांक्षिणः । अस्माभिर्बलसंपन्नैः सपाशासिसतामरैः । विरेजुश्च जयं प्राप्ता गर्जना द-
र्पबोधिताः । समरे बलसंपन्नाः सायुधा दैत्यसत्तमाः ॥ सुरेश्च महितैः सर्वैरथमास्थाय शंकरः ॥ द-
र्पितान्निनदद्दैत्यान् उपरहं तं च तेजसा ॥ युगान्तकाले विततरस्मिवान्निव दिहह नः । सर्वन्मृता
निमृताग्राः । प्राविले समुपास्थिते । सरथो वाजिनिशीघ्रैः उह्यमानो महाजवैः शावैवेनो नमसोभ्य

ध्येसविद्युद्दिवतोदयः॥ हृषमेणधनंजयेण॥ एवं मानेन भारत॥ नाति स्म सरथो राजन्नैंद्रायुधधरं तां बुद्धात
तो स्वरा गताः॥ स्थिमरुद्ध बृहेषमधनं॥ कर्म्मभिः सर्वैजंस्वैः॥ सुचिनिस्नं वकतदा॥ ऋषयश्च तपःश्राय
सत्यव्रतपरायणाः॥ अमृताशाश्विनश्चैव सुरथाग्राः सहस्रशः॥ गंधर्वाश्चोपगायंति गाधर्वेण स्वरेण वै॥
प्रहृष्टवदनाः सौम्याः पेट स्थानांतरे नृपा॥ वराटालकसंपन्ने शतघ्नीशतसंकुले॥ तस्मिन्स्कंदैत्यनगरे सर्वे
न्तृतनयाहवे॥ ततस्कश्शरवर्षाणि मुमुचुर्दैत्यदानवाः॥ असुरामरयोर्मध्ये तीक्ष्णाग्राणि समंततः॥ ध्न
घ्नीनिश्चनिशूलं नो मुद्गरःशूलश्च भारत॥ ते चाक्री सहकर्म्म दानवायुधकोविदाः॥ ॥ दानिश्च गदां नघ्नु ने
रुर्नैलोक्यश्च विच्छिंद्यः॥ अस्त्रैरस्त्राण्यवाधते माया मायाभिरेव च॥ ततो परमसंदुग्धमधशरशालिः परस्वधन
अशनीश्च महाघोरा मुक्ता स तशहस्रशः॥ आसिनिर्मायाविदितै मृत्पार्थिपयगाचरा॥ ते वध्यमाना विबु
धाः शरवर्षैर्विवाछिताः॥ गंधर्वो नगराकाराः॥ सा सीदन्महारथः॥ हन्यमानं सुरगणाः॥ प्राशासिशरता ५०
मरैः ते च दैत्यप्रहरणैर्गुरुनिर्मारसाधिभिः॥ चित्तश्चवज्रनिःशस्त्रैरतिष्ठति शची पतिः॥ ततो मध्ये दि
नशहः॥ प्रांकुराशी महीपते॥ ऋषीणां ब्रह्मपुत्राणां महतामपि भारत॥ सापथं करस्यायैरथ्यनेमिपति

षिताः॥ अनेशे...

...भितन्नपा...

...नि

...णा

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

२० धेवीर्या अंध्यायमनसाप्रभुः। मत्तोन ब्रह्मयोगेन तपसोग्रेण ...तो मुमुचे दैत्यनगरे सबप्राणहवाशु
दीप्ता च कनकवर्णा मानुष्पर्णीश्च सुनिर्मलान्। मकक्षावराशरानू घोरानुसविषानिवपन्नगान्॥
पदीप्तास्त्विमिद्याणे वीर्मिनि सहि दारितां शरपातपदीप्तानि विंध्यायाणी च भारत। गोपुराणि पुरःसाट्टं
शीर्यं च नराधिप। अग्निना संप्रदीप्तानि वह्निगर्भाणि भारत। धरणीं प्रत्यपद्यंत पुराणि वसुधाधिप। तानि
नैरूप्यवर्णानि निशिषराणि गिरेरिवा शंकरेण प्रदग्धानि ब्रह्मास्त्रेण पतन्नृपा हते च त्रिपुरे दैवैर्द्वा तारकं
चिलेरिताः। सर्वान् दहीति भ्रत्रूँ स्वयं प्रदृष्टा पुरुषात्मा विष्णुरेव महायोगी योगेन प्रस्मयन्निवासूयंते
ब्रह्मशद्दशे ऋषिभिः शंकरेण च ब्रह्मणा। मोदितैर्दैवैः संपन्नबलपौरुषैः॥ ॥इति श्रीखिलेषु हरिवंशे
त्रिपुरदाहसमाप्तोऽयं खिलसंज्ञकः॥ ॥श्रीहरिवंशमहारकः॥ ॥अथ संवत्सरेऽस्मिन्नृपतेः
[illegible]
विक्रमादित्यराजे संवत् [illegible]
॥लेषकपाठकयोः शुभमस्तु [illegible] कल्याणं ददात॥ ॥पश्चिमदेशे॥

ष्टितः॥ अजेयो जयतां प्राप्तः सर्वलोकस्य पश्यतः। तस्मिन्निपतिते राजन् देवानां प्रवरे रथे निपेतुः सर्वद[illegible]नि
र्तले वसुधाधिपः। विचेलुः पर्वताग्राणि चेलुश्चैव महाद्रुमाः। विविक्षुभुः समुद्राश्च न रेजुश्च दिशो दश॥
प्रहृष्टा ब्रह्मणा सत्रजनुः परमं जपाय च ब्रह्ममयं तेजः सर्वं च विजयैषिणां॥ आत्पर्थं सर्वभूतानामिह
लोके परित्रवा। समाध्यायात्मनात्मानं योगप्राप्तेन हेतुना। रथक्षरेण सास्माथ ब्रह्मभृतेन भारत। तेजसा
चालयद्धि लोकस्य ब्रह्मस्य च महात्मनः। सर्वेषामेव देवानां बलिनां कामरूपिणां॥ ऋषीणां तपसाढ्यानां च
सतां द्विजनेवनो। अथ विष्णुर्महायोगी॥ सर्वेता दृश्यत च तः। हृषद्रूपं समास्थाय प्राजहार रथोत्तमां स
क्रांतं देवगणैः समयबलपौरुषः। वल्लवासालयिचाड विषाणान्यां महाबलः॥ ननाद प्राणयोगेन म
थ्यमान इवार्णवः। तृतीयं वायुविषयं समाक्रम्य विषाणवान्॥ ननाद बलवान्नादं समुद्र इव पर्वणि
ततो नादेन चित्रसा दैतेया युधिद्रुम्मेदाः। पुनस्ते रुतसन्नाहा युयुधुः सुमहाबलाः॥ सर्वे वैवाकु बलि
नः समयबलपौरुषाः। सुरसैन्यं प्रमर्द्य तिप्रगृहीतशरासना॥ अग्निसंधयधनुषि क्षिप्तवाणं सुयं
तो ब्रह्मास्त्रेणाभिसंयोज्य ब्रह्मदंडमिवाव्ययः। मुमुचे दैत्यनगरे त्रिधमात्रानुसंज्ञितां। तं वाणं त्रि